CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library
S.D.P.B.
Coll. No. 178

Title Padārthādarśa

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 178 Subject: Tantra

Title: Śāradātilakaṭīkā – Padārthādarśa Patal no 4, 5, 12 & 14.

Author: Rāghava Scribe: Jagannātha

Date of the work: — Date of the Ms.: V.S. 1794

Place of the work: — Place of the Ms.: —

Size: 4·8" x 5·5" Extent: 31+13+6+7=57. 31 Fol. no 1 [illegible]

Language: Sanskrit. Script: Devanāgarī.

Remarks: Incomplete Fol. no 1 from 17 [illegible] [illegible] [illegible] [illegible] no 176

क्ता यथा शास्त्रोक्तरूपिणी॥ सिद्धैः स्वशक्तिमालोक्य तया केवलया शिशोः॥ निरुपायं कृता दीक्षा शाक्तेयी परि
कीर्तिता॥ अभिसंधिं विनाचार्यशिष्ययोरुभयोरपि॥ देशिकानुग्रहेणैव शिवताव्यक्तिकारिणी॥ सेयं वेधशां
भवी दीक्षा शिवावेशनकारिणीति॥ ०॥ अत एव ग्रंथकृद्भिरत्रापटले वक्ष्यति॥ दीक्षां प्राप्येति तत्र शाक्तिदी
क्षां प्राप्येत्यर्थः॥ तथा चाद्दशान्तरे शाक्तीति विजितेन्द्रिय इति तत्र वेधस्व मार्गेण दीक्षित इत्यर्थः॥ तथान्ते वषट्पंचान्तरेपि
दीक्षितस्य शैववर्त्मनेति॥ तत्र शाक्तिविष्णुशिवदीक्षास्तत्रतंत्रे ज्ञेयाः॥ मंत्रिणामिति पाठे मंत्रिणामिति कास्याद्दीक्षां
प्रवक्ष्यामि उत्तरार्द्धे सर्वमंत्रफलमिति मंत्रशास्त्रस्योच्चारितत्वात्॥ अत्र मंत्राणामिति॥ संबध्यते इति वदंति॥ प
तइ रं तु मुख्यमंत्रेष्वेव संबंधाभावात्॥ यद्यपि मंत्रपदं तदपि लिंगभिन्नं मितिन समंजसः पाठः॥ आचार्यात्रिपि
॥ अथ ग्रंथे सविधिवन्मन्त्रं दीक्षाविधानं जगतो हितायेति॥ वायवीयसंहितायां॥ शांभवी चैव शाक्ती च मां
त्री चैव शिवागमे॥ दीक्षोपदिश्यते त्रेधा शिवेन परमात्मना॥ गुरोरालोकमात्रेण स्पर्शात्संभाषणादपि॥ ज्ञा
नसंज्ञानवेजं तो दीक्षा साशांभवी मता॥ शाक्ती ज्ञानवता दीक्षा शिष्यदेहं प्रविश्य तु॥ गुरुणा योगमार्गेण क्रिय
ते ज्ञानचक्षुषा॥ मांत्री क्रियावती दीक्षा कुंडमंडलपूर्विकेति॥ यतो यस्मात्कारणाद्यया दीक्षया विना सर्वे चैतम
त्राश्चैतेषां यत्फलं तत्फलं न्यूनेन प्राप्यते॥ एतेनैव तदुक्तं॥ यः कश्चन मंत्रो दीक्षयैव शिष्येण गुरुमोग्राह्यः॥ अ
स्य फलदायकनियमाभावात्॥ किंच॥ शिवादीक्षितायास्तत्र मंत्राणामेव फलदायकत्वं॥ अन्यथा तु सर्व
मंत्राणां॥ अपच सर्वे च तन्मंत्रफलविशेषणत्वेनाप्यभ्यास्थेयं॥ तेनोपदेशादिमात्रेण सकलं फलं न प्राप्य
ते कृत्याकृत्यानुसंधेयमित्यर्थः॥ उपदेशस्याप्युक्तं अंतरे विहितत्वादिति॥ मंत्रशास्त्रेष्वनुसंक्षिप्तमुक्तं॥ पिंगलामते॥
भावमविभ्यो विज्ञानं चेतनसंसारबंधनात्॥ मंत्रस्तु चार्तसंप्रपक्रमदधिष्ठानतः प्रियः॥ इति॥ अन्यत्रापि॥ गु
टी० दी० रूपदेशतो मंत्रोमननत्राणनादपि॥ दीक्षाशास्त्रेष्वभिमाद्य॥ त्रामिति॥ दयाकृत्य मिवन्नयोराख्यामि
यतः करोति स सिद्धो मंत्र इत्युच्यते तत इति॥ रुद्रयामलेच॥ मननात्राणनाच्चैव मद्रूपस्यावबोधनात्॥ मा॥

इदंयंनिरुक्तिः।। अथ परस्मात्सम्यात्रिस्तुयादितियाम्कोक्ते।।न युक्तं।। इदानिं यस्मादिह दिव्यभावमजामयेकर्मचसं
क्षिणोति।। फलं चतुर्वर्गजं चंच यस्मात्तस्मात्तद्दीक्षेत्यभिधानमस्याइति।। प्रयोगसारेपि।। दीयते ज्ञानमत्यन्तं क्षी
यते पापसंचयः।। तेन दीक्षेति सा ज्ञेया पाशछेदकृया क्रियेति।। अत्र दीक्षायामेवतंत्रेणनित्यस्नानमाह।। अपि वस
मागत्वाद्दिद्विक इत्यनेन सूचितं।। ।।स्नानानन्तर्यं नित्यकर्मविधिरुच्यते।। ।।प्रातर्निमज्ज्यैत्तदायस्मत्सुक्त
विधानेनाशौचादिकं देहशुद्धिं च विधाय रात्रिवासः परित्यज्य वासोंतरं परिधाय मंत्रस्नानं कृत्वा देवतागृह
मागत्य सम्मार्जनोपलेपनादिकं कृत्वा देवस्य निर्माल्यमपसार्य पूर्वदिनावशिष्टपात्रादिनामस्पर्शनमस्कु
र्यात्।। अस्य पादोदकदर्शनात्।। यदाहुः।। हृषीकांतपस्तु हृदः कस्य काचरजस्वला।। देवताचमनिनिर्माल्या इति
पुत्रं पुराकृतमिति।। न युक्तं मंत्रप्रकाशे।। स्वतुल्ले विधानेन सम्यक्शौचं विधाय च।। प्रक्षाल्य पादावाचम्य कृ
त्वासैन्यायथात्मवान्।। प्रविश्य देवतास्थानं निर्माल्यमपकृष्य च।। दद्यात्तु पुष्पांजलिं विद्वान् अर्घ्यपाद्येतथैव च
।।मुखप्रक्षालनं दद्याच्छुद्धं दंतधावनं।। दद्यादाचमनं पश्चात् दद्याद्धूमोमलं भुत्रमिति।। ततो यथोक्तासने
उपविश्य गुरुं मूर्ध्नि ध्यायेत्।। प्रातःशिरसि शुक्लेब्जे द्विनेत्रं द्विभुजं गुरुं।। प्रसन्नवदनं शांतं स्मरेत्तन्नाम
पूर्वकं।। अहं देवो न चान्योस्मि ब्रह्मैवाहं न शोकभाक्।। सच्चिदानंदरूपोहं नित्यमुक्तस्वभाववानिति।। गु
रुदेवतात्मनामैक्यं भावयित्वा प्रार्थयेत्।। त्रैलोक्यचैतन्यमयादिदेव श्रीनाथ विष्णो भवदाज्ञयैव।। प्रातः
समुत्थाय तव प्रियार्थं संसारयात्रामनुवर्तयिष्ये।। जानामि धर्मं न च मे प्रवृत्तिर्जानाम्यधर्मं न च मे निवृत्ति
ः।। केनापि देवेन हृदि स्थितेन यथा नियुक्तोस्मि तथा करोमीति।। अत्र श्रीनाथविष्णो इति शैवादौ तु हे का
र्य।। चंडीशाद्याज्ञयैव इत्यादि।। न तो देवगुणनामादिकीर्तयन् स्नानार्थं नद्यादौ गच्छेत्।। स्नात्वेति स्नानादि २
को पदेशोनुक्रमकथनाय।। यतश्चाशुचिवस्त्रमस्नातमनलकारं पुरुषं देवता नाधितिष्ठंतीति।। अन्येन

द्वादशांतं बुल्लगतं ध्यायेन्नारायणं प्रभुं।। ५

मपि

मज्जनस्नाने। शाक्तः स्नानानंतरं कुर्यादित्युक्तं भवति।। यदाहुः।। स्नात्वा वागोरजो वापि निर्भवति विपदितत्केव
लैर्वापि मंत्रैरिति।। अथ च विधिवत्स्नात्वा पूर्वाह्णिकीः क्रियाः कृत्वेति मंत्रस्नानं मंत्रसंध्यामंत्रतर्पणं च कर्त
व्यमिति सूचितं।। अथ स्नानं प्रवक्ष्यामि सर्वपापहरं शुभं।। यत्कृत्वा साधकः सम्यक् सर्वकर्मार्हको भवेत्
।। इत्यादिना महाकपिलपंचरात्रे।। वसिष्ठसंहितायामपि।। कृत्वादौ वैदिकं स्नानं ततस्तांत्रिकमाचरेत्।। इ
त्यादीनां च मंत्रस्नानादिविधिरुक्तः।। तत्र मंत्रस्नानं द्विविधं।। आंतरं बाह्यं च।। तत्र वैष्णवं स्नानमांतरमुक्तं
वसिष्ठसंहितायां।। अनंतादित्यसंकाशं वासुदेवं चतुर्भुजं।। शंखचक्रगदापद्ममुकुटं वनमालिनं।। तत्
पादोदकजां धारां निपतंतीं स्वमूर्धनि।। चिंतयेद्ब्रह्मरंध्रेण प्रविशंतीं स्वकां तनुं।। तया संक्षालयेत्सर्वमंत
र्देहगतं मलं।। तत्क्षणाद्विरजो मंत्री जायते स्फटिकोपमः।। इदं स्नानं च मंत्राणां सहस्रमधिकं स्मृतमिति।। रं
शाक्तेमान्यंतरस्नानं तत्क्रमोक्तं पंचमीमते।। स्नानप्रकारो द्विविधो बाह्याभ्यंतरभेदतः।। आंतरं स्नानमभ्यंत
रहस्यमपि सादरात्।। कथयामि नवध्यास्ये चतुर्वर्गाप्तिये पि च।। सरित्रयमनुस्मृत्य स्वरणत्रयमध्यतः
।। स्रवंतिं सच्चिदानंदं प्रयातं नावगोचरं।। विमुक्तिसाधनं पुंसां स्मरणादेव योगिनां।। तेन प्लावितमात्मा
नं भावयेद्भवमानये।। एवमाभ्यंतरं स्नानमिति।। शैवागमे च।। आभ्यंतरं स्नानमुक्तं।। मनसा मूलमंत्रेण
प्राणायामपुरस्सरं।। अंगे षडंगानि विन्यस्य।। ब्रह्मांडोदरतीर्थानि करैः स्पृष्टानि ते रवे।। तेन सत्येन मे
देव तीर्थं देहि दिवाकर।। गंगे च यमुने चैव गोदावरि सरस्वति।। नर्मदे सिंधुकावेरि जलेस्मिन् संनिधिं
कुरु।। एहि गंगे नमस्तुभ्यं सर्वतीर्थसमन्विते।। आवाहयामि त्वां देवि स्नानार्थमिह सुंदरि।। इति मंत्रैरं
कुशमुद्रयादित्यमंडलस्थानि तीर्थान्याकृष्याव्याहृत्य वह्निस्पंनसिसंयोज्य सोमसूर्याग्निमंडलानि तत्संचि
त्य वह्निसम्पुटबीजेन द्वादशधाभिमंत्र्य कवचेनावगुंठ्यास्त्रेण संरक्ष्य मूलमंत्रेणैकादशवारमभिमं
ऊवीतमानसंस्नानं सर्वत्र विहितं च नदीति।। बाह्यप्रकारमुच्यते।। स्वशाखोक्तविधिना स्नात्वा प्राणायामपुरस्स

श्रा॥ॐश्राआर सर्व मन्त्राणां विशेषेण दक्षु जातेजस॥ तदृपाद्रततोनाना आपस्ताः प्रणमाम्यहं विष्णुपरस्थाय निमर्के
त॥ अनेन मंत्रेण तीर्थमिमकेस्मिंतयन्त्र दहिमिति॥ मंत्रतंत्र प्रकाश उक्तेस्तत्र मूलमंत्रेद्दिग्बलाकृतिचसंपिद्ये
न्मपन्नु तमंत्रेणसमकेतोद्गात्वा कृतोधाशंखमुद्रया चात्मानमभिषिंच्य॥ ॐ मिस्तदेवि शिविरं तं विश्वमुकुः
स्तुकं भ्रमायते॥ मातरं सर्वतस्तान्नामापो देव्यपुनंतु मां॥ नारवा कृण वीजेन पुटितेत्वेनमुत्रज ह्रीमलक्रू [illegible]नुरेत
पाभासं वृत्तिते पुसंस्थिता॥ आजयंति निजस्पर्शात्पापोनिम्नं पुनंतु मामिति॥ मंत्रा स्यामभिषिंच्य॥ यस्येके
शेषु दीर्घ सा मं सर्वमर्षनं॥ ललाटे कर्णयोरक्ष्णोरापस्त मुंतु चीनमः॥ आयुरारोग्यमैश्वर्यमरिपक्ष
कर्यं कंतुवं॥ संतोषशान्तिरास्तिक्यविद्यानवक्तु चीनमः॥ इत्याभिषिच्येदितिवाक्यं मंत्रस्नानं॥ अभिषिंचेद्यथा
स्मानं वारुणैर्मूलविधियेति॥ मंत्रतंत्रप्रकाश उक्ते॥ तदुक्तं विदिता वरुपकः शौचमाचामदंतधावनं मुखप्र
क्षालनादिनिकृत्वा स्नानं समाचरेत्॥ इत्यमंत्रांकुशमुद्राभ्यां तीर्थमाकृष्य मंडलात्॥ आवाह्योत्तमिसंयोज्य
सोमसूर्याग्निमंडलं॥ संचिंत्य मंत्री तन्मध्ये निमज्जेत्सु समाहित॥ मूलमंत्रं समावर्त्य मनसाच्छिरवसाकृतिं
॥ उद्धायाच मृतस्माव्यंडंगन्यासं संयुत॥ आत्मानं मूलमंत्रेण मुद्रया कलशाख्यया॥ सप्तकृत्वोऽभिषिंचाद्य
मत्वुना मंत्री तैर्जलैरिति॥ कृष्णस्ने हिना यामपि॥ विन्यस्यांगे षडंगानि प्राणायाममनुस्मरेत्॥ श्रीसूर्यमंडलानी
र्थमाकृष्यांकुशमुद्रया॥ वमितनेन चात्राम्य कवचेनावगुंठयेत्॥ संरक्षास्त्रेण मूलेन मंत्रयेद्रुद संख्यया॥ नि
मज्ज्य तास्मिन्नादिदेवं ध्यायेत्तत्र ज उपलुतं॥ उन्मज्ज्य कंन मुद्रांच व धात्वा याद्विषदूततः॥ शालिग्राम शिलातोयं
तुलसीगंधमिश्रितं॥ कृत्वा शंखे चामयत्रिः प्रक्षिपेन्निज मूर्द्धनि॥ शालिग्रामशिलातोयमपीत्वा यस्तुमस्त
के॥ प्रक्षेपणं प्रकुर्वीत ब्रह्महासोनिगद्यते॥ विष्णुपादोदकात्सर्वं विप्रपादोदकं पिबेत्॥ विरुद्धमाचरन्मोहा
द्ब्रह्महा सनिगद्यते॥ पृथिव्यां यानि तीर्थानि तानि तीर्थानि सागरे॥ सागरे यानि तीर्थानि पादे विप्रस्य दक्षिणे॥ ततः ३

संक्षेपतो देवान्मनुष्यांस्तर्पयित्वा निषिच्य॥ पादुयित्वां वरं चोरू वस्त्रान्याचम्य यततः॥ द्वारये दासमीद्दे परिधानोत्तरी
यके॥ अच्छिन्ने सदृशोश्रुक्ते न्याचमेन्मातमस्थितः॥ ऊर्ध्वपुंड्रं त्रिपुंड्रं वा कृत्वा संध्यां समाचरेदिति॥ अंकुश शंकुंन
शंखमुद्रालक्षणानि यथा॥ दक्षमुष्टौ गृहीतस्य वाममुष्टेस्तु मध्यमा॥ प्रसार्य तर्जनीमाकुंचयेद्यमंकुशमुद्रिका
॥ दत्ता गुष्टेपरां मुष्टिं सिद्धाहस्तद्वयेन तु॥ साध्यकार्यां चेक मुष्टिं कुर्यात्कुंडनस्य मुद्रिका॥ वामांगुष्ठं तु संगृह्य द
क्षिणेन तु मुष्टिना॥ कृत्वोत्तानं ततो मुष्टिमंगुष्ठं तु प्रसारयेत्॥ वामांगुल्यस्तथाश्लिष्टाः संयुक्ताः सुप्रसारिताः॥ द
क्षिणांगुष्ठसंस्पृष्टा मुद्रा शंखस्य चोदितेति॥ ॥ तत्रावैस्रवतिलकेतु विशेषः॥ ललाटे तु गदा कार्या मूर्ध्नि चापं शरं
तथा॥ नंदकं चैव हृन्मध्ये शंखं च चक्रं भुजद्वये॥ शंखचक्रांकितो विप्रः श्मशाने म्रियते यदि॥ प्रयागे या गति
प्रोक्ता सा गतिस्तस्य नारदेति॥ ॥ श्रौचेस्तु ऊर्ध्वपुंड्रधारणानंतरमेव भस्मना त्रिपुंड्रधारणमपि कार्यं॥ तत्रोद्विजा
नामूर्ध्वपुंड्रस्यावश्यकत्वं॥ तदुक्तं ब्रह्मांडपुराणे॥ ऊर्ध्वपुंड्रं मृज्जं सौम्यं ललाटे यस्य दृश्यते॥ सचांडालोपि शुद्धा
त्मा [illegible] ॥ अग्नौ चिताप्य [illegible] पं माचरेत्॥ शुचिरेव भवेन्नित्यमूर्ध्वपुंड्रांकितो नरः
॥ मन्त्रियाथ [illegible] ॥ [illegible] मूर्ध्वपुंड्रम[illegible]तरति॥ तत्र त्रिपुंड्रधारणविधानं तद्वि
धानेन यथा॥ [illegible] ॥ [illegible] मध्ये नानीयगोमयं॥ वामेन पात्रेसंशो
ध्य [illegible] न विशोधयेत्॥ [illegible] कृतं भस्म अग्निरित्यादिमंत्रतः
॥ विमृज्यांगानि [illegible] ॥ तस्माद्धूलेति यजुषामंत्रयेद्[illegible] ॥ अप्यादो श्वतुर्थीकृ
दं तैस्ता धोत्रा चेत्राकैः॥ पंचवर्ण [illegible] सुच॥ त्रिपुंड्रधार[illegible] ॥ त्रि
पुंड्रधारयेन्मंत्री [illegible] वापरजपति॥ मंत्रास्तु॥ अग्निरितिभस्म वायुरितिभस्म जलमितिभस्म स्थलमितिभस्म
मितिभस्म व्योममितिभस्म सर्वं ह वा इदं भस्म मन एतानि चक्षूंषि तस्माद्व्रतमेतत्पाशुपतं यद्भस्मांगानि
नो

मूलमंत्रेण त्रिः संजप्य तेन मूलेन त्रिराचम्य पुनस्तार्घ्यजलं दक्षहस्तेन सव्यहस्ते निधाय १०

शा० टी० संस्पर्शयेत्॥ तस्माद्भूतलं देहेतत्पाशुपतं पशुपात्रविमोक्षयी॥ यत्तु शापं च वाक्करे लोकस्पर्शः॥ प्रकारांतरेणाप्याह॥ ललाटे प० ४
भ्रूलग्नविशिष्टे यं रुद्रयेद्धव्यवाहनः॥ नासौ स्कंदो गजेहस्यारूढो दक्षिणबाहुके॥ आदित्यो वामकुक्षुग्मेच शशी चमणि
बंधके॥ वामदेवो वामबाहुबाहुमध्ये प्रजनः॥ मणिबंधे च वसवः पृष्ठदेशे हरः स्मृतः॥ पांसुःकक्षुदिसंप्रो
क्तः परमात्मा शिरस्थ इति॥ वायवीयसंहितायामपि॥ मंत्रमेव त्रिपुंड्रं धारणमुक्तं॥ पुनर्मस्तके रामंत्री त्रिपुंड्रं
जम्भ्नालिरवेदिति॥ मत्स्यसूदनामपि तत्रैवोक्तं॥ त्रिवारेर्जस्मसंशोधमथ होत्रोप्वंतुवा॥ देवा द्याशुद्ध
वं वापि पक्षे शुचि सुगंधिच॥ कपिजायां सकृद्धस्तं गृहीतं गगने पतत्॥ न क्षिप्तं नातिकठिनं न दुर्गंधिन
वोषितं॥ उपर्यधः परित्यज्य गृह्णीयात्पतितं यदि॥ पिंडीकृत्य शिवाग्नौ तु न क्षिपेत्तन्मंत्रतः॥ अपक्वमति
पक्वं च संत्यज्य नसितं सितं॥ आदाय वामभागे न्यस्य धारेविनिक्षिपेत्॥ भस्मसंग्रहणं कुर्यादिवनु
वासितेसति॥ उद्धामने कृते यस्मात्खंडभस्मं प्रजायत इति॥ ॥ ततः स्वशाखोक्तसंध्यां कृत्वा मंत्रसंध्यां
कुर्यात्॥ तद्यथा॥ प्राणायामत्रयं कृत्वा नार्थज्जलं दक्षहस्ते गृहीत्वा मूलेन त्रिधाभिमंत्र्य तज्जलिनोदक
बिंदुभिः सप्तधा मूलेनात्मानं संमार्ज्य अवशिष्टं जलं दक्षहस्ते गृहीत्वा नासिकासमीपं नीत्वा इडयादेहां
तरात्कृष्य पालितैः पापसंचयैः कृष्णवर्णं तदुदकं दक्षनासिकापिरेचितं ध्यात्वा पुरः कल्पित वज्रशि
लायामस्त्रमंत्रेण प्रक्षिपेदित्यघमर्षणं॥ पुनरंजलिना जलमादाय सूर्यमंडलस्थाय देवायार्घ्यं क
ल्पयामि॥ नत्रायत्र्या मूलेन वा त्रिरर्घ्यं दत्वा सूर्यमंडलस्थं देवं ध्या यन्मूलमंत्रेणोपस्थाय तत्र
तन्मंत्रगायत्रीं मूलमंत्रं वाष्टाविंशति वा जपेत्॥ ततो मूलमंत्रमुच्चार्य देवं तर्पयामि॥ स्वष्टाविंशति
वारं तर्पयित्वा सूर्यमंडले देवतां संचिंत्य सूर्यायार्घ्यं दत्वा संहारमुद्रयात्मानं विसृज्य स्वयादिकं
नमस्कृत्य देवतास्तुतिं पठन्यागमंडपं गच्छेदिति॥ तदुक्तं मंत्रतंत्रप्रकाशे॥ कृत्वा संध्यां जपत्तो

त्रं यथा यांदेया गमंदिरमिति॥ तथा॥ उक्तेनैव विधानेन कृत्वा स्नानं तु तांत्रिकं॥ वैदिकीं तांत्रिकीं सं
ध्यां कृत्वा तर्पणमेव च॥ जपस्तोत्राणि नामानि यायादेवनिकेतनमिति॥ मौनी त्यक्तजनसंभाषाणिंधः पे
॥ संहारमुद्रालक्षणं यथा॥ ॥ अधोमुखे वामहस्ते ऊर्ध्वास्यं दक्षहस्तकं॥ क्षिप्त्वांगुलीरंगुलीभिः संयो
ज्य परिवर्तयेत्॥ प्रोक्ता संहारमुद्रेयं मर्पणे तु प्रशस्यत इति॥ तदुक्तं महाकपिलपंचरात्रे॥ उपविश्य
शुचौ देशे प्राणायामत्रयं क्रमात्॥ पश्चात्तत्तेन कृत्वा वै देहे कुर्यात्तमार्जनं॥ नासामाक्षिप्य तोयेन त
त्तेनाघमर्षणं॥ समस्तेन समुद्दिष्टमघपापहरं शुभं॥ उपस्थानं ततः कुर्यात्सिम्नात्तत्तेन मंत्रवित्॥
॥ स्वलोकोऽतिर्मयं विष्णुं मंडलस्थं महात्मकं॥ जपन्मन्यात्मकुर्वीत मूलमंत्रेण साधकः॥ गायत्र्या वाप
वैलव्या प्रणवाद्यंतकं द्वयं॥ उपविश्य शुचौ देशे ततस्तर्पणमाचरेत्॥ विष्णुवाद्यान्देवतास्तत्र पितृं
श्च मनुजान् ध्या॥ तर्पयेत्तमयत्नेन ततस्तीर्थं क्रमापयेत्॥ मूलमंत्रं जपन्वा गृह्यावत्प्राप्नोति वेश्महं॥ प्रक्षा
ल्य हस्तौ पादौ च प्रक्षाल्याचम्य यत्नतः॥ यागमंडपमासाद्य विशेत्कृत्वा प्रदक्षिणमिति॥ पुनराचम्य विम
स्य षडंगमपि पूर्ववत्॥ वामहस्ते जलं गृह्य गलितोदकबिंदुभिः॥ सप्तधा प्रोक्षणं कृत्वा मूर्ध्नि मंत्रसमु
च्चरन्॥ अवशिष्टोदकं दक्षहस्ते संगृह्य बुद्धिमान्॥ इडयाकृष्य देहांतः क्षालितैः पापसंचयैः॥ कृ
ष्णवर्णं तदुदकं दक्षनासाविरेचितं॥ दक्षे हस्ते यतन्मंत्री पापरूपं विचिंत्य च॥ पुरतो वज्रपाषाणे प्र
क्षिपेदस्त्रमंत्रतः॥ शिरोभागे स्थितो विपत्रिगंधया रिणाचांजलित्रयं॥ अष्टोत्तरशतं हंसगायत्री प्रजपे
त्सुधीः॥ रविमंडलगं देवं प्राणिपत्य क्षमापयेत्॥ संहारमुद्रयानीय मुद्रास्याचम्य सागमुतः॥ एवं संध्या
समाप्याथ न्यासकर्मसमारभेदिति॥ शेषाणमेव॥ ततः शिवानन्दकेतमंतेः कृत्वा तीर्थं त्रिवारात्मकं॥
मार्जनं सहितानामं त्रेस्तत्तोयेन समाचरेत्॥ वामपाणिपतत्तोयं योजनं सव्यपाणिना॥ उत्तमांगे कृत्वा

अंगुष्ठेन जलं संस्पृशेत्॥ ना ख्याते नपुंसमासमंदं कपाणि पुटे स्थितं॥ ब्रह्म रूपसिनं तोयं वामयाअन्यक्षमेषे
नृ॥ नस्पापक क दा सं पिंगलयास्वरि छिना॥ किंपेदक्षाशिलायां यक्षुवे दग्धमर्षणं॥ स्वाहांतशिव
मं त्रेण कुशपुष्पाक्षता द्विभिः॥ शिवायार्थं जलिं दत्वा गायत्रीया॥ कितीज पेत्॥ समाचम्य विधानेन अं
जलेनार्घमुद्धरेत्॥ रसगुच्छादिनो येनमूलमंत्रेण मानवेश्वरः॥ वायवीयसंहितायामपि॥ आचरेद्
स्नयज्ञांतं स्नात्वा देवादितर्पणं॥ मंडलस्थं महादेवं ध्यात्वाभ्यर्च्य यथाविधि॥ दद्यादर्घं ततस्तस्मै शि
वायादित्यरूपिणे इति॥ शिवसंहितायां॥ ओमव्याप्तिये मंत्राः पंच ब्रह्माणि यानि च॥ ये मंत्राः
शिवगायत्री रुद्रश्चेति यथाक्रमं॥ सर्वपापापहा प्रोक्ता चिंत्याः शिवसंहितेति॥ आमीम माघतो व्यो
म व्यापी नेच प्रकीर्तयेत्॥ प्रणवाद्यंतरुद्रोयं ओमव्यापि प्रकीर्तित इति॥ अयं सामान्यविधिः॥ मंत्रविधौ
पेत्राचमना है मंत्रविशेषास्तत्तत्कल्पोक्ता अनुसंधेयाः॥ इयं च संध्या त्रिकालं कार्या॥ यदगस्तिसंहिता
यां॥ रामाख्यानं गुरुं ध्यात्वा रामसंध्यामथाचरेत्॥ सायं प्रातस्तथा मध्याह्न इति॥ श्रीविष्णुरागमेपि
॥ प्रातर्मध्याह्नसायाह्ने संध्याकर्यं मंत्रविदिति॥ तत्रयागमंडपवासदेवे॥ महाकपिलपंचरा
त्रे॥ तथोक्ते॥ विधिनेति स्मृत्युक्तविधिना वैष्णवादिविधिना च॥ यदाह॥ प्राग्वक्रो वोदङ्मुख स्तूप
वीती बद्धचूडांज्ञानुमध्ये बाहुः॥ तोयं चेत्तूपविष्टो यमीनी स्पादप्रकृष्टे कधीरा च मिष्यन्॥ अदुष्ट
रसगंधाद्यैरकीटाद्यैर्न बुद्बुदैः॥ अनुष्णैरबुभिः स्पृष्टैरान्च मेद्यपिबाद्भिः॥ रुक्ष्णास्पगताः पुनंति विप्रा
धानापो हि जादिन्क्रमात्॥ त्रिः पिता त्वृषलस्त्रियाव पि सकृत्॥ कंडादिलोमादिकान्॥ आचम्य त्रिरप
स्त्रिवेदपुरुषाः प्रीणंति निर्माष्टि यत्॥ द्विसाथर्व षडंगयज्ञपुरुषाः प्रीता स्युरंगुष्ठतः॥ प्रीणात्सर्वम
ना॥ मिकान यनौ योः स्पर्शात्त्रिधा गुष्ठयुक्सांगुष्ठात्व घनर्जनीसमम्मिता घ्राणद्वयेमारुतं॥ अंगुष्ठेन क

निष्ठिकाश्रवणयोः शाभ्यनाभे र्वसुनात्मानं हृदं सयोगिरिमपिन्मूर्ध्नि समस्तांगुलिरिति॥ यद्वा वैष्णवा
चमनं यथा॥ केशवाद्यैस्त्रिभिः पीत्वा द्वाभ्यां प्रक्षालयेत्करौ॥ द्वाभ्यामोष्ठौ च संमृज्य द्वाभ्यामन्यान्मुखं तथा॥ एके
न हस्तं प्रक्षाल्य पादावपि तथैकतः॥ संप्रोक्ष्य केन मूर्धानं ततः संकर्षणादिभिः॥ आस्यनासाक्षिदंताश्च नाभ्यु
रःकंधुजौ स्पर्शयेत्॥ एवमाचमनं कृत्वा साक्षान्नारायणो भवेत्॥ केशवाद्याः पुरा प्रोक्ताः वक्षे संकर्षणादिकान्॥ सं
कर्षणो वासुदेवः प्रद्युम्नश्चानिरुद्धकः॥ पुरुषोत्तमाद्धोक्षज नृसिंहाच्युतस्तथा॥ जनार्दनोपेंद्र हरिवि
ष्णवो द्वादशैव ते॥ इति॥ शाक्तमाचमनं पिंगलामते॥ आत्मविद्याशिवैः प्रणवाद्यैः स्वधांतैर्मेः॥ मंत्रैस्त्रेधा
त तो वक्त्रं नासाक्षि श्रोत्रनाभिन्हृत्मस्तकांसान्स्पृशेत्॥ कुकक्रुदाश्चाभिवंदनं॥ आत्मविद्या शिवस्तत्वे प्रण
वो वाप्यवमतमिति॥ शैवागमे तु॥ संवीतस्त्रिः पिबेदंबु ब्रह्मतीर्थेन शांबरैः॥ स्वधांतैरात्मतत्वाद्यैरात्मविद्याशि
वात्मकैः॥ क्रमात्तत्वत्रयाविद्यातत्हांही हूं शांबराक्रमादिति॥ सामान्यार्घं विधायचेति बहिरेव॥ सामान्यार्घस्तु
क्तौ मंत्रमुक्ताव त्वाः॥ पात्रमस्त्रेण संशोध्य तन्मंत्रेणाभिपूरयेत्॥ तीर्थमावाह्य गंधाद्यैर्निक्षिपेत्प्रणवेन तु॥ धे
नुमुद्रां दर्शयित्वा सामान्यार्घं इदामृतमिति॥ अत्र प्रणवस्थाने यथायथं पंचप्रणवा नामपि ग्रहणं ज्ञेयं॥ नम
कारः॥ साधारपात्रं द्वाशनिमुखं संस्थाप्य॥ उं नमः द्वाराभिर्च्यामि इति कृत्वा श्रीकोकमतुसंधेयः॥ द्वारमि
ति॥ अत्र मंत्रमुक्तार्यमामान्यार्घजलेन द्वारं प्रोक्षयेत्॥ सामान्यास्तु द्वारे वक्ष्यति॥ अत्र त्वन्नत्रिशेपि आद्या
दिपूजकन देयमन्नास्यातिअभिचाय कदिति सामान्यार्घं योजयेदेवं सर्वागमंत्रेषु॥ केचन फट्कारांताः केवलना
निरेवाहुः॥ ॥ द्वारदेवतामाह॥ ॥ उं द्युति॥ द्वारस्यास्वोपरितनतिर्यक्काष्ठं स्यादुंबरकं देहल्या मुडुंबरमाहो
निधाय प्रवर्तनं॥ साप्युर्ध्वस्थित देहली चेति साम्प्रात्रजदयोडुंबरशाष्ठप्रयोगः॥ तत्र मध्ये महालक्ष्मीमिति
द्वारश्रिये पुष्पं यादिनिः अर्घजलपुष्पैः प्रदर्जयेत्॥ न दुक्तं द्वारश्रियं च क्षति॥ अन्यत्रापि॥ द्वारोपरि तनमो

शा०टी० द्वारश्रियै नमः इति पार्श्वयोः॥ विघ्नं सरस्वतीं चेति॥ ततऊर्ध्वस्थकोणद्वये दक्षिणादि विघ्नं सरस्वतीं प्रपूजयेत् २०४
॥ दक्षिणाद्या शाखा मिलित्वा दक्षिणशाखाधः॥ अत्र केचन दुर्गापूजामाहुः॥ अस्यैव नमस्तिवामुशाखयोः॥ दक्षिणादि
त्रिषु वर्धः॥ तदुक्तं॥ अधो पश्चिमे दुर्गां च वाणीं क्षेत्रे शाम च यि दिति॥ तयोरिति विघ्नसरस्वत्योः शाखयोः पार्श्व
गतगंगायमुने इत्यनेन सर्वद्वारादिषु आसक्तिता सेव क्रमादिषु नेतायेउक्त॥ वास्तिसामान्यार्घजलं॥ तार
सबिंदु नामा द्युलक्ष्यादिः तस्य नामनमोन्तिता एतेषां मंत्राः॥ ओं ह्रां द्वारश्रियै नमः इत्यादि प्रयोगः॥ तदुक्तं डा
मरे॥ ॐकारबिंदुमध्यस्थ नामधेयाद्यमक्षरं॥ देवतानां च बीजं तत्पूजायां समुद्दिष्टमिति॥ ग्रंथकृद
बीजं पि व्रतानि॥ स्वनामाद्यक्षरादिका इति॥ एतच्च यत्नेनोक्तं तद्विषयं ज्ञेयं॥ देहस्थामिति॥ ओं रुः अस्त्राय फ
ट् नमः इत्यस्त्रपूजाप्रयवारिनिरिक्षेत्॥ तदुक्तं॥ हकारं रेफौ च विसर्गविंता वस्त्राय फट् द्वारवर्चसदंतु॥
उत्कांतरे स वपमस्तता द्वापुष्पाणि मुंचेदयवा विघ्नानिति॥ अत्रमेव वास्तुपूजामंत्रेष्वंतिति॥ तदुक्तं॥ पूज्यो
वास्तुपुमांस्तत्र तत्रखा पीठमध्यत इति॥ एषां ध्यानं तत्प्रकारेणैव ज्ञेयं॥ अत एव तत्र महालक्ष्मीपद्मप्रयोगः
॥ इति द्वारमिथुनेनैतदुक्तं भवति॥ ग्रंथकृत॥ द्वारस्य शोभनस्यायशाखयोरिड्ढवासयोः॥ धात्रे विधात्रे गंगाये
यमुनायै च पूर्वतः॥ ओं भद्राय सुभद्राय गोदावर्यां च दक्षिणे॥ चंडाय च प्रचंडाय रेवातापीं च पश्चिमे॥ ओं शंखा
पद्मनिधये वाणीं वेण्यां तपोत्तरे इति॥ सोमशंभुरपि॥ स्वनाम शिरपूर्वं तैस्त्र पं तनाद्यं चयमिति॥ अस्य
त्रंत्रं॥ नंदं सुनंदं गंगां च यमुनां द्वारशाखयोः॥ चतुर्थ्यंतनमोंतं च प्राग्द्वारे संप्रपूजयेत्॥ बलप्रबलं चित्र
क्रिमायाश्रा॥ क्रिसपेवक्च॥ चतुर्थ्यंतनमोंतं च दक्षिणद्वारि पूजयेत्॥ चंडं प्रचंडं गौरीं च श्रियं च द्वारिशा
खयोः॥ चतुर्थ्यंतं नमोंतं च पश्चिमे संप्रपूजयेत्॥ जयं च विजयं चैव शंखपद्मनिधिं तथा॥ चतुर्थ्यंतं न ६
मोंतं चतुत्तरे संप्रपूजयेत्॥ इति केचित्तु द्वारमाणद्वारपालपूजामपि नित्ये आहुः॥ एतत्सर्वं नित्यपूजायाम

पि समानं ज्ञेयं॥ ग्रंथकृत॥ विधेयमेतत्सर्वत्र स्थापितेषु विशेषत इति॥ द्वारच्छायां विशेषस्तंत्रांतरोक्तः॥
वैष्णवादिषु धने देन द्वारपालान्समर्चयेत्॥ प्रतिद्वारं पार्श्वयोस्तु द्वौ द्वौ विप्रा वितिक्रमात्॥ नंदः सुनंदश्चंडा
ख्यः प्रबलो बलनामकः॥ प्रचंडो गन्धनामा च सुभद्रो वेत्रवामनाः॥ अथ नंदि महाकालौ गणेशवृषभौ पु
नः॥ ततो भृंगिरिटि स्कंदः पार्वतीशश्च सप्तमः॥ चंडेश्वरो ष्टमः शैवा द्वारपालाः क्रमादमी॥ वक्रतुंडैकदं
ष्ट्रौ महोदरगजाननौ॥ लंबोदरश्च विकटो विघ्नराजश्च सप्तमः॥ धूम्रराजो ष्टमो ज्ञेयो गाणपत्यादि
तिक्रमात्॥ ब्राह्म्याद्या मातरः प्रोक्ताः शाक्ते या द्वारपालका इति॥ अस्मिन्गोपालशास्त्रे द्वारपालान्याह॥
चंडप्रचंडौ प्राक् धातृविधातारौ च दक्षिणे॥ जयश्च विजयः पश्चात् बलप्रबलउत्तरे इति॥ अयं चानंतरमित्यने
नस्त्रचित॥ देशिकेंद्र इत्यनेन सदाशिवमात्मानं विचिंतयेदुक्तं॥ सदाशिवरूपदृष्ट्यावलोकनेनैव दिव्यदृ
ष्ट्यवलोकनं॥ अद्भिरिति सामान्यार्घजलैः पार्ष्णिघातेरिति॥ तत्रायं मंत्रः॥ अपसर्पंतु ये भूता ये भूता भू
मिसंस्थिताः॥ ये भूता विघ्नकर्तारस्ते नश्यंतु शिवाज्ञया॥ अपक्रामंतु भूतानि पिशाचाः सर्वतो दिशं॥
सर्वेषामविरोधेन ब्रह्मकर्म समारभे इति॥ वासिष्ठसंहितायामपसर्पंत्वित्यादि पठितोक्तं॥ पार्ष्णिघा
तत्रयं कृत्वा मंत्रेणानेन मंत्रवित्॥ भूतसंघानमुत्सार्य संविशेदासनं बुध इति॥ सोमशंभुरपि॥ दत्त
पार्ष्णित्रिनिर्घातैर्विघ्नानिति॥ इत्येवं प्रकारेण विघ्नोत्सारविधानमपि॥ अंगमिति॥ वामांगसंको
चयन्निति निःसारद्विघ्नावकाशदानाय॥ तदुक्तं॥ उत्सारितानां विघ्नानां दद्यात् स्थानं तु वामतः इति॥ अन्य
त्रापि॥ निर्गच्छतां विघ्नकृतां मार्गं चैषां वामांगसंकोचनं चेष्टितेन॥ प्रदायमार्गमिति॥ तथा अन्यत्रापि॥ वा
मतः निसार्य विघ्नसंघं चेति॥ अनस्त्रशस्त्रमादित्रयं दृष्ट्वार्थं देहल्यामपि देवस्य सज्जनताम्॥ वास्तो
ष्पतिमिति॥ नत्वा क्षेत्रपालमस्य क्षेत्रपालं॥ ते च मयाक्षेत्रपालमंत्रे वक्ष्यंते॥ दिगंबरं शांतादि कृत्वा चैनोनेमि

तत्प्रज्वाल्य समपि समानं ॥ पंचगव्येति ॥ पंचगव्यप्रकारमेकदिंशो वक्ष्यति ॥ अर्घनीयसामान्यार्घजलं प्रोक्ष
येदिति देयमंत्रेण ॥ तदुक्तं नारायणीये ॥ गव्येन प्रोक्षयेद्दीक्षास्थानमंत्रेण शोधितमिति ॥ चक्षुः पवित्रा
मिति पूर्वेण संबध्यते ॥ ततो मंडपाद्बहिरास्तंभतोरणं स्तंभहस्तमात्रावदारभ्य अस्त्रप्रयत्नाद्वाच्या
वीक्षणादिभिश्च शुद्धिभिस्तत्कृतिमंडपशुद्धिं कुर्यात् ॥ अत्रापि च अस्त्रप्रयोगमित्यस्त्रेति ॥ वीक्षणादानेवाह
॥ वीक्षणमिति मूलमंत्रेणेति देयमंत्रेण शरेणेत्यस्त्रमंत्रेण नेत्रेवेत्यस्त्रेण वर्मणेति कवचमंत्रेण प्रोक्ष
णमुक्षणमस्त्ररूपमध्ये वक्र्यं नेचसामान्यार्घजलेनैव ॥ अंतरमिति मंडपमध्यसुधारिसृष्टिमेण संबध्यते ॥ अनेनच
सोमशंभुक्तो विशेषः सूचितः ॥ तत्रत्रिमंडपमध्ये ॥ शराणुं नेत्यस्त्रमंत्रेण अणुना होमंत्रपर्याय आगमशास्त्रे ॥ सिद्धा
र्थ गौरसर्षपाः ॥ भस्म गोमयभस्म ॥ सर्वविघ्नोपनाशनमिति ध्यानं ॥ अस्त्ररूपेणेति संबंधेनेति भस्मनेत्यनुसज्यते ॥
मार्जयेच्चेति चकारेण विकारानिममनुसज्यते ॥ तानि सूत्रेण संबध्यते ॥ सौमशंभौ तु विशेषः ॥ विकारान्त्रस्थूला
ज्ञाद्या सप्तशस्त्राभिमंत्रितान् ॥ अस्त्राबुप्रोक्षितानेतान्कवचेनावगुंठितान् ॥ नानाप्रहरणाकारान् विघ्नौघवि
निवारकान् ॥ दर्भाणां तालमानेन कृतां षड्विंशतादलैः ॥ समज्ज्वालिनीं वास्त्रेण मुष्टिबोधामिमुत्तममिति ॥ वि
किरणमात्मने देयमंत्रेण ॥ ईशास्येति सनालं पात्रं वर्द्धनीं तस्या आसनाय इत्यस्य दिग्विरेशान्यां तान्विकारान्त्र
कल्पयेदिति संबंधः ॥ पुण्याहमिति पुण्याहवाचनं एवमुक्तं ॥ एकमिति मंडलं एतावद्दीक्षायामेव ॥ विघ्नोदित्य
पविशेत् ॥ मद्वासनमिति अनुवेगायइति दृष्टा एवं उगेहे सति तत्रैवमनो यातिनद्धृष्ट्या दोमंत्री स्वेनैतदुक्तं
॥ अनंतासनायनमः ॥ विमलासनायनमः ॥ पद्मासनायनम इति जस्तांकुशानास्तने देवा आसनं संस्कृत ॥ आ
सनमंत्रस्य मेरुपृष्ठ ऋषिः सुतलछंदः कूर्मो देवता आसनोपवेशने विनियोगः ॥ ॐ पृथ्वि त्वया धृता लोका देवि
त्वं विष्णुना धृता ॥ त्वं च धारय मां देवि पवित्रं चासनं कुरु ॥ इति ॥ आसनमंत्रेणोपादिशेदिति ॥ तदुक्तं ॥ तदासनस्था ८

विघ्नशांतिकर्मच्छिद्रस्तथा स्याच्छुतलं सुधाराः ॥ प्रोक्ताश्च दृष्टिः किल देवतास्यजपादिकर्मण्युपयोग उक्त इति ॥ तत्रा
सनानि तत्रांतरोक्तानि ॥ कौशेयं वाथ चैलं वा चार्म तौलमथापि वा ॥ वेत्रजं तालपत्रं वा काष्ठं बलं दर्भमासनं ॥ वंशा
श्म दारु धरणी तृणपल्लवनिर्मितं ॥ वर्जयेदासनं मंत्री दारिद्र्यव्याधिदुःखदं ॥ धर्मार्थकाममोक्षाप्तिश्चैलाजिन
कुशोत्तर इति ॥ दार्वासने ऽप्यत्र विघ्नो पोक्तः ॥ यतो नामासनं स्वस्त्यं कर्मकारं तु कारयेत् ॥ अनेपांडु चतुःपादं
चतुरस्रं तु कारयेत् ॥ गोशाल्मल्याम्रमयं निंबं तथापालाशपिप्पलं ॥ लोहविद्धं सदैवार्कवर्जयेदासनं बुधः ॥ स्नानमा
चमनं होमं भोजनं देवतार्चनं ॥ प्रौढपादो न कुर्वीत स्वाध्यायं चैव तर्पणं ॥ आसनारूढपादस्तु जानुनोर्वाथ जंघ
योः ॥ कृतावसक्थिको यस्तु प्रौढपादः स उच्यत इति ॥ बद्धपद्मासन इति ॥ पद्मासनमेव सेवनादिति ॥ अंगुष्ठौ च निब
ध्नीयाद्धस्ताभ्यां मिथ्यतो योगरतोपयुक्तः ॥ सोऽत्र नास्ति ॥ तंत्रांतरे पद्मासनस्य लक्षणस्मरणात्प्रोक्तत्वात् ॥
सव्यं पादमुपादाय दक्षिणोपरि विन्यसेत् ॥ तथैव दक्षिणं सव्यस्योपरिष्टान्निधापयेत् ॥ विष्टंभकद्वयोः पार्ष्णी
वा नासाग्रन्यस्तलोचनं ॥ पद्मासनं भवेदेतत्सर्वेषामपि पूजितमिति ॥ पद्मासनस्तूपलक्षणं ॥ यस्तु कुंभ पद्म
स्वस्तिकवीरादिष्वेकासनमास्थितः ॥ जपार्चनादिकं कुर्यादन्यथा निष्फलं भवेदिति ॥ मौनी स्वनेनराग प्राप्त सं
भाषानिषेधस्तदुक्तं ॥ सत्येरपि न भाषेत जपहोमार्चनादिषु ॥ इति ॥ समाहितः सावधानश्चासौ जितेंद्रियश्चे
ति विग्रहो पराणसमासः ॥ द्रव्याणि पुष्पादीनि ॥ दैशिक इत्युत्तरेण संबध्यते ॥ अनेनार्घपाद्याचमनमधु
पर्काचमनपात्राण्यपि विशेषणं ॥ दर्पणं स्थापयेदित्याहि स्नानीयं ॥ विघ्नोदित्यादि एतदंतं निसृज्यायामपि स्म
मानं ॥ मंगलानि मंगलरूपाणि यानि अंकुरपात्राणि उक्तानि सौवर्णबीजानि तानि दिक्षु स्थापयेद्देशिकर
त्नेनैतदुक्तं ॥ तत्क्रमेणाह वदिदि दिशिरं वंशि यदृक्तेति ॥ तेषामित्यमेव प्रतिपत्तिकर्म ॥ इदं दीक्षायामेव ॥
कृतांजलिपुरोभ्यस्त्वा वामदक्षिणपार्श्वयोः गुरुगणेशौ नमेदिति संबंधः ॥ तत्र प्रयोगः ॥ ॐ गुरुभ्यो नमः

मः॥ गं गणपतये नमः॥ तदुक्तमाचार्यैः॥ पूर्वाद्यास्तारादिकार्ये गमंत्रालोकेशांतास्तेचतुर्थ्यंतनमोंताः॥ इत्याद्यां
सुर्वह्निकार्ये द्विगोना इति॥ अत्र वह्निकार्ये द्विगोना इत्युक्तेर्वक्ष्यमाणाग्निजिह्वादिनाम पिमंत्रह॥ तदनंतरं लोकेशमं
त्रैर्होमविधानात्॥ गुरुः तितिक्षुः सा गुरुरूपरमस्तत्परमेष्ठिगुरवोऽत्रस्यंते॥ यदाहुः॥ नतत्त्वादितत्त्वादस्मनमोगु
रुपरं परामिति॥ ततइमां स्तुवंपठेत्॥ नमोमहद्भ्यो नमोऽर्भकेभ्यो नमो युवभ्यो नमः आशिनेभ्यः॥ यज्ञामदेवान्
दिवाकममात्यायमत्रांसमाहृक्तिदेवाइति॥ अत्र करस्तु धादिषु त्रिषु अस्त्रमंत्रेणेति संबध्यते॥ तत्र करशुद्धिं
वामांगुष्ठादिष्वंगुलीषु तयकरांतः उभयकरबाह्ययोः उभयकरपार्श्वद्वयेऽस्त्रमंत्रस्य व्यापकत्वेन न्यासः॥
आपन्माचोहस्तयोर्मंत्रमंतर्बाह्ये पार्श्वेति॥ दिग्बंधमिति नाराचमुष्ट्युद्धृततर्जन्यादशदिक्षु अस्त्रमंत्रन्यासः॥
तदुक्तं योगसारे॥ आछाद्यदिक्षु तर्जन्या लेपाअस्त्रवलिताग्रयेति॥ अन्यत्रापि॥ अंगुष्ठमध्यं यदि मध्यमाग्रस्य
श्रेष्ठस्युरन्यांगुलयस्त्वलग्नाः॥ तदा नवेकृत निष्टुदनस्य नाराचना मोत्र परस्य मुद्रेति॥ अन्यत्र मंत्रविशेषः॥ प्रण
वहृद्दोरवसाने सचतुर्थीसुदर्शनितं चास्त्रपदंच॥ उक्त्वा फडंतमनुना कलयेत्स्वदशाहरितइति॥ देशिकस्त्व
नेन सुदर्शनमंत्रेवक्ष्यमाणाग्निप्रकारमंत्रेणापि अग्निप्राकारं कुर्यादितिसूचितं॥ अग्निप्राकारमुद्रो
क्ता प्रयोगसारे॥ त्रिमूलाग्रो करौ कृत्वा यस्तस्तावनितो नयेत्॥ अस्त्रमुद्रेयमाख्याता वह्निप्राकारलक्षणा
॥ परकृत्योपशमनी नागाशनी नयापदेति॥ तदुक्तं॥ ततोऽस्त्रमंत्रेण विशोध्यपाणी त्रितालदिग्बंधकृतात्मशा
शालामिति॥ एषां फलमाह॥ तेनेति॥ सुषुम्नेति॥ समाहितस्सुषुम्नावर्त्मना कुंडलिन्या आत्मानं योगयु
क्तेन विधिना चिन्मंत्रेण परमात्मनि योजयेदिति संबंधः॥ तत्रात्मानं जीवात्मानं॥ हृदयकमलस्थितमित्य
र्थः॥ यदाहुः॥ हृदंबुजे ब्रह्मकंदसंभृते ज्ञाननालके॥ आराग्रमात्रो जीवस्तु चिंतनीयो मनीषिभिरिति॥ यो ८
गयुक्तेन विधिनेत्यस्यायमर्थः॥ गुरूपदिष्टमार्गेण हुंकारेण कुंडलिनीमुत्थाप्य तां हृदयकमलमागतां वि

नाथ्य॥ ततो जीवं मुखे गृहीत्वा सहस्रारगतां विनयेत्॥ अतएव समाहितइत्युक्तिः॥ चिन्मंत्रेण वक्ष्यमाणात्म
मंत्रेण॥ यदाहुः॥ नेत सोऽहंसमंत्रेणद्वादशांते शिवःपरइति॥ अन्यत्रापि॥ जीवं ब्रह्मणि संनाश्य स्वनिलयत्
यतहंसेनेति॥ अन्यत्रापि॥ संयोज्य जीवमथ दुर्गमम ध्यनाडीमार्गेण पुष्करनिविष्टशिवेन सुस्सन्धे॥ हंसेनेति॥
परमात्मनि सहस्रारकर्णिकागतइत्यर्थः॥ कारणइति॥ सर्वभूतानां कारणे परमात्मनि बीजभावेन मुक्त्
माद्यीनानितत्वानि पृथिव्यादिनि चिंतयेदित्यन्वयः॥ तत्रस्वरूपेण स्था युत्क्रमः॥ सर्वत्र कार्यस्य कार
णेलयोदृष्टं अतएवप्रथमपटलेस्त्प्युक्ति विनासृष्टिं कार्यकारणभावात्॥ अतएव सर्वभूतानां का
रणइति विशेषणोक्तिः॥ अपिशब्दाद्वर्णानपि॥ यदुक्तं॥ संकल्प्यैवं ततो न्यासस्थानान्वर्णान्संहरेत्॥ प्र
तिलोमेन हल्लयोर्लकारस्य कोद्रेके॥ हलयश्चसकारे षसलयश्च षकारके॥ क्रमेणैवमपर्यंतंल
यमुत्पाद्य यत्नतः॥ अकारं बिंदुरेफे च सहस्रारे नियोजयेदिति॥ चकारः पूर्वसमुच्चये॥ ततइति॥
वायुबीजेनयकारेण वायुना तदुत्थेनेत्यर्थः॥ अनेन पूरकउक्तः॥ वह्निबीजेन रेफेण॥ तेनैवेत्यग्निबी
जोत्थाग्निना॥ सकलांसकल्मषरूपपापपुरुषसहितांतनुंनिर्दहेत्॥ ॥पापपुरुषध्यानं यथा॥ ॥
ब्रह्महत्याशिरस्कं च स्वर्णस्तेयभुजद्वयं॥ सुरापानहृदायुक्तं गुरुतल्पकटिद्वयं॥ तत्संयोगिपदद्वंद्वम
गप्रत्यंगपातकं॥ उपपातकरोमाणं रक्तश्मश्रुविलोचनं॥ खड्गचर्मधरं पापमंगुष्ठपरिमाणकं॥ अधो
मुखं कृष्णवर्णं दहतु ... ॥ अनेन कुंभक उक्तः॥ तदा ... दोषात्रोषरूपपापपुरुष
भस्मविक्षेपयेदिति रेचक उक्तः॥ अत्र भस्मविशेषोऽपि वायुबीजेनेति ज्ञेयं॥ यदाहुराचार्याः॥ पूर्ववि
धिनामुंचेदिति॥ नागानन्द्योपि॥ भास्वास्त्वदिनाप्य मरुता पवनच नीमत ... राशिमिति॥ गणेश्वरविमर्शि
न्यामपि॥ तद्भस्मकदमवितं वायुबीजोत्थवायुना क्षिपेयेति॥ अन्यत्रापि॥ तदुद्धदस्तुवपुरनलप्लुष्ट

देहो मिलेन तद्भस्मोक्तिमिति॥ अत्र स्थानत्रये षोडशचतुःषष्टिद्वात्रिंशत्संख्याक्रमेणेति केचित्॥ अन्ये तु
दशपंचाशत्पंचविंशतिसंख्येत्याहुः॥ तदुक्तं संहितायां॥ मूलहृदग्निमुखावधौ पंचाशन्मात्रमात्रकमिति॥
आचार्यास्तु॥ अथवा शोषणदहनप्लावनभेदेन शोधिते देहे पंचाशद्भिर्मात्राभेदैर्विधिवत्समापयेत्प्राणा
न्॥ पंचाशदात्मकोपि च कलाभेदेन तार उद्दिष्टः॥ तावन्मात्रायमानात्कलाश्च निष्टतान वर्तिनित्वविदे
ति॥ केचित्तु स्थानत्रयेपि प्रत्येकं त्रिविधं प्राणायाममिच्छंति॥ अथ तेनामृतबीजेन चमितप्लुतेन॥ अमृतेनाप्ला
वितुकेनामृतेन आपादतलमस्तकं देहमाप्लावयेदिति संबंधः॥ स्वस्थानमिति सृष्टिक्रमेण प्रथम
पटलीकृतान देसनेन अकारादिक्षांतान्वर्णान् अपि सृष्टिक्रमेण स्वस्थानं प्रापयेदिति उक्तं॥ तदुक्तं
॥ अमृतैः सकलार्णमयीं जपरजयाभिपातय वपुरेव तया सकलं वपुरमृतो वपुः पुष्टिमिति॥ इत्यारब—
वपुरवर्णशतादिकेनेति॥ परमात्मनः सकाशाद्देहस्य मनुना आत्मानं हृदयांभोजमानयेदिति संबं
धः॥ हंसस्य बीजस्य देवः परमात्मा उपास्यत्वात्तेन मंत्रेण सोहमित्यनेन॥ यद्वा परमात्मनः मनुना इत्तिसं
बध्यते॥ एवं परमात्मनि योजयेदित्युक्तं॥ ततः स्यात्प्रत्यक्ष्यते॥ हंसदेवस्येत्यग्रिमेण सह संबध्यते॥ तदु
क्तं वसिष्ठसंहितायां॥ सोहं मंत्रेण तामाद्यां नादांते शिवभाविनीं॥ ध्यात्वेवं ब्रह्मरंध्राच्च हृदि जीवकला
म्यसेदिति॥ गौतमेश्वर विमर्शिन्यामपि॥ सोहं धियात्मचैतन्यं समानीय चिदंबरादिति॥ तत्र गुरूपदेशतः
प्रकारो लिख्यते॥ ॥ श्रीदेवपूजाद्यधिकारसिद्धये भूतशुद्ध्यादि करिष्य इति संकल्प्य मूलाधारात्कु
ण्डलिनीं विद्युत्सहस्रप्रभां आसुरां बिसतंतुरूपां सुषुम्णामार्गेण हृदयकमलगतां कुंडलिनीं विभाव्य
हृदयकमलाकोशं व्याप्य दीपकलिकाकारं गृहीत्वा आदर्शांतां ब्रह्मरंध्रे सहस्रदलगतां विभाव्य तत्र जीवात्मानं
हंसमंत्रेण परमात्मनि योजयेत्॥ ततः पादादिजानुपर्यंतं चतुरस्रं पीतं पृथिवीमंडलं तत्र पादगम ५

नक्रियागंधघ्राणपृथिवीब्रह्मनिवृत्तिसमान वायून् संस्मृत्य लं ब्रह्मणे पृथिव्यधिपतये निवृत्तिक
लात्मने हुं फट् स्वाहा इत्यमुं मंत्रमुच्चार्य तान् वह्निकुंडलिनीद्वारा अप्सु प्रविलापयामीत्यपां स्थाने संहरेत्
॥ जान्वादिनाभिपर्यंतं शुक्लं अर्धचंद्राकारं जलमंडलं तत्र हस्तादानदातव्यरसरसनाजलविष्णुप्रतिष्ठा
दानान्स्मृत्वा वं ह्रीं विष्णवे जलाधिपतये प्रतिष्ठाकलात्मने हुं फट् स्वाहा इत्यमुं मंत्रमुच्चार्य तान् वह्निकुं
डलिनीद्वारा अग्नौ प्रविलापयामि अग्निस्थाने संहरेत्॥ नाभ्यादिहृदयपर्यंतं रक्तं त्रिकोणं वह्निमंडलं
तत्र पायुविसर्गगमनरूपचक्षुस्तेजोरुद्रविद्यासमानान्संस्मृत्य रं रुद्राय तेजोधिपतये विद्याकला
त्मने हुं फट् स्वाहा इत्यमुं मंत्रमुच्चार्य तान् वह्निकुंडलिनीद्वारा वायौ प्रविलापयामीति वायुस्थाने संह
रेत्॥ ततो हृदयादिभ्रूमध्यपर्यंतं कृष्णं वर्तुलं षड्बिंदुलांछितं वायुमंडलं तत्रोपस्थानंदविषयस्पर्श
त्वग्व्याप्तीश्वरशांत्युदानान् संस्मृत्य यं ईशानाय वाय्वधिपतये शांतिकलात्मने हुं फट् स्वाहा इत्य
मुं मंत्रमुच्चार्य तान् वह्निकुंडलिनीद्वारा आकाशे प्रविलापयामीत्याकाशस्थाने संहरेत्॥ ततो भ्रूमध्या
दि ब्रह्मरंध्रपर्यंतं स्वच्छं वर्तुलमाकाशमंडलं तत्र वाग्वचनवक्तव्यशब्दश्रोत्राकाशसदाशिवशांत्यतीताप्राणान्सं
स्मृत्य हं सदाशिवाय आकाशाधिपतये शांत्यतीताकलात्मने हुं फट् स्वाहा इत्यमुं मंत्रमुच्चार्य तान् वह्निं अहंकारे प्र
विलाप्य तमहंकारं महत्तत्वे महत्तत्वं मायाकाशे ब्रह्मस्वरूपायां हृद्येवार्थमात्रायां ततो प्रविला
पयामीति प्रविलाप्य तां तथाविधां नित्यशुद्धबुद्धस्वभावे स्वप्रकाशे सत्यज्ञानानंदलक्षणे परब्रह्मणि प्रविलापयामी
ति प्रविलापयेत्॥ तदुक्तं मंत्रतंत्रप्रकाशे॥ गंधादिघ्राणसंयुक्तां पृथिवीमप्सु संहरेत्॥ रसादिजिह्वया सार्धं
अजमग्नौ विलापयेत्॥ रूपादिचक्षुषा सार्धमग्निं वायौ नयेत्वयं॥ समीरमंबरे बोध्य स्पर्शादित्वक्समीरितं
॥ अहंकारे हरेद्व्योम सशब्दं तं महत्यपि॥ महच्च सर्वशक्तीनामव्यक्तकारणे परे॥ सच्चिदानंदरूपं यद्देवं प

श्मंपदं॥ रश्मिआदिकमात्रसर्वतत्त्वलीनं विचिंतयेदिति॥ ॥शरीरस्यांतर्यामि ऋषिः सत्यं देवता प्रकृतिः पुरुषश्छं-
दः पापपुरुषस्य शोषणे विनियोग इत्युक्त्वा दक्षकुक्षिस्थं कृष्णवर्णं पापपुरुषं विचिंतयेत्॥ यमिति वायुबीजस्य कि-
ष्किंधऋषिः वायुर्देवता जगती छंदः सशरीरपापपुरुषशोषणे विनियोग इत्युक्त्वा नाभिमध्ये च षट्कोणलांछि-
तं यं विचिंतयेत्॥ तद्वायुबीजं धूम्रवर्णं चलद्ध्वजसंयुतं॥ यं धूम्राष्टपुतं सर्वशोषणं तच्च दैवतमिति ध्यात्वा पूरक-
प्रयोगेण षोडशवारं द्वादशवारं वा बीजमावर्त्य तद्बीजोत्थवायुना सशरीरपापपुरुषं शोषितं विभावयेत्॥ ततो
रमित्यग्निबीजस्य कश्यपऋषिरग्निर्देवता त्रिष्टुप्छंदः तद्दाहे विनियोग इत्युक्त्वा चिंतयेत् हृदये रक्तं त्रिकोणं वह्निमं-
डलं विप्राकलायुतं रुद्रदैवतं च रमिति तमिति ध्यात्वा कुंभकप्रयोगेण चतुःषष्टिवारं पंचाशद्वारं बीजमावर्तये-
त्॥ तद्बीजोत्थाग्निना तद्भस्मीभूतं विभावयेत्॥ ततो रेचकेन द्वात्रिंशन्मात्रया पंचविंशतिमात्रया पूर्वोक्तरूपं वा-
युबीजमावर्त्य पापपुरुषभस्म रेचयेत्॥ ततो वमिति वरुणबीजस्य हिरण्यगर्भऋषिर्हंसो देवता त्रिष्टुप्छंदः
प्लावने विनियोग इत्युक्त्वा वारुणं मंडलं मूर्ध्नि अर्धचंद्राकारं सन्निभं सितं पंकजयुग्मांकं वं स्याद्वरुणदैवतमिति
ध्यात्वा तद्बीजसुधामृतेन तच्छरीरभस्म पिंडीभूतं विभावयेत्॥ ततो लमिति पृथिवीबीजस्य ब्रह्माऋषिरिंद्रो देव-
ता गायत्री छंदः कठिनीकरणे विनियोग इत्युक्त्वा आधारमंडलेषु पृथ्वीमंडलं वज्रमौलांछितं चतुःकोणं च पीतक-
ठिनं पीतवर्णेंद्रदैवतं लंबीजेन समायुक्तं ध्यायेन्मनसि पूर्ववदिति॥ ध्यात्वा तद्बीजोत्थकाठिन्येन तत्तनुं दृढां विभाव-
येत्॥ ततो हमित्याकाशबीजस्य ब्रह्माऋषिराकाशो देवता पंक्तिश्छंदः व्यूहने विनियोग इत्युक्त्वा आकाशमंडलं वृत्तं
द्वादशांते हृदुज्ज्वलं॥ शांतं तारकलायुक्तं बिंसमाकाशदैवतमिति ध्यात्वा तदुत्थेनावकाशं विभावयेत्॥ तदुक्तं
॥सौमिति पृथ्वीबीजेन तं च संहतं नयेत्॥ हंसं उं मिति बीजेनावयवीकरणं भवेदिति॥ एवं स्वशरीरं विचिंत्य पर- १०
मात्मनः सकाशात् सृष्टिक्रमेण तत्त्वानि स्वस्वस्थानं प्रापयेत्॥ ततः परमात्मनः सकाशात् जीवं सोहं मंत्रेण हृत्सम-

मानयेदिति संक्षेपः॥ ॥इयं तत्त्वशुद्धिरावश्यकी॥ भूतशुद्धिविहीनेन कृता पूजाभिचारवत्॥ विपरीतफलं दद्या-
दभक्त्या चार्चनं यथा॥ निष्कृतिर्विधिहीनानां फलं हंति हि कर्मणां॥ निशाधराधिपत्यं च कुरुते शंकराज्ञया॥ शैवा-
गमतंत्रे॥ अन्यत्रापि॥ शरीराकारभूतानां भूतानां यद्विशोधनं॥ अव्ययब्रह्मसंपर्कात् भूतशुद्धिरियं मता॥ भू-
तशुद्धिं विना कर्म जपहोमार्चनादिकं॥ भवेत्तन्निःफलं सर्वं यथाकारेणाप्यनुष्ठितमिति॥ वक्ष्यमाणप्राणप्रतिष्ठा-
मंत्रेण एतदनंतरं स्वप्राणप्रतिष्ठावश्यं कर्तव्यं॥ संप्रदायानुरूपदेशाच्च॥ अत्र विशेषो वशिष्ठसंहितायां॥
हृदि हस्तं संनिधाय प्राणस्थापनमाचरेत्॥ ततो जन्मादिकं षट्क्रियासंस्कारसिद्धये॥ षोडशप्रणवावृत्तिः
कृत्वा शक्तिं परां स्मरेदिति॥ ॥अनंतरकर्तव्यमाह॥ ॥हंसदेवस्येति॥ ततो मूलमंत्रेण यथाविधि प्रा-
णायामत्रयं विधाय हंसदेवस्य न्यासादिकं कुर्यादिति संबंधः॥ तत्र यथाविधीत्यस्यायमर्थः॥ यदा अजपा-
न्यासस्तदा अजपया॥ यदा प्रणवन्यासः तदा प्रणवेन॥ यदा बहिर्मातृकान्यासः तदा मातृकया॥ एवं यदा
भुवनेश्वरीन्यासस्तदा तया॥ यदा मूलमंत्रन्यासस्तदा मूलमंत्रेणेति॥ तत्र मातृकाप्राणायामे विशेषः॥ य-
दाह॥ इडया पूरयेत् वायुं स्वरैः स्पर्शैः क्रमेण यत्॥ रेचयेद्यादिकैः पश्चात्ततः पिंगलया पुनः॥ तथैव पूरणं
वायोः कुंभनं रेचनं पुनः॥ इडया स्यात्ततो द्वाभ्यां पूरणादित्रयं पुनः॥ प्राणायामत्रयं कृत्वा पश्चाद्व्यापकमा-
चरेत्॥ अकाराद्यैः क्षकारांतैः पादतलमस्तकमिति॥ जप्यमाने मंत्रे मुख्येनैकेन बीजेन प्राणायामः का-
र्यः सर्वेण वा॥ तत्रैकेन चेत् कुंभके चतुःषष्ट्यावृत्तिः अष्टौ कुर्यात् द्वात्रिंशद्वारं रेचयेदिति त्रयं॥ यदाह॥ अष्टा-
विंशतिवारमिष्टफलदं मंत्रं दशांशं जपन्नायच्छेत् सवनं सुशांसितमतिस्त्वष्टादशावर्तनि चेत्॥ अन्यस्मात्र
विचारमन्यमनुभिर्वर्णानुरूपं जपन्कुर्याद्रेचकपूर्वकर्मनिपुणः प्राणप्रयोगं नरः इति॥ न्यासो यथा॥ अजपा-
ः आद्यं मूले॥ परं शिरसि॥ तथा दक्षवामयोः॥ तत्रायं प्रयोगः॥ हं पुरुषात्मने नमः॥ सः प्रकृत्यात्मने नमः॥

शा०टी० हंसः प्रकृतिपुरुषात्मनेनमः॥ इतिव्यापकं॥ तद्रूपेणांतिमच्छिकान्यासोपि॥ आदिक्षान्तान्पूर्वदिनजपनिवेद प०४
नेनाभिमतपर्यंकल्पयेत्॥ तएतदनंतरं हंसमंत्रोपन्नत्वात्प्राणवन्यासोपि॥ ॐ प्रं ब्रह्मणे ॐ नमः॥ ॐ श्रीं वि
ष्णवेनमः॥ इत्यादिमातृकास्थानेषुन्यसेत्॥ नामानि शुभ्रंत्यपटले प्रणवोत्पत्तौ मयावक्ष्यते॥ तत्क्रमश्च वह्नि
र्भवतीकलान्यासोपि सचिनः॥ तन्न्यासस्थानं यथा॥ मूलाधारे त्रिकोणेषु विन्यसेदग्निजाः कलाः॥ हृत्संक
जे दश सूर्यकलाद्वादशासवका॥ मद्भ्रि षोडशपत्राणां मध्ये सोमभवाः कलाः॥ नादजास्तत्वस्थाने विं
दुजाः पंच वक्त्रके॥ ऊर्ध्वदक्षिणसौम्येषु पश्चिमोर्ध्वमुखेषु च॥ ऋज्लांसेषु नाभौ च सोदरे पृष्ठवक्षयोः॥ उरोजं
घ्रौ न्यसेच्चापिकलामक्षिरसंभवा॥ पादे गुल्फे सोरुजानुजंघास्फिक्षु च कारजाः॥ पादहस्ततलघ्राणकेषु वाङ्
घ्रिपादयोः॥ न्यसेद्ककारजाः शुक्लकलाः पंच प्रविन्यसेत्॥ कासरुक्शुष्यपादेऽच्छितिउक्क वत्समाणानां सामान्यतः॥
ऋष्यादिन्यासमाह॥ ॥ऋषीति॥ अतएवमंत्रस्येति सामान्यग्रहणं॥ अत्र देवता या अपि प्राप्तत्वादात्मनस्फ
क्तिः॥ तेनाङ्गन्यासे अजपायाः॥ प्रणवन्यासे प्रणवस्य॥ बहिर्मातृकान्यासे मातृकायाः॥ भुवनेशीन्यासे तस्या
॥ मूलमंत्रन्यासेऽप्यमानस्यमंत्रस्येति॥ मंत्रवित्तयथाक्रमादिदृश्यनेनबीजशक्तिनामपिन्यासउक्तः॥ सद्दक्षि
णवामकोशयोरित्येके॥ गुह्यपादयोरित्यन्ये॥ स्तनयोरित्यपरे॥ ऋष्यादिन्यासस्यावश्यकतामाह॥ ऋषिं
हो देवतानां विन्यासेन विना यदा॥ जप्यते साधितोप्येषस्तत्स्वल्पं फलं नवेदिति॥ ॥ बहिर्मातृकान्यासमाह
॥ विदध्यादिति॥ मातृकान्यासं वक्ष्यमाणप्रपंचयागान्तमित्यर्थः॥ मंत्रन्यासं भुवनेशीन्यासं विदध्यादिति सं
बंधः॥ यदाहुः॥ प्रणवो मातृकादेवी हृल्लेखेत्यमृतत्रयं॥ दीपनं सर्वमंत्राणामित्याह भगवान्शिवः इति॥
वायवीयसंहितायां॥ हंसन्यासस्तत्र त्वादौ प्रणवन्यासएव च॥ तृतीयो मातृकान्यासो मूलन्यासस्ततः परं १२
॥ पंचमः कथ्यते सद्भिर्न्यासः पंचाक्षरात्मकः॥ एतेष्वेकमनेकं वा ऋष्यादिज्ञादिकन्यसेदिति॥ उक्तवक्ष्यमा

णानां करन्यासमाह॥ अनंतरमंगुष्ठेति॥ अनंतरमित्यनेन मूलमंत्रेण करशुद्धिः कर्तव्येत्युक्तं॥ अतएव ल
क्ष्मीपटले वक्ष्यति॥ हस्तौ संशोध्य मंत्रेणेति॥ तदुक्तं॥ आपस्याथो हस्तयोर्मंत्री मंत्रबलिपार्श्वेतारक्षु
धेनेति॥ अंगैस्तत्कल्पोक्तमंत्रैः॥ तत्रक्रमं मंत्रमुच्चार्य अंगुष्ठाभ्यां नमइत्यादि प्रयोगः॥ तदुक्तमाचार्यैः॥ अं
गुलीषु क्रमादंगैरंगुष्ठादिषु विन्यसेदिति॥ मज्जातिभिरित्यग्रिमेण संबध्यते॥ तत्तलयोरिति॥ तच्छब्देन
प्रकृतत्वादंगुलत्वउच्यते॥ ताभिः करोलस्यते॥ तलद्वयेनांतर्बाह्यमपितलंग्रह्यते॥ नेनास्त्रमंत्रमुच्चार्य
करतलपृष्ठाभ्यां नमइति प्रयोगः॥ तदुक्तं॥ अंगुष्ठाभ्यां नमो ह्रां ह्रीं तर्जनीभ्यां नमस्ततः॥ मध्यमाभ्यां नमो
ह्रूं ह्रैं अनामिकाभ्यां नमस्ततः॥ ह्रौं कनिष्ठिकाभ्यां च नमो ह्रः करतलपृष्ठायरिति॥ क्रियाज्ञानत्रयेति॥ अंगा
स्त्रविनियोगः॥ तत्स्वरूपमुक्तमन्यत्र॥ प्रसारितलाभ्यां तु तालत्रयमुदीरितमिति॥ तालत्रयादिकमि
त्यादिशब्दोऽंकं विशदयति॥ दिशइति॥ तेनैवेत्यस्त्रमंत्रेण॥ छोटिका नाराचमुद्रारूपा॥ अंगुष्ठतर्जन्यग्रा
भ्यां स्फोटोनाराचमुद्रकेतितल्लक्षणात्॥ समाहित इत्यग्रिमेण संबध्यते तत्रैव संबंधः॥ ततः समा
हितसुधीः॥ जातिभिः अंगमंत्रान्हृदादिषु च विन्यसेत् इति॥ चकारोंगुष्ठादिष्विति सर्वोक्तसमुच्चयार्थः
॥ तनरवितिवक्ष्यमाणतत्कल्पोक्तनन्तमंत्रतत्न्यासानंतरमित्यर्थः॥ यदाहुः॥ आदावृष्यादिविन्यास
दा :करशुद्धिस्ततः परं॥ अंगुलीव्यापकन्यासौ हृदादिन्यासएव च॥ तालत्रयं च दिग्बंधइति॥ अन्यत्रापि॥ क
रन्यासं पुराकृत्वा देहन्यासमतः परं॥ अंगन्यासं न्यसेत्पश्चाद्देशनाशमणोविधिरिति॥ आचार्योपि॥
षडंगन्यासोन्तमुक्तोऽज्ञ पारंभे मनुनां हि समान्येयं प्रकल्पनेति॥ समाहितसुधीरित्यनेन षडंगमुद्राः सूचि
ताः॥ तदुक्तमागमांतरे॥ प्रसारितलेनैव पाणिना हृदयं शिरः॥ शोकाः शिखा तथा स्पर्शगंधोंगुष्ठेन मुष्टि
ना॥ तथा विधाभ्यां पाणिभ्यां वर्मस्कंधादिना त्रिगं॥ तर्जनीमध्यमाभ्यां [illegible] नेत्रत्रये क्रमात्॥ यदा

नेत्रद्वयं प्रोक्तं तदा तर्जनीमध्यमे इति ॥ अत्र प्रसारितत्वं नेत्रस्य ... अंगुलीत्रयेणेत्यर्थः ॥ तदु
क्तं ॥ अंगुष्ठवर्जं मध्यमस्त्वतस्त्रो हृदि मूर्द्धनि ॥ शिखायां मुष्टिरेवस्यादंगुष्ठकृतनालिका ॥ सर्वांगुलय
स्त्वानाने: पाणिपोः कवचवंधन इति ॥ शाक्तिषडंगमुद्रास्तंत्रांतरे ॥ हृदयं मध्यमानामा तर्जनी निःसृत
ं शिरः ॥ मध्यमातर्जनी स्यात्स्यादंगुष्ठेन शिखास्मृता ॥ दशभिः कवचं प्रोक्तं तिसृभिर्नेत्रमीरितं ॥
प्रोक्तांगुलिभ्याम स्त्रं स्यादंगल्ह स्त्रिरियमनेति ॥ शैव षडंगमुद्राशिवागमे ॥ कृतमुष्टिपदोह स्तोल त्यांगुष्ठोहृदिन्य
सेत् ॥ हृन्मुद्रेयं समाख्याता शिरोमुद्रा प्रकीर्त्यते ॥ ललाटाय्येसमाधाय कृतमुष्टिपुटो करो ॥ कुर्यादूर्ध्वप्रसक्ता
तत्तर्जन्यौ च बाहनः ॥ करो शिखायां संयोज्य कृतमुष्टीपुटाकृती ॥ ज्येष्ठावधःप्रसक्तायो कनिष्ठादूर्ध्वतस्तथा
॥ कथितेयं शिखामुद्रा सर्वपिड्डनाशिनी ॥ कृत्वांगुष्टौ प्रसक्ताग्रौ तर्जन्यौ च भितको गवतू ॥ मूर्द्धि पस्थात्सुखंकृ
त्वा नयेदुभयपार्श्वतः ॥ करैरुद्दं तंमुद्रेयं कवचस्यानपप्रदा ॥ कृत्वा नेत्रोन्मुखं हस्तं सक्तांगुष्ठकनिष्ठकं ॥
प्रसार्यमध्यमा किंचित्रिमयेदितरांगुली ॥ नेत्रमुद्रेयमुद्दिष्टा स्तौ... तानि भंजनी ॥ परस्परतलद्वंद्वपुरासं
स्फोटयेदस्त्रमिति ॥ जातिभिः रितुक्तास्ताः काइत्यपेक्षयामाह ॥ हृदयायेति ॥ हृर्वं प्रथमो मंत्रः ॥ शिरसे एतद
नंतरं वह्निवल्लभा स्वाहेत्युच्यरेदित्यर्थः ॥ नेत्रत्रयेत्युपलक्षणं तेन द्विनेत्रे विष्ण्वादौ नेत्राभ्यां वौषडिति प्रयोग
॥ षडंगमेवान्यत्र लक्ष्योक्तानि षेवप्रकारेणोक्ता जातिमंत्राभ्यामिलिताषडंगेषु हृदयादिषु उक्तमुद्रा निविवो
हृदयेभ्यसेदित्यर्थः ॥ अंगेति ॥ अंगहीनत्वं नाम नारायणशाक्कराद्यिकत्वं भिन्नत्वेनांगमंत्राद्धाराभावः ॥ स्वि
नैवैस्याहृत्याछेदेनवा एतेनांगानामावश्यकत्वमुक्तं ॥ यदाहुः ॥ पूजाजपार्चनाहोमाः सिद्धमंत्राकृता अपि ॥
अंगविन्यासविधुरा नद्दास्यंति फलं सम्यगिति ॥ गौतमेन षडंगकरणे प्रयोजनमुक्तं ॥ ईप्सितोऽनोह हात्मानं हृद
येस्थाविदात्मकः ॥ क्रियते ततपरत्वं तु हृन्मंत्रेणतत्परं ॥ सर्वज्ञादिगुणोत्तुंगेसं विद्रूपे परात्मनि ॥ क्रियते विप १२

यादृशःशिरोमंत्रेणधीमता ॥ हृच्छिरोरूपविज्ञान ... मंत्रेणास्य हरं ॥
मंत्रात्मकस्य देहस्य मंत्रवाच्येन तेजसा ॥ सर्वतो वर्ममंत्रेण क्रियते न्यस्तरक्षितिः ॥ यद्द्याति परं ज्ञानं सविद्रूपं
परात्मनि ॥ हृदयादिमयं तेजः स्यादेतन्नेत्रसंज्ञकं ॥ आध्यात्मिकादिरूपं यस्माध कस्य निनाशयेत् ॥ अविद्याजा
तमस्त्रं तत्परं धाम समीरितमिति ॥ पूर्वं तत्र रत्तिमंत्रन्यासानंतरं व्याख्यातं तत्र को मंत्रन्यास इत्यपेक्षायामाह ॥
तत्त्वदिति ॥ न्यासान्मंत्रन्यासान् ॥ एषामप्यावश्यकतोक्ता मंत्रे ॥ न्यासं विना जपं प्राहुरासुरं विफलं बुधा ॥ न्यासा
नेहात्मकोत्त्वादेवोभूत्वा तु तं यजेदिति ॥ कुलप्रकाशतंत्रेपि ॥ आगमोक्तेन मार्गेण न्यासान्नित्यं करोति यः ॥
देवताभावमाप्नोति मंत्रसिद्धिः प्रजायते ॥ अकृत्वा न्याससज्जालं यो मूढात्मा प्रजपेन्मनून् ॥ सर्वविघ्नैः स बाध्येत व्या
घ्रैर्मृगशिशुर्यथा ॥ यो न्यासकवचच्छन्नो मंत्रं जपति तं प्रिये ॥ विघ्नांत्दृष्ट्वा पलायंते सिंहं दृष्ट्वा यथा गजा इति ॥
वायवीयसंहितायामपि ॥ नाशिवः शिवमभ्यस्येन्नाशिवः शिवमर्चयेत् ॥ नाशिवस्य शिवध्याने नाशिवः शिव
माप्नुयादिति ॥ ग्रंथकृदपि ॥ मंत्राक्षराणि विमृश्य देवताभावसिद्धय इति ॥ एतेन यत्र मंत्रे ... न्यासो वाचनि
कोनोक्तस्तत्रापि कर्तव्य इत्युक्तं ॥ ॥ आत्मयागार्थं देहपीठकल्पनामाह ॥ ॥ कल्पयेदिति ॥ आत्मनो देहस्ये
दुमूर्द्धादिभिः पीठकल्पयेदित्यर्थः ॥ अत्र क्रमादित्यनेनैतदुक्तं भवति ॥ मंडूकायनमः आधारे ॥ कालाग्निरुद्राय नमः
मंडूके तित्स्वाधिष्ठाने ॥ कच्छपायनम इति नाभौ ॥ ततो हृदि आधारशक्त्यादि न्यासं कृत्वा ॥ पद्मार्द्रमादि न्यास इति ॥ य
दाहुः ॥ न्यसेदाधारशक्तिं प्रकृतिं कमठं शेषक्ष्मासुधाब्धीन् रत्नद्वीपं च रत्नोज्ज्वलमपि तमहा मंडपं कल्पवृक्षं
॥ हृद्देशेरत्ति ॥ अंसेति ॥ धर्माद्दक्षिणेन दक्षिणावर्तक्रमेण ॥ विद्वान्देशिक इत्यनेन दक्षिणांसमारभ्य दक्षोरुपर्यं
तं न्यास इत्युक्तं ॥ अयं पक्षः सांप्रदायिकः ॥ नद्युक्तमीशानशीवेन ॥ आधारस्थां यदेतत्कटिहृदये संध्य दक्षिणे ॥ धर्मं
ज्ञानं च सव्यांसे कर्वो वामान्ययोरपि ॥ वैराग्यसंततमैश्वर्यमिति ॥ क्रमादित्युक्तरेण संबध्यते ॥ मुखेति ॥ अत्रापिप्रा

दक्षिणे नेत्रमुपं जनीयं॥ क्रमादित्यनेनैतदुक्तं॥ मुखं नतौ वामपार्श्वं तलौ नाभिपातलौ दक्षपार्श्वे॥ तदुक्तं॥ मुखे
च वामपार्श्वे च नाभौ दक्षिणपार्श्वके॥ अधर्ममाप्य प्रामान मवैराग्यमनैश्वरमिति॥ दशाचविविना प्युक्तं॥ अ
धर्मं वदनेनेतत॥ अज्ञानं सव्यपार्श्वे च नाभौ पार्श्वे च दक्षिणे॥ अवैराग्यमनैश्वरमिति॥ यत्त्वाचार्यवचनं॥ आ
नननाभिमूलपार्श्वद्वयोरितिनदर्पितद्वौ काकारेराननप्रापार्श्वनाभिमूलपार्श्वेरित्येव व्याख्याते॥ अधर्मादि
नतानेवमत्र एव वानितरर्थः॥ अपरइति धर्मादिषु॥ अस्मिन्नित्यनन्ते॥ पद्ममिति॥ वक्ष्यमाणलक्षणं॥ एतेनह
र्वदर्वस्योत्तरोत्तरं प्रत्याधारीकोक्तो॥ अस्मिन्पद्मे सूर्येदुपावकानित्रियोऽयं॥ एषां तित्रिषु॥ नामादौ यक्षरंक
नादि आदि यादितत्तर्विकाः॥ तत्रक्रमः॥ सूर्यमंडलं विन्यस्य तत्र तत्कलाः॥ ततः सोममंडलं तत्र तत्कलास्ततन्यसे
दिति॥ तथैवेति॥ हृर्वहर्वस्योपरि नामाद्यक्षरं एकैकानि निपदमेवात्र आरूप्यते॥ तेन॥ नाम्नो पदाद्यक्षरं तत्पूर्वका
न्यसेदिति॥ अत्र गुरुक्रमस्तु तंत्रेणमंत्रध्यते॥ ततश्चक्रुसंमत्त्वायनमइत्यादि प्रयोगः॥ तदुक्तं॥ आद्यक्षरे स
तपरस्तमांसानि॥ एतच्च दिवप्रदर्शनमात्रं हर्वसवत्रितयोक्तेः॥ अत्र परमात्मात्रि तुग्राह्योव्यतिरेके॥ तेनाय
मर्थः॥ आत्मादित्रयेप्पाद्यक्षरमेव बीजं॥ ज्ञानात्मनि तु मायाबीजमिति गुरुक्रमपदेशोक्तं॥ न्यसेत्पात्र मनुं त
त्तदिति अनेनैतदुक्तं भवति॥ मांमायात्त्वायनमः॥ विं विद्यात्तत्वायनमः॥ पंपरतत्त्वायनमः॥ रूस मात्राद्य
ष्टदलमूले शुभ ध्येचपीठशक्तिनवकं च न्यसेदिति॥ तदुक्तं॥ मायातत्त्वं कलातत्त्वं विद्यातत्त्वं परं तथा॥ विन्य
स्य पीठशक्तिश्च ततः पीठमनुं न्यसेदिति॥ अन्यत्रापि॥ अथाष्टदिक्षु परितो मध्ये च शक्तिनव॥ न्यस्ता पीठमनुं
च विधिवत्तत्कर्णिकामध्यगमिति॥ मुद्राइति॥ तद्विशेषमुद्रास्तत्र तत्कल्पोक्तास्तास्तत्र स्पष्टलेमयावदन्ते॥ वि
धिवदित्यनेनैतदनंतरं मानसोपचारं कृत्वा देवमभ्यर्थ्येत्युक्तं॥ तत्राभ्यर्थनमंत्रः॥ ॐ स्वागतं देवदेवेश सरास १३
न्निधो भव केशव॥ गृहाण मानसीं पूजां यथार्थपरिभाविता मिति॥ अनुक्तेवादेर्देवेतेन देवतानामूहः कार्यः

तदुक्तं॥ इति ध्यात्वा [illegible] त्मानं पटुविशद्धीनंदनसुतं गुरोर्बुधेर्वद्धि प्रमत्तिनिरर्मिं होपरूतिनियजेदिति
॥ अन्यत्रापि॥ ध्यात्वादेवं प्रहर्षसिद्धिमुद्रा अपिधानतः॥ पूजां च मानसीं कुर्यात्ततो र्घस्थापनं चरेदिति॥
अर्घस्थापनमाचरेदित्युक्तं तद्विधिमाह॥ ॥ शंखमिति॥ वामतो वामभागे स्वाग्रतइतिशेषः॥ यदुक्तं॥ आ
त्मनः पुरतः शंखमिति वह्निमंडले ऊधारे त्रिकोणं साधारं शंखमिसंव्रयः॥ विधानित्यमनेन तत्र वह्निमंडलस्य इत्यु
पलक्षणं मित्युक्तं॥ तेन त्रिकोणषट्कोणवृत्तचतुरस्ररूपे शंखमुद्रया अर्चितमंडगेइतिशेषः॥ तदुक्तं॥
अग्रे त्रिकोणमालिख्य षट्कोणं च ततो बहिः॥ वर्तुलं चतुरस्रं च मध्ये मायां विलिख्य च॥ शंखमुद्रां प्रदर्श्या
थ कोणादिष्वंगपूजनमिति॥ अन्यत्रापि॥ त्रिकोणषट्कोणवृत्तचतुरस्राणि कारयेत्॥ शंखमुद्रावष्टम्य
षडंगानि प्रपूजयेदिति॥ बिंदुत्रूमध्यं केचन ब्रह्मरंध्रमिति वदंति॥ तत्र चंद्रमंडलस्य सत्वादिति॥ बिंदुप्र
सृतसुधामयैरिति जलध्यानं॥ यद्वाग्नीमशंसौ॥ बिंदुप्रसृतपीयूषरूपतोयाप्लुतादिना॥ ध्यात्वार्घ्यं षडंगेन तु
पूजयित्वाभिमंत्रयेदिति॥ पूरयेत्तं यथाविधीत्यनेनैतदुक्तं॥ विलोमं प्रति लोममातृकां विलोममूलमंत्रं
जपन्निति॥ तदुक्तं॥ पूरयेद्विमलयाद्यस्तासुधीरक्त्रैरनिगनेः॥ प्रतिरोमकेनेति॥ आधारं पावकमंडल
त्वेन शंखं सूर्यमंडलत्वेन तोयमिंदुमंडलत्वेन तेषु मंडलेषु तत्तत्कला पिंत्रे समरेत्केचन पूजयंत्यपि॥ त
त्रयोगः॥ स्ववामाग्र तच्चतुरस्र वृत्त षट्कोण त्रिकोणमंडलं कृत्वा शंखमुद्रया वष्टभ्य पुष्पादकेन पूजाक
मेण षडंगानि संपूज्य आधारमस्त्रमंत्रेण प्रक्षाल्य मं अग्निमंडलाय दशकलात्मने अमुकार्घपात्रासना
य नमइति॥ आधारं संस्थाप्य पूर्वाग्निरे दशकलाः पूजयेत्॥ ततः शंखमंत्रेण शंखं प्रक्षाल्य अं सूर्य
मंडलाय द्वादशकलात्मने अमुकार्घपात्राय नमइति पात्रमाधारे निधाय प्रादक्षिण्येन द्वादशस्थाने
षु सूर्यस्य द्वादशकलाः संपूज्य विलोममातृकां विलोममूलं च जपन् शुद्धोदकेन शंखमापूर्य॥ उं सोममं
डलाय षोडशकलात्मने अमुकार्घामृताय नमइति संपूज्य सोमस्य षोडशकलास्तत्र प्रादक्षिण्येन पूजये

दिति॥ततस्तत्रगंगेचेतिमंत्रेणसूर्यमंडलादंकुशमुद्रयातीर्थमावाहयस्वहृत्कमलादेवमप्यावाहयेत्इति॥दे
वीकोदेवताधियेतिवक्ष्यमाणत्वात्॥नदुक्तं॥तत्रतीर्थमनुनाभिवाहयेत्तीर्थमुत्तसूर्यमंडलात्सुतः॥स्वीयहृ
त्कमलोदरितयेति॥अंकुशमुद्रालक्षणंस्नानप्रसंगेउक्तं॥यद्वायमंकुशमुद्रायदाहुः॥ऋजुमध्यामध्यप
र्वक्रांतांतर्जन्यधोमुखी॥विशेषांकुशमुद्रेयंकुंचितामध्यपर्वतःइति॥सद्भूति॥अथयदितिसंबध्यते॥न्य
सेदिति॥आस्थितिसंबंधः॥तस्येतिमूलमंत्रस्य॥अंगविदितनेनतत्स्यमा॥गादिकत्रमंरंजनेनेवन्यासङ्
त्युक्तं॥आसिमंरइयेति॥अपइतिसंबंधः॥हस्ताभ्यांछादयन्नपदेशिकइत्यनेनमत्स्यमुद्रेत्युक्तं॥तल्लक्षणं
तु॥अधोमुखेवामेहस्तेऽस्यपरिचसंस्थितौ॥पार्श्वद्वयगतांगुष्ठौमत्स्यमुद्रेयमीरितेति॥अत्रमूलमंत्र
विद्याराज्ञ्यामेवमादिविशेषोपुंस्त्रीदेवतात्वकमविवक्षितमित्युक्तं॥अन्यथैकग्रहणेइतरग्रहणंनस्याल्
लेदितिसंबंधः॥यथान्यायमितिसम्यक्कृत्वोपकृत्वोवाइयंव्याख्याएवमपिज्ञेया॥तदुक्तं॥संस्कृत्यजप
त्वमंत्रमष्टशइति॥संस्कृत्येति॥तदितिसंबंधः॥तत्वसंरक्षणंछोटिकात्रिरितिशेषः॥अवगुंठ्यतत्रापितदिति
संबध्यते॥तच्चावगुंठनमुद्रया॥समापाद्येत्यमृतबीजेन॥स्वमुद्रयेतिसंनिरोधिन्या॥अत्रावगुंठनधेनुसं
निरोधनमुद्रालक्षयोविशेषवक्ष्यंते॥ततःशंखोपरिशंखमुद्रालक्षणमहामुद्रांप्रदर्शयेत्॥शंखमुद्रांचक्रमु
द्रांमुशलाख्यांचदर्शयेत्॥परमीकृत्ययत्नेनगुह्याख्यांचैवदर्शयेत्इति॥कुसुममंत्रेगालिनींप्रदर्शनंराम
मंत्रेगारुडमुद्राप्रदर्शनमित्यादिविशेषोनुसंधेयः॥शंखमुद्रालक्षणंतुउक्तंप्राक्॥अन्यासांलक्षणंतु॥
मुष्टिंकृत्वाउद्धस्ताभ्यांवामस्योपरिदक्षिणे॥कुर्यान्मुशलमुद्रेयंसर्वविघ्नप्रनाशिनीति॥मिथःकनिष्ठिकेब
द्ध्वातर्जनीभ्यामनामिके॥अनामिकोर्ध्वगाश्लिष्टदीर्घमध्यमयोरधः॥अंगुष्ठाग्रद्वयंन्यस्येद्योनिमुद्रेयमी
रितेति॥विपर्यस्तितलेकृत्वावामदक्षिणहस्तयोः॥अंगुष्ठोयथयेचैवकनिष्ठानामिकांतरे॥चक्रमुद्रेयमुद्दिष्टा
सर्वसिद्धिकरीशुभेति॥महामुद्रालक्षणंत्रयोविशेषवक्ष्यति॥कनिष्ठांगुष्ठकौसक्तौकरयोरितरेतरं॥तर्जनीमध्य
योनिमुद्रेःप्रदर्शयेत्॥यदाहुः॥विन्यस्यचैतेनयेत्तीर्थमाशेयांकुशमुद्रया॥स्वमांडोदरतीर्थेभ्योधेनुमुद्रां७

मानामाःसंहतास्तुप्रसक्तिताः॥मुद्रैषागालिनीप्रोक्ताशंखस्योपरिचालितेति॥हस्तावभिमुखौकृत्वासंग्रथ्यित्वाकनिष्ठि
के॥मिथस्तर्जनीकेश्लिष्टेश्लिष्टावंगुष्ठकौतथा॥मध्यमानामिकाद्वेतुपक्षाविवविचालयेत्॥एषागरुडमुद्रास्याद्दो
षविषनाशिनीति॥दक्षिणतइति॥पात्रंताम्रादिजं॥यदुक्तं॥रत्नसौवर्णरौप्यमयंकुंताम्रंरहाकपैत्तलं॥पात्रंपालाश
मुक्तंशान्यविलाएवच्युतार्चने॥सर्वेश्रेष्ठेताम्रशंखाचघयाख्यौ॥निशम्यतइति॥अर्घस्येत्यर्घपात्रस्यशक्तौशतिए
तानिजिज्ञानानि॥असक्तौएकेनैवसर्वंकुर्यात्॥यदाहुः॥एकस्मिन्नथवापात्रेपाद्याद्यर्धादिनिकल्पयेदिति॥मनुनेति
॥मूलमंत्रेणप्रोक्षयेदितिसंबंधः॥इदंचसामान्यविधानं॥अन्यत्तुमंत्रविशेषेप्रोक्षणमंत्रउक्तस्तत्रतेनैवप्रोक्ष
ण॥मितिज्ञेयं॥गुरुरित्यनेनेदंप्रोक्षणंत्रिरित्युक्तंभवति॥यदाहुः॥प्रोक्षयेन्निजतनुंततोमुनात्रिःकरेणमनुनाभि
जंतथासाधनंकुसुमचंदनादिकमिति॥अन्यत्रापियागवस्तुनिएवंद्रव्याणिक्रमात्प्रोक्षयेदितिसंबंधः॥ ॥अं
तरंयागमाह॥ ॥न्यासेति॥तदुक्तं॥द्विविधस्याच्युतमनोबाह्यांतरमुपासनं॥न्यासानांचांतरंप्रोक्तमन्येषामनुजयंत
येति॥वायवीयसंहितायामपि॥आंतरावान्मंत्रयागमथिकाथविस्तानिकं॥विधायमानवःपश्चाद्बहिर्यागंसमा
चरेदिति॥तथासंहितायांशांभुवाक्यमपि॥गृहीस्नानमात्रेणप्राप्नोतीहचमंगलं॥प्राप्नोतिचंद्रवदनेदानहोमादि
भिर्विना॥गृहस्थोयदिदानादिद्रव्याभावात्कुर्यादपि॥एतयेद्धिनानैवकःकुर्यादितिवर्हं॥नब्रह्मचारिणोद्रा
तुमधिकारोस्तिनामिनि॥गुरुरप्यपिचसर्वस्वःकोवादास्येत्सपेक्षितं॥नारएपवान्निनोशक्तिरत्रतेसंतिकलौ
युगे॥परिव्राडुज्ञानमात्रेणदानहोमादिभिर्विना॥सर्वदुःखपिशाचेभ्योमुक्तोभवतिनान्यथा॥परिव्राड्विर
क्तश्चविरक्तश्चगृहीतथा॥कर्मपाकेनिमज्जंतेद्वावुभौकमलानने॥तपस्वियोगृहस्थश्चमंगलैर्मंगला
र्चितः॥द्रव्योपकरणैःकर्तुंदुःसुदुर्निवार्यणां॥वानप्रस्थाश्रयतयोयथैवकुर्वन्नहंससंसाराग्निवर्तंति
 विधयतिक्रमदोषतः॥आरूढपतिताह्येतेभवेयुर्दुःखभाजिनमिति॥अत्रन्यासक्रमेणप्रपंचेनैतदुक्तंभवति॥

मंडूककालाग्निरुद्रकूर्मान् आधारस्याधिष्ठानत्वेनादिशेत् तत आधारशक्त्यादिरुद्रपर्यन्ताः ईशानादीनीशपर्यन्तान् सं
पूज्य पुनरुक्तादिदोषाभावेऽपि न त्यक्तव्याः ॥ तदुक्तं रामपूर्वतापनीये ॥ मायाविद्ये कलापरतत्त्वे सरस्वतीवृद्धिमत्ता
दिस्थानकानीति ॥ पुष्पसाद्गुण्यं ॥ अकुंचनमाघ्राणं तेन गंधाघ्राणरित्यर्थः ॥ एताद्दशपुष्पेष्वेव आदिशब्देन पुष्पमा
त्रग्रहणं यथा ॥ यथा पुष्पाणि न त्यजेत् गंधः अपुष्पादेः उपचारे तु गंधानन्तरं पुष्पस्योदिष्टत्वात् ॥ पीठमन्वन्तरमि
ति ॥ पीठशक्तिपीठमन्वन्तरमित्यर्थः ॥ नमिमिति ॥ एवं कृते देहमये पीठे परदेवतां ध्याये रूपचारैस्समर्चये
दिति ॥ आग्नेयेन संबंधः ॥ आद्येन पुष्पं तत्र विशेषमाह ॥ पंचेति ॥ अनन्यधीरित्यनेन ॥ त्रिधोवेत्युक्तं तदुक्तं मात्वा
पे ॥ ऊर्ध्वपुष्पांजलिमपि निजदेहे पंचसोपचारपि त्रिवारइति ॥ विनानैवेद्यमिति ॥ अस्यायमभिप्रायः ॥ आसनादि
दीपांतानुपचारान्प्रदर्श्य बाह्ये नैवेद्यं न देयं ॥ ततो गुरूपदिष्टविधिना कुंडलिनीमुत्थाप्य द्वादशांतं नीत्वा तत्रस्थि
तेन समागमय्य तत्र कुलामृतधारया देवीं प्रीणयेदिति गुरूपदिष्टेति ॥ अस्य दिङ्मात्रं मानसोपचारे ॥ पीठे तत्र जपः ॥ जप
निवेदनं आत्मार्पणं क्षमापनादि विसर्जनं वक्ष्ये ॥ यथा कुः ॥ ध्यात्वा यजेद्वंदनाद्यैः मनसैव धूपदीपके ॥ सोऽहं नाथ
से किंचित्कल्पं कृत्वा निवेदयेदिति ॥ अशक्तं प्रत्याह ॥ सर्वमिति ॥ नत्वा गुरुं निष्पादितानन्दं नित्यपूजायामपि समा
नं ॥ विशेषस्तत्वनिम्नपूजायां ॥ एतच्छेखजमेचवर्ध्मां क्षिपेदिति ॥ ततः प्राणायामत्रयं कृत्वा अष्टोत्तरसहस्र
नित्यजपं कृत्वा पुनः प्राणायामत्रयं कुर्यात् ॥ किंचन क्षिपेत् वर्द्धनि जलेइति ॥ पुरतो जपस्य पुरतोऽपि विहितमथ
तत्र यंबु धेरिति चोक्ते ॥ तदुक्तं मंत्रतंत्रप्रकाशे ॥ अष्टोत्तरसहस्रं तु स्तोत्रयागमादरात् ॥ जपेत्प्रतिदिनं यत्नानि
सएष जपः स्मृतः ॥ अयने विषुवे चैव ग्रहणे चंद्रसूर्ययोः ॥ द्वादशपांरणिमायां च तेषु नैमित्तिको जपः ॥ नित्यान्त्रिगु १५
णितः सोऽथ पूजा चैव हरैस्तथैवेति ॥ अंतरयागमुक्त्वा बहिर्यागमाह ॥ ॥ततइति ॥ ततस्तदनंतरं मंत्री साधुशोभनं
शोभनत्वेन सर्वतोभद्रमुक्तं ॥ मंडलं विदिमध्यलिखित्वा सर्वतोभद्रमंडलं गंधाद्यैः पूजयेदिति संबंधः ॥ आदिशब्दे

न पुष्पं मंत्रोऽस्यानेन श्रीसर्वतोभद्रमंडलाय नम इति इत्यामंत्रः सूचित इतिज्ञेयं ॥ शालिभिरिति ॥ उपरिभागे सुप
रि तंडुलैरलंकृतं तंडुलान्तत्र विनिक्षिपेत्यर्थः ॥ पुनरनंतरं तेषु मंडलेषु ॥ तत्प्रमाणमाह्यं चोक्तं ॥ शालीस्तु
ककर्णिकायां च निक्षिप्याढकसंमितान् ॥ तदुलांश्चतद्दष्टांशान् कुर्वंश्चापरि विन्यसेत् ॥ इति ॥ आढकलक्ष
णं तु ॥ कुडवश्चतुःपलस्यात्प्रस्थःकुडवैश्चतुर्भिस्यात् ॥ प्रस्थैश्चतुर्भिराढकइति ॥ तदष्टांशानिति कुड
वद्वयमितान् ॥ सप्तविंशतिसाग्रदर्भपत्रमयं वेष्टं कारयेत् ग्रथितं विष्टरपर्यायं कूर्चं ॥ तदुक्तं डाम
रे ॥ सप्तविंशतिदर्भाणां वेष्टा ग्रेयं थितं त्वथिता ॥ विष्टरे सर्वयज्ञेषु लक्षणं परिकीर्तितमिति ॥ अत्रात्मा
दितत्वत्रयेणादेवं संरक्ष्य वाद्यपूजामारभेत् ॥ तदितिसंप्रदायविदः ॥ आधारशक्तीति ॥ अत्र प्रथमं गु
रुगणपतिपूजनं कुर्यात् ॥ तदुक्तं ॥ वायव्याद्यादिशिपर्यंतमच्यपीठस्याद्गौरवी पंक्तिरादौ ॥ प्रसोम्य
चायां विकेयः कराकुपाशदंतं प्राग्यत्नातिदिधानइति ॥ अस्यत्रापि ॥ पीठस्योत्तरस्यां गेगुरुपंक्तिरस्य
श्चमंत्री वरः ॥ यावदीशकोणं वायोः कोणं समारभ्य ॥ अथ गुरुपरमगुरुश्च परमेष्ठि गुरुतथा
प्यचपरमाचार्यगुरुं चादिसिद्धिगुरुमर्चयेच्च गुरुमिति ॥ अत्र परमाचार्यगुर्वनंतरं परमास्पर
गुरुः परमसिद्धगुरुरपिज्ञेय ॥ तेषां ध्यानमंत्रं तंत्रप्रकाशे तु उक्तं ॥ श्वेतांबरधरागौरा गुरवः पुस्तका
न्विताः ॥ व्याख्यानमुद्राद्युक्ता ध्यायेतो वास्मरेन्निजं ॥ ध्यातव्यः इत्थंना शोचनध्याना ज्ञानवान् भवेत् ॥
शास्त्रा दौतु विशेषस्तत्रांतरं ॥ तरकैमांस्यांबरगंधप्रघास्वलंकृताः पंकजविष्टरस्थाः ॥ सर्वे च सालंब
नयोगनिष्ठाः प्रान्ताखिलैश्वर्यगुणाष्टकाः स्युरिति ॥ तत्र श्रीगुरुभ्यो नम इत्यादि प्रयोगः ॥ एवं गुरु
गुरुरक्षां नेत्रे रूपत्राधिदेवता ॥ सिद्धि ह्रदि वासां प्रपूर्वसमुद्धारयेत् ॥ इत्युक्तेः ॥ अर्चयेदित्य
कंतदेवाह ॥ अथइति ॥ अनेनैतदुक्तं भवति ॥ कर्णिकायामाहाकार्यो मंडूकं मंडूकाय नम इति य

श्रा० टी० जेन॥ नद्धर्धदशभुजं पंचवक्त्रं रक्तरूपं दक्षिणवामपार्श्वकालाग्निरुद्रं कालाग्निरुद्रायनमइति॥ नरसिंमा प० ४
हो काश्यं कर्मकर्सायनमइति॥ तदुक्तं शौनककल्पे॥ मंडूकादिदृष्टिबाढादिकालिकायां यजेत्क्रमात्मइति॥ नरसिं
हूं कल्पेपि॥ पद्मे पद्ममंडूकं परतत्वांतमर्चयेदिति॥ कूर्मशिलेति॥ कूर्माकाराशिला कूर्मशिला॥ तमा
हेदां॥ पूर्वस्तलिन कूर्मएव कूर्मशिलेतिध्येयं॥ वस्तुमात्मककूर्मस्तिष्ठित एव॥ तदुक्तं तापनीये॥ आधारशक्तिं साधा
राख्यकां कूर्मेनागाविति॥ आधारबंडेस्यार्थः पूर्ववज्ज्ञेयः॥ अनंतशिलेति॥ मूलप्रतिमाधस्तन शिलाया संज्ञा
॥ तदुक्तं वायवीयसंहितायां॥ आधितां चंदनालिप्तां मानेवस्तशिलां क्षिपेत्॥ रत्नन्यासं ततः कृत्वा मव
निःशक्तिनामभिः॥ हरितालादिधातूंश्चबीजं गंधौषधीरपि॥ शिवशास्त्रोक्तविधिना क्षिपेत्कूर्मशिलोप
रि॥ पादिनालिंगंब्रह्मशिलोपरि॥ आमूढकवृवर्णां किंचिदिर्यंतेन॥ अनंतमिति॥ नाम्नुर्धनगग्ज्ञतिमधस्त्व
खाकृतिमेककुंडलं सहस्रफणमिति निजस्वरूपं॥ अत्र तु ध्यानमुक्तं॥ द्वात्रिंशद्भिः स्वस्तुतत्वेरधोविधांतेः
स्वेर्महितविस्तुतेजः॥ आनंतं संतक्षथितं स्वासनं स्यात्तथाकारः सद्भुजागो सनंतइति॥ अन्यत्रापि॥ नबेधो
धेर्विधानेद्वात्रिंशत्संख्यकैरिह॥ पीगाकारो घनंतस्यादनंतासनमीरितमिति॥ नीलेंदीवरधारयनीति
समासः॥ वेन्द्यति॥ इंदीवरेदू॥ स्फुरन्सागरमेखलामित्यनेन पृथिव्यनंतरसागरायनमइतिसमुद्रा
स्याइत्यर्थः॥ अत्र सरस्वतिमंत्रोविधाब्धिः॥ जलमीविलुमंत्रेपुत्तराब्धिः॥ गणेशमंत्रे इक्षुसमुद्रः॥ अन्य
त्राम्रतसमुद्रइत्यादिध्येयं॥ तस्यां विशिष्टायां॥ वृषेति॥ केसरी सिंहः॥ ततो देवयोनिस्तत्स्वरूपमुक्तमन्य
त्र॥ रक्तवस्त्रधराह्यष्टान खदंष्ट्राः सुदारुकाः॥ कर्त्रीखड्गगहस्ताच राक्षसाघोररूपिणः॥ ततास्तथे
व दीनास्याइति॥ इभोहस्ती॥ नत्र एवंविधमन्यिना वैराग्योनैश्वर्यमिति॥ उक्तं लक्षणमिति॥ रक्तादिवर्णा १६
न्धृमादिरूपान्॥ उक्तंच॥ धर्मं रक्तं वृषस्तपं च सिंहं ज्ञानं श्यामं कुष्टतं तत्पीतं॥ वैराग्यं स्याज्जरूपामि

तागंमेश्वर्यं क्रमतः पीठपादाः॥ पीठस्येषा सुरधर्मादियो ये चत्वारस्तेत्रुदिताकाररूप्याइति॥ आग्नेयादिवि
ति॥ आदिशब्देन निर्ऋति वायवीना कोणः॥ दिक्शब्दः कदक्षिणपश्चिमोत्तरासुचसमुच्चये॥ आकाशस्त्वत्रस्थल
स्येते दिक्शब्देन प्राधान्यस्तिपरिज्ञापणात्॥ वायवीय संहितायामपि॥ अधर्मादिश्च पूर्वादिनुत्तरांता
नतु क्रमादिति॥ इह देवताः पूर्वंनागम्यपूर्वकमित्याचार्याः॥ तथाचागमे॥ देवसाधकयोरंतः पूर्वसादि
शि होच्यत इति॥ अन्यत्रापि॥ देवाग्रेस्वस्यचाग्रेप्य प्राचीप्रोक्ता तु देशिकैः॥ प्राच्येव प्राची वोदक्षिणमुक्ता
तु देवतार्चनमिति॥ तंत्रांतरेपिच॥ यत्रैव ना तु स्तविमस्तु देतिप्राची तिनां वेदविदो वदंति॥ तथापरार
जकृतयोश्चसद्दागमसाः प्रवदंति नांतु इति॥ अन्यत्रापि॥ द्वारपूजावसरे देवस्य मुखमारभ्य दिग्ध्यांप्राचीप्रकल्पयेत्
॥ तदादिपरिवारागणमंगाद्यावरणस्थितिरिति॥ अत्र युक्तिरपि॥ देहे पीठन्यासावसरे मुखे धर्मन्यासउक्तः स
चायनागः॥ महागणपतिपूजावसरेयं पक्षद्वपित्रिकोणवाह्ये पूर्वादिचतुर्दिक्षुसमर्चयेदित्युक्त्वा अयस्थवि
स्वपूज्या धरस्तुक्तवान्॥ तथा रामपूजायां द्वितीयावरणे हनुमंतं सुग्रीवमित्युक्त्वा पुनरारु॥ वाच्ययंतं हनूमंतमग्रतो
धृतपुस्तककमिति॥ अन्यच्च॥ उत्तरानिमुखत्वेनापि पूजा विहिता॥ कर्मांतिरेच प्रत्यादिमुखत्वेनचतत्र चाधर्मा
पूजनमंगादिपूजनं च कदाचित्क्रमांतरेणस्यात्॥ अन्यादाक्रमेणस्यादिति विरुद्धं॥ तंत्रांतरेच॥ लोकत्र सर्वं सर्वना
गंत्रदिष्टं सव्यंनागं दक्षिणं त्वागमज्ञैः॥ हस्तं विद्यात्पुत्तरं नागमग्रं प्रज्ञावद्भिः पश्चिमं नागमुक्तमिति॥ नृसिंहक
ल्पेच॥ अथावरणपूजास्यपुरः प्रत्यक्प्रकल्पयेत्॥ तदादि परिवाराणां प्रादक्षिण्येन पूजनमिति॥ नारामणीयेपि॥
चाक्रियादिपत्रेषु लक्ष्माद्याः शक्तयामराइति॥ अत एवं पाठशक्तिपूजने अग्रदलादीनि ब्राह्म्यास्यते तेनोदङ्मुख्
ग्रा० टी० पूजाद्यावर्पितासायनागस्यपूर्वत्वमाकल्प्य धर्मादीपूजनमंगादिपूजनमितिनिर्णयः॥ तेन यंत्रादानपि दलेषु केसले
ध्वग्रेअग्रदलान्स्थतिलिखनीयमितिसियं॥ इयं दिक् चराचर्या॥ अथां सुजंयनेदिति॥ वस्तुमाणक्रमेण॥ अ

चांबुरुहं तत्सर्वमिनं तावन्मण्डलं त्र्ययेदिति पद्मपीठेनोक्तं। रुद्रयवोष्टममलमिति। सरोरुहासावसरे यंथक्रुद्
पुक्तवान्॥ अनंतं रुदये पद्ममस्मिन्निति। कलाभिरिति। तत्र द्वादशकलात्मक सूर्यमंडलाय षोडशकलात्मकचं
द्रमंडलाय दशकलात्मकवह्निमंडलायेति। केचन कलाभिस्साधर्म्यमस्यार्थं व्याचक्षते। अन्ये त्वन्यथा वर्णयं
ति। द्वादशकलादित्वमनुक्रममपि लभ्यते। तेन सूर्यमंडलं संपूज्य तत्र द्वादशकला। ततः सोममंडलं तत्र षोडश
कलास्ततो ऽग्निमंडलं तत्र दशकलाः पूजयेदिति। अयं सांप्रदायिकपक्षः स्तुतस्पष्टमिति। कर्णिकायां। अणवस्य
त्रिभिर्वर्णैरकारोकारमकारैः कलाभिः सार्कसूर्येंदुपावकान् पूजयेदिति संबंधः। तदुक्तं। सूर्येन्दुवह्निन्प्रणवांशै
युक्तानिति। एतेन तन्मंडलाधिष्ठातृदेवताः ब्रह्मविष्णुशास्तन्मंडलेषु पूजनीया इति सूचितं। यदाहुः।
सौरबिंबे चतुर्वक्त्रः किरीटाद्यैर्विभूषितः कुंडं कमंडलुं चाक्षमालां। ब्रह्मा बिभ्रद्वरदं चाभयार्थं हस्तैर्ध्येयः सितवस्त्रो ऽरु
णि:॥ सौम्ये बिंबे गरुडेमेघनीलश्चक्रं शंखं सत्कदादंकुं दधानः॥ हारी माली कटकी सत्किरीटी विष्णुः पीतवसनं कौ
स्तुभं च॥ आग्नेये बिंबे वृषभे चंद्रमौलिः श्वेतो रुद्रो दशबाहुस्त्रिनेत्रः॥ टंकं वीणां त्रिशूलं खड्गं खट्वांगं कपालमुद्रां कलश
रदानानि हस्तैरिति। अन्यत्रापि। ब्रह्मविष्णुशिवाः सूर्याद्यास्त्र्यक्रमादिमंडलयं चेमिति। (विधिवदिमने नेनतदुक्तं भवति)
अर्घ्यसत्वादिकानिति। शुक्लरक्तकृष्णरूपान्॥ तदुक्तं॥ सितरक्तासिताः प्रोक्ता गुणाः पद्मोपरि स्थिता इति। विधिवदित्य
नेनेतदुक्तं भवति। एतदनंतरं मध्ये कलापरतत्त्वादिसं पूजयेदिति। आत्मादिपरतत्वानमि द्वादशशक्तिः प्रपूजयेदिसु
क्तेः। विदायसामंत्र प्रकाशोपि। सत्वं रजः शार्वरसंज्ञकं च बिंबानि चार्केंदु हुताशनानां॥ संपूजयेदात्मचतुष्टयं तेषि
च्छादिकं तत्वचतुष्टयं चेति। वायवीयसंहितायामपि। त्रिमंडलोपयत्मादितत्वत्रितयमानसमिति। पीठमंत्रावसान
कमितनेना क्रियादीनां पीठशक्तीनां स्थानमाह। पीठेति। केसरेषु पूजितपद्मकेसरेषु। पूर्वत्र अदलादि
अष्टसु प्रादक्षिण्येन मध्ये च पीठशक्तिः पूजनीयास्तथा पीठमंत्रपूजनमित्यर्थः। अंतःस्थिता विद्योषेकोक्रमः सर्वत्र
८

गच्छतः इति परिभाषणात्। अत एव देहे पीठदेवतान्यासावसरे पीठशक्तिन्यासं उक्तो मया। पीठशक्तयः पीठ
मंत्राश्च तत्तन्मंत्रे वक्ष्यंते। सर्वरामया इति। ध्यानं आसनं च एवं प्रयुक्ता आचार्यैः। श्वेता कृष्णा रक्ता पीता श्या
मा नीलोपमा प्रयुक्ता। अंतज्वलन्नपासमानेते तेजोरूपा ध्वजाः केयक्षी ज्ञा इति। मंडूकादिपरतत्वांते निपूजयामा
मपि समानं। एवं पूजिते कुंभे पीठस्थापनमाह। हेमादीति। आदिशब्देन रजतताम्र मृन्मयाः शास्त्रा
नुसारेण ज्ञेयाः। कुंभं कलशं। तदुक्तं महाकपिलपंचरात्रे। सौवर्णं कलशं राजतं रौप्यं ताम्रमयं पि वा। निर्दोषं
मृन्मयं चापि चंदनेन विलेपितमिति। अन्यत्रापि। सौवर्णं राजतं वापि ताम्रं किं वायथोदितं। शालये दस्त्र
मंत्रेण कुंभं सम्यक्सुरेश्वरीति। अपूर्व कलशशब्द व्युत्पत्तिप्रमाणं चोक्तं। कलाकलां गृहीत्वा च देवानां वि
श्वकर्मणा। निर्मितोयं सुरैर्यस्मात्कलशस्तेन उच्यते। पंचाशदंगुलव्यासं उत्सेधः षोडशांगुलः। कलशानां
प्रमाणं तु मुखमष्टांगुलं भवेदिति। पद्मपादाचार्यैस्तु। कलशो रत्नदति कुंभसंनिरुक्तः। अस्त्राद्भिः अस्त्रम
न्त्रजप्तोदकैः। त्रिगुणात्मना त्रिगुणेन सत्वादिगुणरूपेण च तंतुना आवेष्टितां गतेन कंठे सूत्रवेष्टनं क
वलितं नारं प्रमिति कुंभविशेषणं। तदुक्तं वायवीयसंहितायां। सौवर्णं राजतं वापि ताम्रं मृन्मयमेव वा
॥ गंधपुष्पाक्षताकीर्णं कुशदूर्वाकिरार्चितं॥ सितसूत्रावृतं कंठे नव वस्त्रयुगावृतमिति। केचित्तु निरंघ्र
यथा स्यात्तथा तंतुनावेष्टितां गमितिपूजयंति। तन्मते सर्वोपि घटस्तंतु वेष्टितो भवति। तदा त्रांग
शष्टवे षं स्यात्। अन्यत्र विशेषः। कल्पाकालिंत सूत्रेण त्रिगुणेन च कर्मणा। गुणत्रयात्मिके नैवं वे
ष्टयेद्विततं समामिति। आदिशब्देन धूपः। नवरत्नोदरमिति। नवरत्नानि प्रक्षिपेत्स्वते। एवमुक्तं कुंभं
तारमुच्चरन्स्थापयेदिति अन्वयः। अत्र तारशब्देन यथास्वं तत्तन्मंत्रे पुष्पं च प्रणवानामपि ग्रहणमिति
शं॥ मंत्रान्यने न मूलमंत्रोच्चारोप्युक्तः। विधिवदित्यनेन विनापि पंचदोषाधिकार्थैः तत्रान्यसामग्र्यापि।

शा॰टी॰

 दुग्धसमुद्भुतो ह्रीरेति॥ क्षीरद्रुमकषायेणाश्वत्थोदुंबरप्लक्षवटकषायेणेत्यर्थः॥ आयुर्वेदे कषायाश्च
पंचविधा व्याख्याताः कषायो यथा॥ विधिवदिति सविधि दुक्तं॥ तद्वदिति॥ विलोमेन॥ आत्माभेदेन देवताधियायेत्
स्वयेदितिसंबंधः॥ आत्मदेवतानां ज्ञानामेवं साध्यमित्यर्थः॥ शंखरेति स्थापितशंखवादस्मिन्पात्रे तत्रशंख
स्थापनांतकर्मसर्वं वक्तव्यं॥ कषायांबुनेति॥ कलशाद्गृणविधिष्टेनसंपूर्णमिति समस्तेन रुद्रेन॥ गंधाष्टकं
विलोप्येति॥ पिष्टंगंधाष्टकं॥ तदुक्तं अष्टमस्यात्मकं पिष्टमष्टगंधंविलोप्य चेति॥ अनादिमित्यनेनगंधद्वा
मित्यस्य जपऽत्र पूजयेदिति शिरसा धेनुमुद्रां प्रदर्शेतिशेषः॥ सकलाश्चतुर्नवति द्वादशात्मन इति सूर्यस्य
पश्चादिलग्नेनैतदुक्तं॥ अकारजकलानंतरं हंसमिति॥ उकारजानंतरं प्रतद्विष्णुरिति॥ मकारजानंतरं त्र्यं
बकमिति॥ बिंदुजानंतरं तत्पदादिकं॥ नादजानंतरं विष्णुर्योनिमित्यृचमिति॥ पंचाशदेक पंचाशत्क
लास्तार पंचभेदोत्थाः॥ अत्राष्टत्रिंशत्कलाः ततएकपंचाशत्कलाः पश्चात्संचतुष्टककलाश्च शंखजलेऽर्च
नीयाः॥ ताश्चेष्टास्नानक्रियाविधानंदात्मिकाः एवं चाष्टत्रिंशत्कलाः एकपंचाशत्कलाः पंचतुष्कस्याश्चे
तिचतुर्नवतिदेवतात्मकत्वं॥ यदाहुराचार्याः॥ प्र थमप्रकृतेर्हंसः प्रतद्विष्णुरनंतरं॥ त्र्यंबकस्ततो
यस्याश्च अस्तस्पदादिकः॥ विष्णुर्योनिमित्याद्यः पंचमः कल्पतां मनुः॥ चतुर्नवतिमंत्रात्मदेवतावाहये
मतां॥ अत्रयाः पंचसंप्रोक्ताः कचस्तारस्य पंचभिः कलाप्रभेदैर्मिथो पूर्णतेताः एकश्चयागिनि॥ अन्यत्रापि॥
चतुर्नवतिसंख्याश्च समावाद्यकलाक्रमादिति॥ समाहितेनेति॥ मंत्रस्य देवतां समाहितेन मनसा ध्यायन्प्रति
लोमेन मूलमंत्रं जपित्वा तमेवावाहयेदिति संबंधः॥ इदं चकायमंत्रविदां बुलमते॥ यदाहुः॥ मूलमंत्रमा
वाह्य मंत्रवित्॥ अन्यच्छिरसि लिलं हि स्पृष्ट्वा विनिक्षिपेदिति॥ समाहितेनमनसेतिप्रसंगसंगत्यात्रो
क्तं॥ परं सर्वत्र ध्याने इदं ज्ञेयं॥ अन्यथा ध्यानस्यैवकर्मिशकात्वात्॥ प्राणेति॥ प्रतिशब्दस्तु स्तुतिरिति क्तो १८

विशेषणं

महाकपिलपंचरात्रे॥ प्रतिष्ठा शब्दः संसिद्धिः प्रतिष्ठत्वात्प्रतिष्ठते॥ बहूर्थत्वान्निपातानां संस्काद्दोषन्नेष्वितिः॥ अ
र्थस्तद्वयमेतस्य गीयते शास्त्रवेदिभिः॥ विशेषसान्निध्ययुक्ति क्रियते व्यापकस्य हि॥ सम्मूर्तौ नावनामंत्रैः प्र
तिष्ठा सान्निधीयत इति॥ तत्रप्रयोगः॥ धूम्रार्चिराद्युक्तानावेशावाहन्याद्यष्टमुद्राः प्रदर्श्य धूम्रार्चिरमृति
संपूज्य प्राणप्रतिष्ठामंत्रेण अमुष्य पदस्थाने षष्ठ्यंतं धूम्रार्चिः पदं प्रक्षिप्य प्राणप्रतिष्ठां कुर्यात्॥ एवं सर्वास्व
पि कलासु॥ अथवा दशानामप्यग्निकलानामेकदैवावाहनादिकं कृत्वा प्रत्येकं पूजां कृत्वा प्राणप्रतिष्ठामंत्रा
मुष्यपदस्थाने सर्वासां षष्ठ्यंतं नामोच्चार्य प्राणप्रतिष्ठां कुर्यात्॥ कलाध्यानं द्वितीयपटलोक्तमत्र ध्येयं।
नत्वत्र तेनास्यायमर्थः॥ प्रथमं दशवह्निकलानां ततो द्वादशसूर्यकलानां॥ ततो षोडशसोमकलानां॥ त
तो दशोकारजानां ततः पश्चात्ततो दशमकारजानां ततः पश्चात्त्तत्पंचानां बिंदुजानांच ततः पश्चात्ततः षोडशनाद
जानां ततः पश्चात्ततः पंचचतुष्ककलानां॥ विचक्षणाद्धमनेन सर्वत्र त्रिः प्राणप्रतिष्ठामंत्रं जपेदिति सूक्तं भवति॥ अ
स्मेष्ट प्रतिलोमेनेति सर्वत्र योजयंति तन्त्रं अनिचारामिषेकविषयं॥ तदा प्रथमं नादजास्तदक ततो बिंदुक
लास्तदक॥ ततोमकारकलास्तदक॥ ततउकारकलास्तदक॥ ततोऽकारकलास्तदक॥ ततः सोमसूर्या
ग्नीनां॥ यदाहुः॥ स्थंडिलाधारगं शंखं पूरयित्वा तदंबुना॥ अष्टमस्यात्मकं पिष्टमष्टगंधं विलोप्य च॥ कला
नादक्रमेणैव स्वस्वनामस्तमाश्रुताः॥ कृत्वेत्वागानि किंप्यस्य प्रत्येकं ताः प्रयोजयेत्॥ अत्रनादकलांतेच विष्णु
योन्यादिकांकला॥ सर्वासां व्यापिनी प्यासां सम्यगावाहयेज्जयेत्॥ स्पृष्ट्वा सुस्थापनमनुं दक्षिणेनैव पाणिना
॥ पुनर्नादकलानामितादिनायोजयेत्त्रिशः॥ बिंदादिनारभेदानां कलाः सोम्यादिने शिखेः॥ अन्येरपिस
मावाहनं चैवानियजेत्क्रमादिति॥ विनिक्षिपेदिति मूलमंत्रेणेति शेषः॥ तदुक्तं॥ पुनस्तोयं कलात्मकं॥ उ
च्चारयेन्मूलमंत्रं कलशे संनिधापयेदिति॥ अन्यत्रापि॥ कलशे तं क्षिपेन्मूलमंत्रमुच्चार्य मंत्रवित्॥ इति॥

शा॰टी॰ ॥गंधाष्टकं विलोप्येमुक्तं तदाह॥गंधाष्टकमिति॥शक्ति विष्णुशिवात्मकमिति॥तदात्मकतो नाम असंतं प्रियत्वं प॰४
सूचितं॥चोरः नाटिकरइति काम्य कुत्र भाषा [illegible] यां॥रोचना गोरस्वना॥कपिगंधिकेति प्रसिद्धं॥कुबेरो बालकं
॥कुष्ठक इति प्रसिद्धं॥सेव्यकं उशीरं॥जटामांसी सुरभिमिति समाहार द्वंद्वैकत्वेन नपुंसकत्वं मुरास्त्वनाम्ना
प्रसिद्धा॥तमालपत्रं तं॥जलवालकं॥कृशानरक्तचंदनं॥एतानि समभागानि आस्याणि॥गणपति संहि
ता योगएवाऽगंधाष्टकमप्युक्तं॥स्वरुपं चंदनं चैव रोचना गरुमेव च॥मदं मृगद्वयोद्भूतं कस्तूरी चंद्रसं
युतं॥अष्टगंधा विनिर्दिष्टं गणेशस्य महाविभोरिति॥प्राणप्रतिष्ठां कुर्वीत सुक्तमते स्तन्मंत्रमाह॥
पाशादिति॥पाशादि अक्षरोनवमे वक्ष्यते॥आत्मा जीव मंत्रः॥अत्र पाशादि अक्षराद्यो आत्म मंत्रश्चतेइ
त्यमेन यं रं लं वं शं षं सं हों मित्येतानि॥बीजानि त्रयोविंशो वक्ष्यमाणानि संगृहीतानीति संप्रदायविदः॥अ
त्र पाशाद्यात्मांतानां प्रसंगमुष्यपदं आवृत्तिरपितेया॥त्रयोविंशोत पावक्ष्यमाणत्वात्॥अमुष्य पदस्या
यमर्थः॥साध्यदेवतायं आदेःषष्ठ्यंतं नाम पदं प्रयोक्तव्यमिति॥तथाच॥इममनुष्यः पुत्रमस्यैविश
एषवःकुरवो राजेस्तस्याः कृते [illegible] प्रयोग कथनेकल्पसूत्रे का त्यायनः असा वित्यपनोदइ
ति॥तद्भाष्यं च॥अपनोदः अदः पदमपनुद्य नाम प्रयोक्तव्यमित्यर्थ इति॥नारायणीयेपि॥अमुकपदं
यद्रूपं यत्र मंत्रे प्रदृश्यते॥साध्याभिधानं तद्रूपं तत्र स्थाने नियोजयेदिति॥तट्टीकायामप्येतन्नार्थ श्रोत
नीकायामेवमुक्तं॥एतत्र पुरुषोत्तममंत्र व्यतिरिक्ते स्थाने अवगतव्यं॥तत्रामुकशब्दस्य द्वितीयपदस्याज
स्मीपदस्य चाप्रयोगादिति॥तथेति॥अमुष्यपदं वदेदित्यर्थः॥वाङ्मनोनयनमिति नयनपदं पर्यायस्य
चक्षुपदस्योपलक्षकं॥केवलं तु ह्येतत्क्रोधात्तयोपदेशः तथाच त्रयोविंशे असावेव॥सर्वेंद्रियाण १८
मुष्यांते वाङ्मनश्चक्षुरंतरइति॥मंत्रा विदामप्युपदेशोचक्षुपदमेवोपदिष्टमुपलभ्यते संप्रदाय वि

दां तथाचाचार्यवचनं॥दीक्षापटले॥तद्धदं मनसी उदीर्य ततनु घ्राणाह्यां त्विति॥तट्टीकाकारः प्रपादाचा
र्यास्तु व्याख्यातवंतः॥वाङ्मनसी अहणं चक्षुश्रोत्र घ्राणानामुपलक्षणार्थमिति॥तथा प्राणप्रतिष्ठा पटलेप्या
चार्यः॥तद्वाङ्मनसं दृशं श्रुतिमथो प्राणं च सप्राणकमिति॥अन्यत्रापि टीकाकारैर्व्याख्यातं॥दृक्छब्देन चक्षुः
एदं गृह्यतइति॥एवं चेत्तस्यात्॥क्वचिन्नयनपदं क्वचिच्चक्षुः क्वचिद्दृक्पदं तत्तद्धक्चिल्लोचन पदमपिस्या
त्॥तच्चायुक्तं॥नहि पर्यायेणोच्चारितोमंत्रः स मंत्रो भवति॥अन्यथा मंत्रो द्वारश्लोका एवमंत्रा भवेयुरिति
स्मान्नयनपदं चक्षुः पदोपलक्षणकमिति सिद्धं॥घ्राणप्राणपदानीत्यत्र मंत्रे प्राणाइति वक्तव्यमिति ज्ञा
तेया॥वागादीनां वक्तुनां पदानां द्वंद्वसमासात्॥त्रयोविंशे वक्ष्यतिचार्यः श्रोत्रघ्राणपदे प्राणाइति॥गद्यस्वा
हा॥नन्वत्रमंत्रे परमुष्यस्थाने साध्यदेवतायंत्रादेर्नामपदप्रयोगः॥तस्य कथं मंत्रत्वमिति चेत्॥मीमांसाधिक
नि रणसिद्धांतसिद्धमिदं मतः॥तथाहि द्वितीयाध्याये नावार्थ्यचरणे॥अनाम्नातेष्वमंत्रत्वमाम्नातेषु विभागः स्या
दित्यत्राधिकरणे ऊहप्रवरनामधेयानां मंत्रत्वमंमंत्रत्वं चेति॥संशय्य तेषाममंत्रत्वं सिद्धांतितं॥तत्प्रसं
गेनेदमपि विचारितं॥यदूहप्रवरनामधेयानां पक्षेपेसर्वस्यैवामंत्रत्वं उत प्रक्षिप्तस्यैवामंत्रत्वं सिद्धांतितं॥
तत्प्रसंगानुप्रसंगेनेदमपि विचिंतितं॥यत्र मंत्रे इममनुष्य पुत्रममुष्याः पुत्रमस्यैविश एषवोराजेत्यादौ स्वर्वना
मेस्थाने राजादिशब्दप्रयोगस्तस्यामंत्रत्वमुतमंत्रत्वमिति तत्राम्नातस्य सर्वनाम्नो राजादिप्रयोगे प्रामाण्यसमर्पक
त्वमात्रमिति ऊहादिवदमंत्रत्वमिति पूर्वपक्षः सिद्धांतस्तु न यदेवं यदि आम्नातस्य सर्वनाम्नो राजादिपदप्रयोगे प्रा
माण्यसमर्पकत्वं स्यात्॥किंतु सर्वनाम्नातस्थाने उच्चारितस्य समर्पकत्वमेव॥तथाहि॥ऊहेत्वप्रयेताजुष्टंनि
र्वपामीति चरुनोद्धृतोमंत्रः विकृतौ सूर्यदेवताके चरौ नायाजुष्टं [illegible] यिति पदमुत्यते इति न च तस्यामंत्रतां ए
वं प्रवरशब्दा सितदेवलशांडिल्यप्रवराभिधायिपदकीर्तनं॥नामधेयशब्दे नयतमानाभिधायि विष्णुशर्मा ८०१

दिनामकीर्तनमभिमतं॥ तेषांच वेदेआनाम्नानात्ववरनामधेयानिकीर्तयेदितिवाक्येनचमंत्रप्रयोज्यविशेष
रूपेणान्वभावात्मंत्रत्वं॥ सर्वनाम्नामाम्नानात्तुराजादिविशेषनाम्नामानंत्यादाम्नातुमशक्यत्वाद्राजादिविशे
षार्थप्रतिपादनार्थमेवास्य स्वत स्तत्प्रतिपादनसामर्थ्यमस्तीतिस्वयंप्रयोगानर्हत्वविशेषवाच्यानेवप्रयोगा
र्हानुपलक्षयति॥ यथातस्यपसमित्यादौ अतो विवक्षितस्वरूपराजाद्यर्थविशेषशब्दान्मंत्रवाक्ये निवेशिनो
दर्शयतीमंतदर्थमेवसर्वनामपदं दृष्टार्थेनाध्ययनविधिना ध्यापितमितिनिश्चीयते॥ तस्माद्राजादिनाम्नामप्या
म्नातत्वामंत्रत्वमेवेति॥ इंद्रवहत्वाति॥ इंद्रवाक्ये मता विशेषः॥ चषकं कलशस्सजातीयंशरावादिः॥ विधिव
दिसनेनमहलमंत्रोच्चारणमुक्तं॥ कौममीमतमां भेवं॥ नहभावे पट्टवस्त्रादि॥ अमत्र एकवस्त्रवेष्टनमप्युक्तं॥ अ
तिरस्त्रमंतरेणौ वविश्रुद्धेनन वेनच॥ मायातत्वस्वरूपेण वेष्टयेद्वाससा घटमिति॥ मंत्रस्पदेवतामिल्लेकम
त्रदीक्षायां॥ पंचायतनदीक्षापक्षे पंचकलशान्सस्थाप्यतत्तत्कलशेतत्तद्देवता मावाहयेदिति मंत्रोत्पन्नेनोक्तं॥
तदुक्तमाचार्यैः॥ यो क्तेनैवंकलशविधिमेकेनवानेककुंभैरिति॥ पंचायतनदीक्षायां देवस्थापनक्रमोक्तोप्या
नमालायां॥ ॥यदातु शंकरंमध्ये ईशान्यां श्रीपतिं यजेत्॥ आग्नेय्यांच तथा हेरंबं नैरृत्यां पार्वतीसुतं॥ वायव्यां
च सदा दुर्गा भवानी भक्तिवत्सला॥१॥ यदा तु मध्ये गोविंदमैशान्यां शंकरं यजेत्॥ आग्नेय्यां गणनाथं च नैरृत्यां
तपनं तथा॥ वायव्यामंबिकां चैव यजेन्मंत्री समाहितः॥२॥ स्वस्थानेस्थ यदा मध्ये ईशान्यां पार्वतीपतिं॥ आग्नेय्या
मेकदंतं च नैरृत्यामच्युतं तथा॥ वायव्यां पूजयेद्देवीं नागमोहैकनिमिकां॥३॥ भवानीं तु यदा मध्ये ईशान्यां
माधवं यजेत्॥ आग्नेय्यां पार्वतीनाथं नैरृत्यां गणनायकं॥ प्रद्योतनं तु वायव्यामाचार्यस्तत्र पूजयेत्॥४॥ हेरंबं तु
यदा मध्ये ईशान्यामच्युतं यजेत्॥ आग्नेय्यां पंचवक्त्रं तु नैरृत्यां जगदंबिकां॥ वायव्यां द्युमणिं चैव यजेन्मंत्री स २०
तंद्रितः॥५॥ ॥स्वस्थानवर्जिता देवाः शोकदुःखभयप्रदाः॥ तन्मंडलस्थितो राजा साधकश्च विनश्यतीति॥

अन्यत्रापि॥ शंभौ मध्यगते हरीनहरभूदेवी हरौ शंकरे नास्येनागसुतारवी हरगणेशाजांबिकास्थापिता॥ देवी
विष्णुहरैकदंतरवयो लंबोदरे जेश्वरा येनाः शंकरभागतो ति सुललभावस्तास्तेहानिदा॥ इति॥ पठितान्यपि
॥ शंनारंगदेमध्या आशंगर भेजातःस्कंशं॥ गनादेदेनाशंगरग नाशंभस्वदिक्पूज्या इति॥ अत्र आग्नेयादिक्रमे
णस्थापनमुक्तं॥ सूर्यैकदंताच्युतशक्तिरुद्रा विघ्नेश्वरेशाद्रिसुता कृशानु॥ श्रीनाथविष्णुगणगांबिकेशा भूतं
शहेरंबपतंगरुद्रा॥१॥ श्रीशो मुरुरुर्याखुरथांबरुद्राः प्रदक्षिणं मध्यविदिक्षु पूज्या॥ स्वस्थानगाः सर्वमनो
रथाप्त्यै अर्थं विनिघ्नंति परत्र संस्था इति॥२॥ अन्यत्रापि॥ मध्ये स्यर्क हरिं गणेन नगजा सव्यगणं मध्यतः शंभ्वा
र्यरवि चिस्वीरविमध्ये चि भाजगशक्तीश्वराः॥ मध्ये शक्तिमपेशविघ्नरवयो विष्णुश्च मध्ये हरं स्यर्के नास्य विद्धि
वाच्युताद्विविना आग्नेयकोणादिमशतिः॥ अत्रोभयत्र स्थापनक्रमे फलतः साम्यमेव॥ एवं तु गणपतिमार
भ्य यत्र गणपतेर्मुख्यत्वं तत्रस्त्र्यमारभ्येति ज्ञेयं॥ यहाकु॥ मुरवे पुष्पांजलिं दत्वा पश्चाद्गणेशाद्यर्चनं भवेदे
व॥ गणेशा एव मुख्य श्चेत्तत्र सूर्यक्रमाद्भवेदिति॥ एतद्व्याख्यानमनुनयथा कुर्वंति॥ पुष्पांजलिमिति मुरवेप्य
प्रमतः पुष्पांजलिमात्रं कृत्वा पश्चाद्गणेशाद्यर्चनं कृत्वा मुख्यार्चने ति॥ अपरं तु पुष्पांजलिशब्देन कृत्स्नमो
यः पुष्पांजलिः सम्यक् हीतः॥ तेन मुख्यं देवतानंतरं गणेशाद्यर्चनमिति॥ एतच्च स्वस्वगुरुसंप्रदायानुसारेण
रु ज्ञेयं॥ अयमेव देवतास्थापनक्रमो निर्दिष्टायामपि समानः॥ तत्र निलम्बराशालग्रामे मणौ यंत्रे वा पाषाण
दिप्रतिमायां वा कार्या॥ तदुक्तं ज्ञानमालायां॥ निविज्ञारतमो स्यायमातो विप्रपराः सुराः॥ तल्लुलाचरितं देवा
शापो दत्तो ति शंकरः॥ पार्वतीशापसंयुक्ता देवा श्रमत्वमागताः॥ विष्णुनाशंकरेणापि तत्थान्ये सुरसत्तमैः
॥ संस्कृतावरदाज्जाता पा षाणत्वेपि नो सुराः॥ स्वस्थाने पूजयिष्यंति पुरुषार्थचतुष्टयं॥ दानुसनत्थमिहा
यादेवा एव चतो षितिः॥ तस्मात्पूजा विधातव्या पाषाणप्रतिमासु चेति॥ सयरा वर्षयच रात्रे॥ मृन्मयादिष्व

दिता जोहसार लजानया॥ शैलजा गंधजा चैव कौसुमी सप्तधा स्मृता॥ कौसुमी गंधजा चैव मृन्मयी प्रतिमा॥
दिता॥ तत्काल पूजिता श्चैताः सर्वकामफलप्रदा इति॥ प्रहा कपिल पंचरात्रेपि॥ शैलजा लोहजा वापि
रत्नजा वाथ दारुजा॥ मृन्मयी चेति पंचैताः प्रतिमाः परिकीर्तिताः॥ सर्वे षामेव देवानां मृत्तानां लायशः प्र
दा॥ दारुजा कामदा प्रोक्ता सौवर्णी भुक्तिमुक्तिदा॥ राजती स्वर्गदा प्रोक्ता ताम्री त्वायुष्यवर्द्धनी॥ कांस्यजा चाप
दे हंति रेति का शत्रुनाशिनी॥ सर्वभोगप्रदा शैली स्फाटिकी दिप्तिकारिका॥ महाभोगप्रदा ख्याता मृन्मयी
खलु शोभना॥ मानांगुल प्रमाणेन दश पंचांगुलात्मिका॥ गृहे तु प्रतिमा हस्तान्नाधिका शस्यते इति॥
अन्यत्रापि॥ अंगुष्ठपर्वमारभ्य वितस्तिं यावदेव तु॥ गृहेषु प्रतिमा कार्या नाधिका शस्यते बुधैरिति॥ य
त्तु॥ सौम्या तु हस्तमात्रा वसुदा हस्तद्वयोच्छ्रिता प्रतिमा॥ क्षेमसुभिक्षाय भवे त्रिचतुर्हस्तप्रमाणा चेति॥
तत्स्थापित प्रतिमा विषयं ज्ञेयं॥ मृन्मय्यां तत्रैव विशेषोक्तः॥ मृन्मयीं प्रतिमां कृत्वा यथा विज्ञानि बोध
मे॥ पक्वापक्वा द्विधा प्रोक्ता मृन्मयी प्रतिमा क्रमात्॥ सर्वलोकान् संशांति मृच्छिद्रग्धां च मृन्मयीं॥ अपक्वा प्रति
मा शस्ता सैव कार्या विचक्षणैः॥ सुधयाने वकर्त्तव्या नाश्म चूर्णैः कदाचन॥ गृहे वमृन्मयी कार्या यथा वद्गुरुपूर्व
शः॥ ब्राह्मणस्य सिता मृद्वै क्षत्रियस्यारुणा मता॥ विप्रां पीतां न वैश्यस्य शूद्रस्य कालिकेति॥ अन्यत्र वि
शेषः॥ नृपमयमस्तंगायां हीनांगायामकल्पना कर्त्तुः॥ क्षामोदर्यां तु भयमर्थविनाशः कृशांगायां॥ मरणं
तु सन्नतायां शस्त्रनिपातेन निर्दिशेत् कर्तुः॥ वामे विनता पत्नी दक्षिणा विनता हिनस्त्यायुः॥ अंधत्वमूर्द्ध
दृष्टे करोति चिंतामधोमुखी दृष्टिः॥ सर्वप्रतिमास्वेवं शुभाशुभं भास्करोक्तमवगच्छेदिति॥ तथान्यत्रापि॥ ना
धिकांगी न हीनांगी कर्त्तव्या देवता क्वचित्॥ अधिकांगी स्त्रियं हन्यात् कृपा चैवार्थनाशिनी॥ कृशोदरी तु दु
र्भिक्षं निर्मांसा धननाशिनी॥ वक्रनासा तु दुःखाय संक्षिप्तांगी भयंकरी॥ चिपिटा दुःखशोकाय अनेत्रा २२

नेत्रनाशिनी॥ दुःखदा हीनवक्त्रा तु पाणिपाद कृशे तथा॥ हीनांसा हीनजंघा च भ्रमोन्मादकरी नृप॥ शुष्कवक्त्रा
च राजानं कटिहीना च मारयेत्॥ पाणिपादविहीना या जायते मारको महान्॥ जंघाहीना च या मूर्त्तिः शत्रुकल्याण
कारिणी॥ पुत्रमित्रविनाशाय हीना वक्षस्थले तु या॥ संपूर्णा विपुला या तु आयुर्लक्ष्मीप्रदा सदा॥ एवं लक्षणमासा
द्य कर्त्तव्या मन्त्रिरुत्तमेति॥ अन्य विशेषः॥ खंडिते स्फुटिते भ्रष्टे दग्धे मान विवर्जिते॥ यागहीने यवोच्छिष्टे पतिते दुष्ट
भूमिषु॥ अन्यमंत्रार्चिते चैव पतितस्पर्शदूषिते॥ दृश्य स्वेतेषु नो वक्तुः सन्निधानं दिवौकसः॥ इति सर्वगतो वि
ष्णुः परिनाशांच कारहेति॥ तथान्यत्र॥ खंडितां स्फुटितां जीर्णाम् अभिवृत्तां च वह्निना॥ प्रतिमां वर्जयेद् धीमान् दुर्गां
स्थल रुग्णां श्रुतां॥ निक्षिपे द्दारुजाम-शैलतोयान्याम् अप्सु निक्षिपेत् इति॥ तथा॥ एकाहपूजा विहितो क्रयीहि
गुणमर्च्चनं॥ द्विरात्रे तु महापूजां संप्रोक्षणमतः परं॥ मासादूर्ध्वं भिन्ने काहपूजायदि विदन्मते प्रतिष्ठे वेष्यते
केचित् केचित् संप्रोक्षणं क्रमशः॥ संप्रोक्षणं लक्षणं यथा तत्रैव॥ संप्रोक्षणं तु देवस्य रेवमु द्रास्य सर्ववत्॥ पंच
वक्त्रक्रमेणैव स्नापयित्वा मृदं भसा॥ गवां रसैश्च संस्नाप्य दर्भतोयैर्विशोध्य च॥ प्रोक्ष येत्प्रोक्षणी तोयैर्म
लेना शोत्तरं शतं॥ सपुष्पं सकुशं पाणिं न्यस्य देवस्य मस्तके॥ पंचवारं जपेन्मूलम् अष्टोत्तरशतोत्तरं॥ ततो
मूलेन मुद्रादि पीठां तं संस्पृशेद् हृदि॥ तत्वन्यासं लिपिन्यासं मन्त्रन्यासं च विन्यसेत्॥ प्राणप्रतिष्ठा मंत्रेण प्रति
ष्ठापनमाचरेत्॥ पूजां च महतीं कुर्यात् स्वितं त्रोक्तां यथा विधि॥ यागहीनादिषु प्रायः संप्रोक्षणं विधिः स्मृत इति
॥ अन्यत्रापि॥ शालिग्रामे मणौ यंत्रे मंडले प्रतिमासु च॥ नैव प्रजा तत्रैका यानित्वकेवल मूललक्ष्य इति॥ रामार्
र्चनापनीयेपि॥ सो भयस्या स्यदेवस्य त्रिग्रहादिकल्पना॥ विना यंत्रेण चेत्पूजा देवता न प्रसीदतीति॥ संहि
तायामपि॥ यंत्रं मंत्रमयं प्राहु र्देवता मंत्ररूपिणी॥ यंत्रेणापूजिता देवः सहसा न प्रसीदतीति॥ तथा॥ स
वेषामपि मंत्राणां यंत्रे पूजा प्रशस्यत इति॥ इशान संहितायां तु॥ शा लिग्रामे प्रतिष्ठेव न तथैव च के चित्रेपटेवा

स्तानं नमो ॥ सोहादसौ ॥ स्थंडिलगां धजेदेव सुरश्रेष्ठ त्रिवर्गादि निमंत्र्य मित्यादि ॥ शिवप्रसादिशिम मैत्रि
वलिंगे स्थिरे वा चले कार्यः ॥ तत्र चले पाषाणादि लिंगे प्रतपचस्यादिलक्षणमुक्तमरुव यथा द्रष्टव्यं ॥ रत्न
लिंगादौ तु तनक्षणमाविष्टिन दोषः ॥ तदुक्तं हयशीर्षपंचरात्रे ॥ न जातिलक्षणोद्धारं रत्नजानां च जात्मना
॥ सुप्रनालक्षणं तेषां सवर्णजानामपि द्विज ॥ न [illegible] लक्षणोद्धारं तर्थात्पाषाणलिंगवत् ॥ अत्र लानां ने
उमानोक्तं चिष्यत लक्षणं ॥ कल्पनायच देवस्य स्थापयलिंगमयवा विधिः ॥ चललिंगे तु शास्त्रेण लक्षणं
कल्पयेद्गुरुः ॥ मनसा चिंतयेद्वापि लक्षणं लिंगसंस्थितमिति ॥ सोमशंभुनापि ॥ रत्नजे लक्षणोद्धारो न लो
हेन सरिद्भवे ॥ लिंगेषु चलनोद्दिष्टं नहष्टं क्वचिदागमे ॥ स्वरूपं लक्षणं तेषां प्रभा रत्ने पुनिर्मज्जितेति ॥ अन्य
च्च विशेषः ॥ गृहे लिंगद्वयं नार्च्यं गणेशद्वयमेव च ॥ शक्तित्रयं तथा शंखं मत्स्यादि दशकांकितं ॥ द्वे चक्रे
नार्चयेन्नैव शालग्रामशिलाद्वयं ॥ द्वे चक्रे द्वारकायास्तु तथा स्यार्यद्वयं बुधः ॥ एतेषामर्चना नित्यमुद्वेगं प्रा
प्नुयाद्गृहीति ॥ आवाहयेदित्युक्तं ॥ ॥ तत्रावाहनप्रकारमाह ॥ ॥ स्वस्थाना हृदयकमलात् ॥ अन्ये
सूर्यमंडलादित्याहुः ॥ तदुक्तं वैहायसी मंत्रकोशे ॥ स्वर्याक्रितो वा हृदयारविंदाद्वावाहयेन्नंदसुतं सुवेष
मिति ॥ अन्यत्रापि ॥ आवाहयेन्महादेवीं रुद्रयां भुजगकुरात् ॥ सूर्यमंडलतो वापि स्वीयाद्वा हृदयानन
इति ॥ ईश्वरप्रेरेणेति ॥ ब्रह्मरंध्रद्वाराकस्तुमाहकांजोजे पुष्पसंचय इति ॥ व्यधिकरणे सप्तम्यौ ॥ सुधीः
मूलमंत्रमुच्चार्य स्वस्थानात्तेजः सुषुम्णावर्त्मना आनीय ब्रह्मरंध्र [illegible] नासिकारंध्रनिर्गतं तत्तेजस्तं करस्थमा
हकांजोजे पुष्पसंचये संयोज्य मूर्त्तावावाहयेदिति संबंधः ॥ तदुक्तं ॥ देवं सुषुम्णामार्गेण आनीय ब्रह्मरं
ध्रकं ॥ वामनासापुटे ध्यात्वा निर्यतं स्वांजलिस्थितं ॥ पुष्पमारोप्य तत्पुष्पं प्रतिमादौ निधापयेदिति ॥ तत्रा
वाहनमाह्वानं ॥ तदावाहयामि त्वम्मूलमंत्रांते आवाहितो भव नम इति प्रकारेण ॥ आगमोक्तश्लोकांते वा २२

य स्वमूलमंत्रांते आगमश्लोकमुच्चार्येति सुधीस्थितेनोक्तं ॥ अयमेव मुख्यप्रकारः ॥ संहितायामपि ॥ रूपमंत्रं मंत्र
मुक्त्वा एवमित्युक्त्वा बीजांते धूपमंत्र उद्धार्स्व सरस्वादिनोक्तं ॥ एवमग्रेपि स्थापनादावप्युह्यं ॥ श्लोकस्तु ॥ आत्म
संस्थमजं शुद्धं त्वामहं परमेश्वर ॥ अरण्यामिव हव्याशं मूर्त्तावावाहयाम्यहमिति ॥ इदमावाहनादि शाल
लिग्रामादौ न कार्यं ॥ यदाहुः ॥ शालिग्रामे स्थावरे वा नावाहनविसर्जनं ॥ शालग्रामशिलादौ यान्नित्यं संनि
हितो हरिमिति ॥ अन्यत्रापि ॥ उद्वासावाहने स्तः स्थिरायामुद्धवार्चने ॥ अस्थिरायां विकल्पः स्यात्स्थंडिले तु भवेद्द
यं ॥ शालिग्रामार्चने नैव ह्यावाहनविसर्जने इति ॥ अत्र पंचायतनपक्षे प्रत्येकं देवतानामावाहनं ततः प्रत्ये
कं स्थापनमिति ॥ पदार्थानुसमयो वा ॥ उतावाहनादि नैवेद्यांतं एकत्र समाप्य पश्चादेवमन्यत्रेति कांडानुस
मय इति ॥ संशये अत्र कांडानुसमयं इति सिद्धांतः ॥ ततो मूर्ध्नि पुष्पांजलिं दत्वा गणेशाद्यर्चनं नवेदित्युक्तं ॥
तत्राद्यर्चनशब्द [illegible] वाचकः ॥ सच्चावाहनादि नैवेद्यांतः इदं पंचमाध्याये द्वितीयचरणे वचनानुपरिग्रा
णांतमित्यधिकरणे सिद्धांतितं ॥ सुधीः संस्थापनं विदध्यादिति संबंधः ॥ संस्थापनं नाम संस्थापिन्या ॥ श्लोक
स्तु ॥ तस्येयं महिमानं त्रैस्तिस्थानं सर्वगं प्रभो ॥ भक्तिस्नेहसमाकृष्टं दीपवत्स्थापयाम्यहमिति ॥ सुधीरित्यने
नासनोपवेशापेक्षं [illegible] इत्युक्तं भवति ॥ तद्यथा ॥ मूलमंत्रांते सर्वांतर्यामिणे देव सर्वबीजमयं शुभं ॥ स्वात्म
स्थाय परं शुद्धमासनं कल्पयाम्यहं ॥ आसनं गृहाण नमः ॥ ततो मूलमंत्रांते ॥ अस्मिन्नरासने देव सुखासी
नोक्षरात्मक ॥ प्रतिष्ठितो भवेशान त्वं प्रसीद परमेश्वर ॥ उपविष्टो भव नमः ॥ संनिधापनं नैकट्यावस्थितं प्रा
र्थनं तत्संनिधापन्या ॥ श्लोकस्तु ॥ अनन्यात्तवदेवेशामूर्त्तिशक्तिरियं प्रभो ॥ सांनिध्यं कुरु तस्यां त्वं भक्ता
नुग्रहतत्पर इति ॥ सन्निरोधः संनिरोधनं [illegible] संनिरोधिन्या ॥ श्लोकस्तु ॥ आज्ञया [illegible] दे व
वेश [illegible] गुणानुबुधे ॥ [illegible] इति ॥ सिद्धांतसारे ॥ आवाहन्यादिना

मन्यथाजसमुक्तं॥ सूतएवानिहएसि(प)नत्वस्येहार्चनादिषु॥ सादरसन्मुखामोदमदावाहनमुच्यते॥ शिवस्या
वाहितस्यास्य स्थिराद्देवेशुसंततं॥ स्थिरीकरणमुद्रेयं ख्याप्यतेमत्रिणोऽर्चने॥ इत्तांप्रपुष्पमानांकरहीसंमुख
हार्दिकं॥ कर्तुसामर्थ्यमस्येहनयानिधांप्रचक्षते॥ आसमाप्तेरुपायाः सांनिध्यंहि शिवस्यथत्॥ संसन्निरो
धउद्दिष्टोविभोरस्यापिशक्तितस्तादिना॥ अनंतरमित्यनेनसम्मुखीकरणं प्रार्थनंचमुद्राद्वयेनोक्तं॥ श्लोकोऽ
॥ अशाना(द्)मनिस्वाहावेकल्पाज्ञाधनस्यच॥ यदङ्गीतं भवेत्कर्मं नत्साप्यनिमुखोभव॥ दशापायूषवर्षिया
हरयन्यस्तावेष्टरं॥ इतीवायससंसक्तैः स्थितोभवमहेश्वरेति॥ मुद्रालक्षणंयथा॥ मुष्टिद्वयस्थितांगुष्ठौसन्मु
खौचपरस्परं॥ संश्लिष्टामुष्टिमौऽप्यक्तिप्यसन्मुखमुद्रिकेति॥ प्रस्तांगुलिकौहस्तौमिथःश्लिष्टौचसन्मुखौ
॥ कुर्यात्स्वहृदयेसेयंमुद्राप्रार्थनसंज्ञिकेति॥ सकलीकरणं हृल्लरूपत्वेनावस्थितिप्रार्थनं॥ तच्चदेवतांगोषड
गन्यासात्॥ अवगुंठनं अयोग्यदृष्टविषयत्वापादनं॥ तदवगुंठन्या॥ श्लोकस्तु॥ अनेकवाऽत्र नमस्कुर्यो
त्रहृरामितद्यते॥ स्वतेजःपंजरेणाशुवेष्टितोभवसर्वतइति॥ अमृतीकरणमानंदरूपेणावस्थितित्वं॥ तद्धे
नुमुद्रया॥ परमीकरणंसर्वपराधसहिष्णुत्वं॥ तन्महामुद्रया॥ स्वमुद्राभिरिति॥ त्र्यंबकविंशोवक्ष्यमाणाभिः॥
समाहितस्त्वनेनमूलमंत्रमुक्तिमाहकाहराति देवदेहेविम्बसेदिमुक्तं भवति॥ एतायावक्ष्यमाणलान्॥ अथेति॥
उपचारशब्दार्थोतंत्रमालायामुक्तः॥ नत्माचैतेस्मादेवेसाधकंदेवसंनिधिं॥ चारयंतियतस्तस्मादुच्यंतेसुपचा
रकाः॥ समीपचारणाद्वापिफलानांतेनथोदिताइति॥ मूलेषोडशउक्ताः॥ तंत्रमालायामन्येपि॥ तद्यथा॥ अष्ट
त्रिंशत्षोडशार्कदशपंचोपचारकाः॥ तान्निगन्यप्रवक्ष्यामिकेकेतैतैःकृतैश्चकिं॥ आसनंप्रथमंतेषांमावाह
नमुपस्थितिं॥ सांनिध्यमाभिमुख्यंच स्थिरीकृतिप्रसाधनं॥ अर्घ्यंचपाद्याचमनेमधुपर्कमुपस्पृशं॥ स्नानं
नीराजनंवस्त्रमाचामंचोपवीतकं॥ पुनराचामभूषेचदर्पणालोकनंततः॥ गंधपुष्पेधूपदीपौनैवेद्यंचत २२

तःक्रमात्॥ पानीयंतोयमाचामंहस्तवासःस्ततःपरं॥ तांबूलमनुलेपंचपुष्पदानंपुनःपुनः॥ गीतवाद्यंतनपा
नृत्यंस्तुतिंचैवप्रदक्षिणां॥ पुष्पांजलिनमस्कारावष्टत्रिंशत्समीरिताइति॥ मंत्रतंत्रप्रकाशेपि॥ आसनंप्रथमं
तेषुततश्चावाहनंमतं॥ उपस्थानंचसांनिध्यमित्यादिनापुष्पांजलिनमस्कारौविसृष्टौसेनर्वसमा॥ त्रिंश
चाष्टौसमाख्याताउपचाराममनीषिभिरीरितेन॥ षोडशमूलेस्पष्टाः॥ तथा॥ आसनंस्वागतंवस्त्रंभूषेस्तु
स्तुद्वादश॥ अर्घ्यपाद्याचमान्येवमधुपर्कविमान्यपि॥ गंधादयोनिवेद्यांताउपचारादशक्रमात्॥ गंधपु
ष्पधूपदीपौनैवेद्यंपंचसंस्मृताः॥ सपर्यापंचधाप्रोक्तातासामेकांसमाचरेदिति॥ प्रयोगसारेषष्ठाअप्यु
क्ता॥ अर्घ्यंगंधंततःपुष्पमक्षतंधूपमेवच॥ दीपोनैवेद्यसज्ञांगासपर्यैस्मिरेजगुरिति॥ स्वागतमिति॥ कु
शलप्रश्नमिति॥ स्वागतमित्यस्यार्थकथनं॥ श्लोकस्तु॥ यस्यदर्शनमिच्छंतिदेवाःस्वाभीष्टसिद्धये॥ तस्मैतेप
रमेशायस्वागतंस्वागतंचमे॥ इति॥ एतदनंतरंसुस्वागतमपि॥ मूलमंत्रांते॥ कृतार्थोऽनुगृहीतोस्मिसफ
लंजीवितंमम॥ आगतोदेवदेवेशसुस्वागतमिदंपुनरिति॥ पाद्यमिति॥ हृदयायनमोमंत्रेण॥ श्लो
कस्तु॥ यद्भक्तिलेशसंपर्कात्परमानंदसंभवः॥ तस्मैतेचरणाब्जायपाद्यंशुद्धायकल्पये॥ इति॥ अत्रनमो
मंत्रस्तुचार्थश्लोकमुच्चार्यपाद्यंदद्यात्तनमइतियाज्ञवल्क्यमनुसरेत॥ यत्रमंत्रविशेषोनोक्तस्तत्रमूलमं
त्रएवसेयः॥ एतदिति॥ श्यामाकःसांवतिप्रसिद्धः॥ महाकपिलपंचरात्रेपि॥ दूर्वांचविष्णुपत्नींचश्यामा
कंपद्ममेवच॥ पाद्यांगानिचचत्वारिकथितानिमनीषिभिरिति॥ सुधामंत्रेणाचमित्यनेन॥ श्लोकस्तु॥ वेदाना
मपिवेदायदेवानांदेवतात्मने॥ आचमनंकल्पयामीशशुद्धानांशुद्धिहेतवइति॥ जातिजातिफलंकंकोलं
कोशफलं॥ कनाचकेति(क)मकरंच्यनाप्ययां॥ तदुक्तंआगमसिंहितायां॥ तथाचमनपात्रेपिदद्याज्जातिफ
लंमुने॥ लवंगमपिकंकोलंशस्तमाचमनीयकमिति॥ महाकपिलपंचरात्रे॥ आचमनीयद्रव्याण्यपि

याज्ञानि॥ कर्पूरमगरुं पुष्पं द्रव्याण्याचमनीयकमिति॥ अस्य त्रविशेषः॥ अर्घमिर्दं राति पाद्यं त्रिर्ददाति॥ आचमनीय
षट् ददाति॥ आगनायतथा चायंस्त्रि॥ उमासनगायत्र्य प्रान्ते गंडकामस्य दद्याद् दर्घं विचक्षणः॥ आगते स्नानकाले
चनैवेद्योपक्रमेतथा॥ पाद्यस्याचिसमुद्दिष्टः सम्यस्त्रिविधो बुधैरिति॥ शिरोमंत्रेण स्वाहेत्यनेन॥ महाकपिलपं
चरात्रे॥ कुशाग्रस्थाफलमुक्तं॥ सिद्धार्थकं च दूर्वाचतिलमेव च॥ यवगंधफलं पुष्पमष्टांगमर्घमुच्यते इति॥
सर्वदेवानामिति सर्वत्र संबध्यते॥ पाद्याद्युक्तद्रव्याणि स्वीयं दैवतासु समानानीत्यर्थः॥ श्लोकस्त॥ तापत्रयहरं दिव्यं
परमानंदलक्षणं॥ तापत्रयविनिर्मुक्ति तवार्घं कल्पयाम्यहमिति॥ मधुपर्कमिति॥ श्लोकस्त॥ सर्वकालुष्यहीना
यपरिपूर्णसुखात्मक॥ मधुपर्कमिदं देव कल्पयामि प्रसीद मे रति॥ अर्घविप्रोक्तद्रव्याभावे केवलतंडुलानेव
निक्षिपेत्॥ तदुक्तं मंत्रतंत्रप्रकाशे॥ द्रव्याभावे प्रदातव्याः शालिनास्तंडुलाः शुभा रति॥ अन्यत्रापि॥ तंडुलान्वा
क्षिपेत्तेषु द्रव्याभावे तु तत्स्मरन्निति॥ तेनैव मनुनाखुधाण्ठतेस्यर्थः॥ श्लोकस्त॥ उच्छिष्टोप्यशुचिर्वापि यस्य स्मरणमात्र
तः॥ शुद्धिमाप्नोति तस्मै ते पुनराचमनीयकमिति॥ मधुपर्कं तिराचमनमुपलक्षणं॥ तेन स्मरणमुक्तं निमित्ते ष्याचमनं द
द्यात्॥ स्नानांते वासोदानांते उपवीतदानांते नैवेद्यांते॥ तदुक्तं महाकपिलपंचरात्रे॥ स्नाने नैवेद्ये वस्त्रे दद्यादाचम
नीयकमिति॥ एवं षड्ष्याचमनीयानि॥ तदुक्तं ज्ञानमालायां॥ पाद्ये च मधुपर्के च स्नाने वस्त्रोपवीतयोः॥ नैवेद्ये वाच
मं देयमिति॥ स्नानात्पूर्वं महाकपिलपंचरात्रे विशेषः॥ गंधतैलमपोदद्याद्देवस्याप्रतिमं ततः रति॥ श्लोकस्त॥ स्नेहं गृ
हाणस्नेहेन लोकनाथ महाशय॥ सर्वलोकेषु शुद्धात्मन् ददामि स्नेहमुत्तमं॥ तत उद्वर्तनं महाकपिलपंचरात्रे॥ रजनीस
हदेवीच शिरीषोज्लमणापि च॥ सहानह्याकुमायाणि उद्वर्तनमिहोच्यत इति अन्यत्रापि॥ अष्टंगोद्वर्तनं चापि महा
स्नानं समाचरेदिति॥ गंधाद्भिरिति॥ तदुक्तं मंत्रतंत्रप्रकाशे॥ शुद्धतोयात्क्षंधतोयं श्रेष्ठं शतगुणोत्तरं॥ गंगादितीर्थतो २४
यानां फलं शास्त्रप्रणोदितं॥ तत्रतत्राभिगंतव्यमिति॥ तथा॥ नाहरेत्मलीनं तोयं केशकीटादिदूषितं मलिनेनापि भो

क्तेन व्यंगेनाशुचिनोतथेति॥ तत्र वाचिविशेषः॥ अकृतागंधपुष्पाणि स्नानमात्रेत पात्रयमिति॥ श्लोकस्त॥ परमानं
दबोधाब्धिनिमग्ननिजमूर्तये॥ सांगोपांगमिदं स्नानं कल्पयाम्यहमीशत इति॥ एतदंतरं शंखजलेन देवाया
भिषेकं कुर्यात्॥ यदाह॥ व्रातं सहस्रमयुतं शंखनावाप्यभिषेचयेत्॥ शंखस्थं पयनैवसपुष्पेण चदेवतामिति॥
अन्यत्रापि॥ शंखस्थेनापगंधतोयेन संस्नाप्य जगदीश्वरमिति॥ अत्र विशेषः॥ महाभिषेकं सर्वत्रांस्वेनैव प्रकल्पयेत्
॥ सर्वत्रैव प्रशस्तोऽयं शिवस्तवार्चनविनेति॥ तत्र विशेषस्तंत्रांतरे॥ प्रतिमापटयंत्राणां नित्यं स्नानं न कारयेत्॥ का
रयेत्पर्वदिवसे तथा मलनिवारणमिति॥ वाससी इति द्विवचनेनोत्तरीयमपि गृहीतं॥ श्लोकस्त॥ मायाचित्रपट
छन्ननिजगुह्योरुतेजसे॥ निवारणाय विज्ञानवाससे कल्पयाम्यहं॥ यमाश्रित्य महामाया जगत्संमोहिनी सदा॥ तस्मै ते प
रमेशाय कल्पयाम्युत्तरीयकमिति॥ तत्र विशेषो मंत्रतंत्रप्रकाशे॥ पीतं कौशेयवसनं विलोपिता सैः प्रकीर्तितं॥ रक्तोश
कं विष्णुर्ईश्वरस्य सितं प्रियं॥ मलहीनं तथाच्छिद्रं क्षौमं कार्पासमेव च॥ तैलादिदूषितान्रोगः सच्छिद्राद्व्यतास्र
वेत्॥ जीर्णाद्दरिद्रता कर्तुर्मलिनात्कांतिहीनतेति॥ यज्ञोपवीतमिति॥ श्लोकस्त॥ यस्य शक्तित्रयेणेदं संप्रोतमखिलं ज
गत्॥ यज्ञसूत्राय तस्मै ते यत्तस्त्रं प्रकल्पय इति॥ हाराद्याभरणैरिति॥ श्लोकस्त॥ स्वभावसुंदरांगाय नानाशक्त्याश्र
यायते॥ भूषणानि विचित्राणि कल्पयाम्यमराचितेति॥ न्यासेति॥ उपचारात्सर्वकृतोयोदेवदेहेन्यासस्तन्मेराम्नल
मंत्रपुटितमेकैकमक्षरं सकलमर्थः॥ वर्णैर्मंत्रपुटितैः क्रमशः श्वेताद्यैर्मासकमादन्नियजेत्सकलास्तु मंत्री॥ गंधादिभिः
प्रथमतो मनुदेवतासु त्रैलोक्यमोहनविधिप्रथितैः प्रयोगैः ... चार्यीकैः॥ अभ्यर्चदेवीमिति॥ अत्र देवीमित्युपलक्ष
ण॥ ... देवतामित्यर्थः॥ क्वचिद्देवमिति पाठः॥ संपुटितलक्षणं त्रयोविंशेवक्ष्यति॥ ततो गंधाद्यैरभ्यर्च्य पुनरंतरमंगा
दिभ्यावरणान्यर्चयेदिति क्रमं विधायकं गंधाद्यैरित्यादि॥ चंदनपुष्पश्रगादीनिति तत्कर्मो ... त्यादि॥ अस्य
 कस्तायमाशयः॥ पुष्पं देवे गंधपुष्पैरलंकारादिलोकपालांतं ... पादिद्यादिति॥ गंधाद्यैरित्युक्तं तत्र

रूपमेवाह॥ गंधद्रव्यादिना॥ श्लोकस्तु॥ परमानंदसौरभ्यं परिपूर्णदिगंतरं॥ गृहाण परमं गंधं कृपया परमेश्वरि॥ इति॥ स्ट
गं पवानेकमिश्रितेकेति॥ यदाहुः॥ शंखपात्रस्थितं गंधं मंत्रेद्द्यात्कनिष्ठयेति॥ ततो गंधमुद्रां प्रदर्शयेदिति॥ तत्र लक्षणं
॥ कनिष्ठांगुष्ठसंलग्नाया धमुद्रा प्रकीर्तितेति॥ कमलेरोदि॥ अक्षतरक्ते॥ श्लोकस्तु॥ तुरीयवनसंभूतं नानागुणमनोह
रं॥ आमंदसौरभं पुष्पं गृह्यतामिदमुत्तममिति॥ ततः पुष्पमुद्रां प्रदर्शयेत्॥ केतकादिरत्नि॥ श्वेतपाने॥ मंदारो कुंदः॥ पु
न्नागो नागकेसरः॥ आरग्वधो राजवृक्षः धनबकुलरजनि कान्यकुब्जभाषायां॥ पारंती लता चेदः॥ सौगंधिकं कल्हारमे
दः॥ इंशिकैः कृताद्यास्तु पदिष्टानी तस्तेनैनान्येषु पुष्पाण्यायेषु विहितानि यान्यानि तत्तद्देवतानां निषिद्धानि तान्यानिस्स
कं॥ यथा रुद्रयामलायां॥ नाक्षतैरर्चयेद्विष्णुं न तुलस्या गणाधिपं॥ न दूर्वया यजेद्दुर्गां बिल्वपत्रैर्दिवाकरं॥ उन्मत्तमर्क
पुष्पं च विष्णोर्वर्ज्यं सदा बुधैः॥ देवीनां चार्कमंदारावादित्येन गरं तथा॥ गणेशाय च तत्सर्वं यदि रक्तपुष्पमतीव प्रियं॥ शिवे
कुंदं मदंतीं च यूथीं बंधूक केतकी॥ जपां रक्तां त्रिसंध्ये हि सिंदुरं कंटकानि च॥ मालतीकुसुमं रक्तं द्याद्दत्तं बर्बरीसंज्ञे पु
त॥ उग्रगंधमगंधं च कृमिकेशादिदूषितं॥ अशुद्धपात्रपात्रगं वासोनिर्क्रमितान्यपि॥ आनीतं नार्पयेद्धीमान्प्रमा
दादपि दोषकृत्॥ कलिकाभिस्तथा नैवं विना चंपकपंकजे॥ शुष्कैर्न पूजयेद्विष्णुं पत्रैः पुष्पैः फलैरपि॥ ग्लानानि तैः
पर्युषिते याचिते कृष्णवर्णकैः॥ स्वयं विकसितैः पुष्पैः स्वयं च पतितैर्भुवि॥ वर्जयित्वा द्वृती दग्धं कांचनारं कुरंट
कं॥ सर्वपुष्पैः सदाज्ञा विहिताविहितैरपि॥ कर्त्तव्या सर्वदेवानां नक्रियोगात्र कारणं॥ पुष्पं वा यदि वा पत्रं फलं
नेष्टमधोमुखं॥ दुःखदं तत्समाख्यातं यथोत्पन्नं तथार्पणं॥ चित्रपुष्पाणि सत्वसु न विकृत्य स्थापि पूषणं॥ अधोमुखा
र्पणं नेष्टं पुष्पांजलिविधौ नतत्॥ कल्हारनाम्नु सर्वासु पुष्पमेकैकमर्पयेत्॥ समुदायेन चेत्पूजा तत्र पुष्पाण्यर्पणं तु
तदिति॥ मंत्रतंत्रप्रकाशेपि॥ पुष्पं पंचविधं प्रोक्तं मुनिभिर्नारदादिभिः॥ परापरोत्तमं चैव मध्यमं च तथाधमं॥ २५
सौवर्णं त्रिपरं प्रोक्तमपरं चित्रवस्त्रजं॥ वृक्षगुल्मलतापुष्पमुत्तमं परिकीर्तितं॥ अधमं पत्रतोयादि मध्यमं तु फ

लात्मकं॥ उत्कृष्टं न क्रियायोग्यं सदा योग्ये परापरे॥ पत्रेषु तुलसी श्रेष्ठा बिल्वं दमनकं ततः॥ मरुको देवकल्हार शिवि
ष्णुक्रांता तथैव च॥ अपामार्गो भृंगधारी पत्री सुरभिसंज्ञका॥ नागवल्लीदलं दूर्वा कुशपत्रं तथामतं॥ पत्रचण
स्यहस्तस्य पुण्यं धात्रीफलं तथा॥ फलेष्वामलकं श्रेष्ठं बादरं तिंतिणीफलं॥ दाडिमं मातुलिंगं च जंबीरं पनसो
द्भवं॥ कदलीचूतसंभूतं श्रेष्ठं जंबुफलं तथा॥ यजेद्देवैः सदा विष्णुं पत्रपुष्पफलैरपीति॥ तथा॥ दिवसे दिवसे कुसुमैः
पुष्पैः पूजा तथा निशि॥ पुष्पाणां वै प्रवालैर्वा पूजयेच्च न कोरकैरिति॥ आर्षमार्षं तु तंत्रुष्टं तथैवान्योपयुक्तकमिति॥
गुरुरिस्मनेनकेषुचित्पर्युषितपुष्पदोषाभाव उक्तः॥ यत्स्कान्दमालायां॥ न पर्युषितदोषोस्ति जलसंभवपंचके॥ तुल
स्यगस्तिबकुले बिल्वगंगाजले तथेति॥ पंडितैर्दिनसंख्याकेषां चित्पर्युषितदोषाभाव उक्तः॥ बिल्वापामार्ग
नीतु तुलसीसमिधा ता केतकीत्वंगदूर्वामिदं भोजा हि दमुनि तिलतगरा कुस कल्हारमली॥ चंपा स्वाशनिकुंजीम
रुबकदमनो बिल्वतो हानि च स्युः॥ त्रिंशत्कार्यशाशोदधिनिधिवसुजस्त्रयमास्त्रयएवमिति॥ शत्शाशतपत्रं॥ रं
गरंगराजः॥ मंदो मंदारः॥ अहिर्ऽरक्तकलशः॥ कुल पलाशः॥ अश्वारातिकरवीरः॥ एषां यथायोगं पत्रपुष्पाणि
योज्याणि॥ अरयः षट्॥ यमो द्वयं॥ एवमेकादशाः॥ अस्त्यंतानां दिनसंख्या॥ त्रय एवमस्यार्थः॥ द्वितीयात्तु सादृशादि
नाम्नि यं दिनसंख्येति॥ जस्यां निर्माल्यदोषोपि नास्ति॥ यदाहुः॥ मध्वः पर्युषितो वापि निर्माल्यादौ न दुष्यति॥ त
स्यैव धोर्न हरेत्तत्र इस्तुलस्यात्तद्वृत्तयथेति॥ उद्दिष्टमुक्त्वा क्रतुनमाह॥ धूपयेदिति॥ वामहस्तेन घंटां वादयन्
धूपं दद्यादित्यर्थः॥ देशिकक्रमेण घंटामंत्रे एवं तत्त्वज्ञेनमुक्तं॥ यदाहुः॥ गजध्वनितनोमंत्रमातः स्वाहेत्युदीर्य
त्रा॥ [illegible] नादयन् घंटामिति॥ होता गमेपि तु॥ धूपभाजनमस्त्रेण प्रोक्ष्य [illegible] दारुणा॥ अग्निं एरत्नि तां
धूपं नादयन् गुग्गुलं दहेदिति॥ श्लोकस्तु॥ वनस्पतिरसोपेतो गंधाढ्यः सुमनोहरः॥ आघ्रेयः सर्वदेवानां धूपो
यं प्रतिगृह्यतामिति॥ तद्दुक्तं घंटां गंधादितत्कुसुमकैरर्चितां वादयन्न्रितो॥ अस्त्रात्पी॥ ततः समर्पयेद्धूपं घंटा

वाद्यं तथ स्वने रिति॥ तत्र प्रयोगः॥ धूपपात्रमस्त्रेण प्रोक्षणमो मंत्रेण पुष्पं दत्वा वामपार्श्वे स्थाप्य संस्पृश्य मूलमंत्रं सोऽकं
वनस्पति सर्वसांगाय सपरिवाराय देवाय धूपं समर्पयामि नम इति शंखजलं सुमुद्रां धूपमुद्रां प्रदर्श्य घंटामंत्रेणार्चि
तां घंटां वामहस्तेन वादयन् देवतागुणनामयशस्तत्त्वादि कीर्तयन् देवं धूपयेत्॥ उक्तं च॥ धूपस्थानं समभ्यर्च्य ति
र्यक् स्थाप्य वामपार्श्वतः॥ संकल्प्य वेनतः पुष्पांजलिं दद्याद्यशः पठेत्॥ बहूनां च परिमितोऽपि॥ धूपस्य वजने नैवेद्यधूपेना
गदि धूपने नीराजने पुस्तवेऽपि देवनामादिकीर्तयेत्॥ न यथोपं प्रकीर्तितका रूपं पंचापि कीर्तयेत्॥ तथा मंगल्योद्घोषं च
ग्राद्विजस्य स्वस्तिमिति॥ मंत्रं तंत्रप्रकाशेतु॥ न दद्द्दूषितं धूपं कार्पास्थिशिरोरुहैरिति॥ एवं दीपदानेऽपि घं
टावादनादि सर्वं सर्ववत्कुर्यात्॥ विशेषस्त्वयं॥ उत्तमो वाममध्यमया दीपपात्रस्पर्शः॥ दीपमुद्राप्रदर्शनं च॥ श्लो
कस्तु॥ सुप्रकाशो महादीपः सर्वतस्तिमिरापहः॥ सबाह्याभ्यंतरं ज्योतिर्दीपोऽयं प्रतिगृह्यतामिति॥ उक्तं च ज्ञानमा
लायां॥ सर्वनादप्रियो देवो नैकः कर्तुं च तान् क्षमः॥ सर्वनादमयी घंटा रवात्मा सर्वनादकृत्॥ नीचैरिति देवता
नाभिदेशे॥ उच्चैरिति नेत्रदेश इत्याचार्याः॥ दद्याद् घृतविशदधीः पादपर्यंतमुच्चैरित्युक्तेः॥ बहुवर्तिदीपपक्षे विष
मा एव वर्तिसंख्या ग्राह्या॥ यदाहुः॥ आरात्रिकं तु विषमबहुवर्तिसमन्वितमिति॥ प्रयोगसारे तु॥ तैलेन कपिला
ज्येन सिक्थकेनापरेण वा॥ स्नेहेन वर्तिसंयुक्तं दीपमुच्चैः प्रदर्शयेदिति॥ तत्र सर्पिषा चेद्दीपस्तदा दक्षिणतः॥ तैले
न चेद्वामत इति संप्रदायः॥ एवं च सिता वर्तिश्चेद्दक्षिणतः रक्ता चेद्वामतो निवेदनमिति॥ मंत्री निवेदयेदिस्मन्नेनैन
दुक्तं भवति॥ नैवेद्यमस्त्रमंत्रजलेन संप्रोक्षयेत्॥ शेषाणां मेव॥ ततो मूलं तु जपेन वैषड्ंतेन सप्तधा॥ जलैः सदर्भ
शंखस्थैः सिंचेत्तत्तोयबिंदुभिरिति॥ ततः चक्रमुद्रया दिग्बंधनं वायुबीजेन द्वादशवारानभिमंत्रितजलेन हविः संशो
षणं कुर्यात् वायुना तद्दोषं संशोष्य दक्षिणकरतले अग्निबीजं विचिंत्य तत्स्थं ज्वालाग्रं वामकरतलं कृत्वा नैवेद्ये प्रदर्श्य २६
तदुत्थाग्निना तद्दोषं दग्ध्वा वामकरतले अमृतबीजं विचिंत्य तत्स्थं ज्वालाग्रं दक्षिणकरतलं कृत्वा नैवेद्ये प्रदर्श्य

तदुत्थामृतधारया प्लावितं विभाव्य मूलमंत्रजलेन संप्रोक्ष्य तदखिलममृतात्मकं ध्यात्वा तत्स्पृष्ट्वा मूलमंत्रमष्टधा
जप्त्वा धेनुमुद्रां प्रदर्श्य जलं गंधपुष्पैरभ्यर्च्य देवताये पुष्पांजलिं समर्प्य तन्मुखात्तेजो निर्गतमिति ध्यात्वा वामां
गुष्ठेन मुख्यं नैवेद्यपात्रं स्पृष्ट्वा दक्षिणकरेण जलं गृहीत्वा स्वाहांतमूलमंत्रं॥ ससांगाय सिद्धसुपविविधानेक
तत्रूणं॥ नैवेद्यामिदं वेत्रासानुगाय गृहाणेति श्लोकं जप्त्वा सांगाय सपरिवाराय देवाय नैवेद्यं समर्प्य
यामि नम इति जलमुत्सृज्य नैवेद्यमुद्रां प्रदर्शयेत्॥ ततः सपुष्पाभ्यां हस्ताभ्यां नैवेद्यपात्रं त्रिःप्रोद्धरन् नैवे
द्यामिवनेजुषाणे देहहविर्हरे इति मंत्रं जपेत्॥ तत्र हरे इति पदस्थाने तत्तद्देवतामुद्रं॥ यदाहुः॥ अत्रोहि
तं तदरिमुद्रकया निरस्य चायव्यतो यपरिशोधित मध्यमदोष्णा॥ संदर्श्य वामकरसौधरसाधिष्ठरं मित्रामृ
तीकृतमथाभिमंत्रान् प्रजप्यात्॥१॥ मत्त्रमष्टधा सुरभिमुद्रकया परिरक्ष्य मिर्च्य युगंधमुखै॥ हरिमर्थयेद
कृत्तप्रमवां जलिरास्यतो स्पविसरेच्चमहः॥२॥ वीतिहोत्र दयितांतमुच्चरन् मूलमंत्रमथनिक्षिपेज्जलं अर्प
येतदमृतात्मकं हविर्द्विर्युज्ज्ञसकुसुमं समुद्धरन्॥३॥ निवेद्यापणिमं ग्रीयं सर्वाचमुनिजमयेति॥ ततो वामक
रयास मुद्रां दक्षिणकरेण प्राणादिमुद्राः प्रदर्शयन् प्राणाय स्वाहेत्यादिमंत्राञ्जपेत्॥ यदाहुः॥ ग्रासमुद्रां वाम
दोष्णा विकचोत्पलसंनिभां॥ प्रदर्शयन् दक्षिणेन प्राणादीनां च दर्शयेत्॥ स्पृशेत्कनिष्ठोपकनिष्ठिके द्वे स्वांगुष्ठ
मूर्ध्नि प्रथमेह मुद्रा॥ तथापरा तर्जनिमध्यमे स्यादनामिका मध्यमिके च मध्या॥१॥ अनामिका तर्जनि मध्यमा
स्यात् तच्चतुर्थी सकनिष्ठिकास्ताः॥ स्यात्पंचमी तद्दिहोपदिष्टाः प्राणादिमुद्रा निजमंत्रयुक्ताः॥२॥ प्राणापा
नौ व्यानमानसमानाः क्रमाच्चतुर्थ्या युक्ताः॥ नाराधारो चेत्सा वेध्याः कृत्सा धूम्नस्तत एते मन वरति॥ पुष्पादिमुद्
लेक्तण निखा॥ जे घ्राणुष सप पुष्पे ष्प युक्ता धूपतनर्जनी॥ दीपस्य मध्यमानामा नैवेद्यस्य प्रकीर्तिता॥ इत्यं
गुलीसंयोगा तं च मुद्रा प्रकीर्तिताः॥ गंधादिप्रदानेषु मुद्राश्चेमाः प्रदर्शयेत्॥ मुद्रया यत्कृतं कर्मतिद्यदय

फलप्रदमिति॥ तत्रेति॥ उपचाराणामंतरांतरा पुष्पांजलिं दद्यात् समस्तं पद्मं … येदिति परमसुखं वदः। इदानीं
त्रीं तरोक्तविधौ वो लिख्यते॥ ॥ अनिर्माल्यमनिर्माल्यमर्चनं द्विविधं मतं॥ दिनेमर्मणो नवेद्धं सर्गं पुष्पैः स्र
ग्भिर्दिनैः॥ यदर्चनमनिर्माल्यं दिव्यभोगापवर्गदं॥ ग्राम्यारण्यादिसंभूतैर्यैर्गंधाढ्यमनोरमैः॥ नक्तेयत्क्रियते
सम्यक्सनिर्माल्यार्चनं दर्चनं॥ न त्वत्र नत्त्व सागरसंहितायां निर्माल्यत्वमुक्तं॥ जातमात्राणि पुष्पाणि घ्रातान्येव वा
विसृजति॥ पंचरात्रिं स्वमहाभूते मल्लिना वाशिना तथा॥ जातिभिश्च हि रेफा द्वैः पोष्पैरे वनसंशयः॥ अतो
निर्माल्यमस्पृक्तमिति॥ विमार्जितं ध दर्शनेन फलं कथमित्याशंक्य तत्रैवोक्तं॥ घ्रातपुष्पात्फलं सिद्धं दस्य
नो मानस्याद्दृष्या॥ तस्मादपरिहार्यत्वादन्यथा चानुपायतः॥ अल्पबुद्धिनतोन्नरणां वा घ्रातपुष्पैर्न विक्रियेति॥
तथा॥ पुनस्त्रिधामता पूजा उत्तमा मध्यमा मध्यमा॥ अधिकारिविभिन्ना भ्यांत्रिधा तेशा तथा पुनः॥ यागोपकरणो
क्तैः क्रियमाणोत्तमामता॥ यथालब्धैर्विनिष्पाद्या दृष्टैः पूजा तु मध्यमा॥ पत्रपुष्पांबुनिष्पाद्या पूजा त्वाध
मसंज्ञिता॥ विहिता खिलवेदार्थैर्ब्रुसर्षिभिरकल्मषैः॥ क्रियमाणा तु या पूजा सात्विकी सा विमुक्तिदा॥ राजर्षि
भिस्तपोनिष्ठैर्भविगतत्वदर्शिभिः॥ या पूजा क्रियते सम्यक् राजसी सा सुखप्रदा॥ स्त्री बालवृद्धमूर्खाद्यैर्नरैर्
दुःखमानसैः॥ या पूजा क्रियते नित्यं तामसी सा प्रकीर्तिता॥ आसुरी भौतिकी चैव चत्वारो वैधिका तथा॥ साधि
नीआवना चेति पंचधाभिद्यते पुनः॥ यदि लिंगमपर्यंतो व्याधिरात्मनि दृश्यते॥ तदा पूजा न कर्त्तव्या स्थंडिले प्र
तिमासु च॥ तस्मात्संतं काष्ठं वा कृत्रिममथापि वा॥ रविमंडलमालोक्य प्रतिमामथवा पुनः॥ मूलमं
त्रं समुच्चरन् पुष्पं सम्यक्तत्र क्षिपेत्॥ अंतो व्याधिभिरस्पृष्टैः कोनाश्रयोपवासकैः॥ निजसामर्थ्यके वा पि
स्वकर्तव्यं समापयेत्॥ स्नात्वा देवमभ्यर्च्य गुरून् द्विजान् प्रहृष्टश्च॥ एतावत्कालविच्छिन्ना पूजा पुष्पमत्र २७
सादतः॥ नदोषो मे स्ति तित्राध्य पुनः पूर्वं यथाचरेत्॥ ॥ अथ सततकीनः पूजां वदामागमचोदितां॥ स्ना

त्वा नित्यं च निवृत्य मन साक्षिपौ ये तु वै॥ बाह्य पूजा क्रमेणैव स्थान योगेन पूजयेत्॥ यदि कामी न चेत्कामी नि
त्यं एवं विधाचरेत्॥ वासितावसने पूजा यथैवागमचोदिता॥ जप्त्वा वा यदि वा तत्र मर्चयात्रादि साधनं॥ पूजो
दके न कर्त्तव्या न चेन्नो यं च विद्यते॥ यदि सं पूजयेदेवं भावनाकुसुमादिभिः॥ दोषाधिकी भवत्यागमेरतमागम
चोदितां॥ मूर्खस्त्री बालवृद्धाद्याधु वैधा इति भाविता॥ रत्नमंडप धर्मादि चचक्रमुरगा बुजा॥ मूलमूर्त्ति
यागानि तेषां पूजा विधीयते॥ अन्येषामपि सर्वेषां प्रोक्ता संक्षेपकर्मणि॥ सर्वोपचारवस्त्वामलाभे भाव
नैव हि॥ निर्मलेनोदकेनाथ पूर्णं तेनाहनादरेति॥ पूजाकरणासमर्थं प्रति॥ आराधनसमर्थश्चेद्वाद्वर्च
न साधने॥ यो दत्तु नैव पाठोक्ति कुर्याद्दिर्चन दर्शनं॥ नैकं च यस्यापि विद्येत सोधी यात्मे वनान्यथा॥ यस्त्वनेना
… पञ्चेन स्वयं सपाद्यवाखिलं॥ साधनेनार्चयेद्विद्वान्स समग्रफलं लभेत्॥ यो र्चयेद्दि धिवद्भक्त्या परानी
तेभ्य साधनैः॥ पूजाफलार्द्धमेवस्यान्न समग्रं फलं लभेदिति॥ अंगादीन्पुनरर्चयेदित्युक्तं तत्राद्यतेसामा
न्यरनि नयोः स्थानध्यान प्रयोगान्वक्तुमादिशाष्टा र्थं च प्रकटयितुं पुनः संगृह्णाति॥ अंगादीनिति॥ पूजाव
रणस्य प्रागुक्तत्वादन एव वक्ष्यति॥ एवं संपूजयेद्विधिवान्नित्यं वेद्यो तामिति॥ अंगमंगाद्दत्तिराद्यो यत्रतत्र
लोकपालानावृत्तिरंते पचरतत्॥ अंगादिलोकपालानामिति क्रियाविशेषणं॥ लोकपालशब्देन वज्रास्त्रा
… णां हरेय॥ एतन्नसत्येनवा… प्राप्य वक्तुपद्म… पाद शनितात्॥ ननियमः अपि शब्दादत्रापि
॥ अन्तरांतराऽज्ञदर्शनादिति तत्तु पूर्वं॥ अग्न्यादिषु सर्वसामान्यमर्चनस्थानमाह॥ ॥ केसरेष्विति॥ अ
ग्निकोणादीसा दिशाष्टमेन नैर्ऋतनायव्येशान कोणेषु॥ तदुक्तं॥ वन्ह्यादीशांतमंगानि दिक्षु हृदिक चोति
कं॥ अस्त्रं च सुरतो नेत्रमस्यादिक्षु वहिः पुनरिति॥ अन्यत्रापि॥ कृत वन्हि नैर्ऋतीसमीरणेशेषु दिक्षु
हृदादि वर्मांतमिति॥ अस्मेतु॥ आग्नेयेशान नैर्ऋत्य वायु कोणेषु तिथि … न॥ प्रयोगः॥ हृदु…

दयमाग्नेय्यामीशान्यां च शिरोयजेत्॥ नैर्ऋत्यां तु शिखां पूज्या वायव्यां कवचं यजेत्॥ अग्नम्यर्च्य पुरतो नेत्रं दिक्षु ५०४
शस्त्रम र्चयेदिति॥ अत्रापि॥ अग्निशासुर वायव्य मध्य दिक्ष्वंगपूजनमिति॥ यथा गुरूपदेशं चेति ल्यः
॥ अत्राग्रे पादीनि पूरः कल्पित पूर्वदिग्पेक्षया न तु प्राग्दिक्त्वमिति॥ नेत्रं मग्रत इति कर्णिकायां॥ देवस्य पुरतः
शिरस्थ इति मंत्रे पुरःस्थानमात्रतात्पर्या॥ होमेपुरुत्वया दिग्गास्वाहांतता॥ आद्यद्वितीययोस्त्वजातियुक्त
त्वादेवनत्वयोगः॥ अधिकरणासिद्धत्वाच्च मर्थः॥ न चाहि॥ मंत्रेष्टवाक्यात्वेपत्वं गुणोपदेशात्स्यादिति
अधिकरणे स्वाहाकारेण॥ वषट्कारेण वा देवेभ्यो हविर्ददामिति सामान्येन विहितं न यास्वाहाकारान्तत्वमाष्टपिष्टे
स्वाहा न्यंतरिक्षाय स्वाहेत्यादि पुमंत्रे पुनस्तस्यां पुनस्तस्यावापः सामी घेनीस्त्रं दर्शपव पुपसंहारानीबान्नान्यस्मं
त्वे पुबाधस्येति स्थितं॥ प्राधानत्वं न वक्षिय इति पक्षद्वयं इति पश्च पादाचार्याः॥ उक्तंच॥ वरदाभयधारिणे मि
हिलास्त्रनयोग देवता॥ इत्याह्नतिः॥ आवरणानि पुक्तानां स्थानमाह॥ ॥ पद्मादिति॥ पद्मादंगावृत्यनंतरं इत्यर्थ
॥ इदमपि प्रायिकं॥ न तूर्ध्वमपावृत्तीनां सत्वात्॥ अंतइति वा पिचेदुरस्त्रे॥ आवरणांतत्वस्पष्टर्वमुक्तेः॥ एत
च्चास्पष्टानं वैहायसीमंत्रकोशे वायवीसंहितायां च॥ तथा दर्शनाच्चक्षुःप्रदाभाच्च॥ पूर्वादिमोदिक्षुक्रमात्॥ अं
ते इंद्रमग्निमित्यादीन् लोकपालानूचे दिति संबंधः॥ तत्र सामान्यत इंद्रायनम इत्यादिप्रयोगे प्राप्ते विशेषमा
ह॥ मूलेतादिना॥ अंतेइत्यत्रापि संबध्यते॥ तेनेदं पदं सर्वत्र दर्यमित्यर्थः॥ न च प्रयोग लिखने स्फुटो न विष्प
ति॥ मूलपारिषदाद्विता नित्यर्थः॥ यदा तु त्वया वरणे इंद्रादिस्तत्र तदा प्रत्येकं शक्ति पारिषदाये ति लोकपालानां
च वज्रादीनां च विशेषणं ज्ञेयं॥ एवं च शिव पूजायां शिव पार्षदायेति॥ एवं गणेश पूजायां प्रत्येकं गणेश पार्षदाये २८
ति॥ एवं सूर्य पूजायां प्रत्येकं सूर्य पार्षदायेति॥ एवं विष्णु पूजायां प्रत्येकं विष्णु पार्षदायेति॥ चरणमत्रयो
गोपलक्षणार्थत्वात्॥ हेति मंत्रापि अंत इति संबध्यते॥ इंद्रायेत्यादेरंत इत्यर्थः॥ अत्रापि प्रयोगेऽत्र सधिपानां एवं

मुच्चारणं पाश्चात्येतान॥ मूलेन हेति शब्दस्यान्त्यत्वात् सूर्वनिपातः॥ हेतयः आयुधानि॥ ज्ञातयः सुरते जप्रेत स्तेज
तत्राणेन कृत्व नत्तनाग लोकाश्च वाहनान्न परिवारा निस्यपिति ज्ञेयं॥ वाहनानित्तु॥ ऐरावत अज महिष नर मकर मृग
अश्व वृषभ नर पहंसाः॥ तु कुक्कमा चार्यैः॥ ज्ञातसधिपदेति वाहन परिवारांताः क्रमेण य एवमाद इति॥ वक्ष्यती च स्वयं नि
त्या मंत्रो॥ लोकपालान्यजेदंते वाहनायुधसंयुतानिति सशक्तिकानितिज्ञेयं॥ तदुक्तं वैहायसी मंत्र कोशे॥ लोके
श्वरान् पार्थिवे मंडले सशक्त्यस्त्रवाहनांश्च॥ स पार्षदां श्चंदन पुष्प धूपैय समंत्री निजवांछितायेति॥ स्वबीजाद्यानि
त पितेयं॥ बीजानित्तु॥ लंरंमंक्षंवंयंसंहं नंकं॥ तदुक्तं महाकपिल पंचरात्रे॥ यानुलोमहृती यं तु द्वितीयं तद्विलोमतः॥ च
तुर्थं कानुलोमेन रान्तुलोमेन चाष्टमं॥ इत्ती यं रानुलोमेन विलोमाकृतीयकं॥ चतुर्थं सप्तवर्णेचिरान्तुलोमेन संस्थितं
॥ चतुर्थ यानुलोमेन त्ववनी यं गविलोमतः॥ स्वरोपांत्य स्वदानामांतेदिते सर्वमिवततत्॥ आनुस्वारेण कृतं बीजं त्वलांतं वा सवा
दिकमिति॥ एतानि दीर्घाण्यपि पिनाके चित्॥ अनंतस्यत्तरणोर्मायापाश बीजमिति केचित्॥ तदुक्तं॥ एषु न्नि पवनाद्यो न सव
णानिलसम्पृतैः॥ अनंतं विंदु संयुक्तं स्व्या पाशेन मायये ति॥ तत्र स्फु इति नि ऋतिः॥ पवनो वायुः॥ विधुं सोमं॥ पन्नगाधी
शमनंतं॥ पितामहं ब्रह्माणं॥ दिक्षुपूर्वादितः क्रमादिति॥ अत्र प्रसिद्धा एव वहृबदिः पोत्य गुणा तदुक्तं॥ प्रज्ञेयं स्वदि
समन्वधीश्वरात्मधीश्वर हेतिपञ्चपरिवारसंयुतानिति॥ नारायणीये च॥ इंद्राद्वीश्वरस्व स्वदिक्षु स्थिति॥ इंद्रादिकान् लो
कपालान् स्व स्व दिक्षु समर्चयेदिति॥ अत्रापि दिक्षु अष्टस्वपि तव्याः निर्ऋति वरुणयोर्मध्ये अनंतं इंद्रेशानयोर्म
ध्ये ब्रह्माणं॥ तदुक्तं वायवीयसंहितायां॥ विष्णुनैर्ऋति विधिमैश्वरे॥ बहिः पद्मस्य वज्राद्यान क्रांतान्यायुधान्यपि॥
पूर्वादिक्रमात्स्थानासु लोकेशानां क्रमाद्यजेदिति॥ अत्र नैर्ऋत्ये ईश्वर इति त्वसामी प्यलक्षकमिति ज्ञेयं॥ अत्र कचि
दुक्तानां पुष्यिताननं तदाश्रये दिति क्रमः सपौराणिक इतिज्ञेयं॥ तन्त्रान्तिके॥ महाकपिल पंचरात्र हयशीर्ष पंचरात्र
पर्वचसारादि च कृत्वा विरोधात्तथा चार्या॥ अनंत ब्रह्मणो यैनिः पंचमीन्द्रादि निर्मिता॥ चक्रं पद्मं तिकेश वज्रा
द्यरिति॥ प्रयोगोयथा॥ लं मूलासधिपतये सायुधाय सवाहनाय सपरिवाराय सशक्तिकाय विष्णुपारिषदाय नमः इं

५०२

सिद्ध्यर्थं॥ द्रुपांत्र्यमयेनेनोधिपतये इत्यादि॥ एषां रत्नायां लोकपालमुद्रा दर्शनीया॥ यत्राकृ॥ पाणिभ्यां तु संलग्नाभ्यां
मर्यादाप्रसारिता॥ लोकेशानामियं मुद्रा तेषामग्रे तु दर्शयेदिति॥ अलिरवर्तं॥ आकाशो नीलवर्णः॥ करवदंः नीलपुष्पोऽ
[illegible] प्रत्येकं तः तत्पुष्पवर्णदिसर्पः॥ तदुक्तमाचार्यैः॥ करवंदाकृवर्णमिति॥ तत्र प्रयोगो यथा॥ ॐ वं वज्राय वज्रलांछितमौलये
साधुध्याय सकाहनाय सपरिवाराय सशक्तिकाय विष्णुपारिषदाय नमस्तस्मै नुद्धा॥ तदुक्तं॥ अर्चयिद्विग्रिसुलक्षितमो
लिपुक्ता भवत्यायुधाभ्य समुद्यत पाणिप्रसरति॥ सजनेन मनि [illegible] प्राणिने वेयांतमिति निसप्तज्ञायामपिसमानं॥ विहा
द्धिधिवत्संस्कृतेन मनेन विरुणा दयमत्वाकृसंस्कारा॥ एतत्संस्कारा आग्रे रामाकृतिक्रमेण गर्भाधानादिसंस्काराश्चक
र्त्तव्यास्तदुक्तं भवति॥ तार व्याकृतिभिरिति॥ अत्राद्यामत्रः सतारव्याकृतिभिः एकासमस्तेन॥ तत्तोनंतरं व्याकृतिभिर्जु
होतिमंत्रं ब्धः॥ इर्द्वदितिभिर्ये॥ पुनरंतरं गंधादैस्तां देवतां अर्चयेत्॥ आदिशब्देन पुष्पधूपदीपनैवेद्यानि॥ पीठस्थमर्त्तौ
त्र्यावाहयित्वाता मिस्त्वभुसत्पते॥ ततस्तनेनैतदुक्तं भवति॥ पानार्थं जलं दद्यात्॥ मूलमंत्रांते श्लोकरुक्त॥ समस्तदेवदेवेश
सर्वतृप्तिकरं परं॥ अखंडानंदसंपूर्णं गृहाण जलमुत्तममिति॥ ततो भोजनशेषोदकं च दत्वा निर्गतिनेजो देवमुखे संकु
त निवेद्यार्थी विष्वक्सेनादिभ्यो दत्वेति॥ तदुक्तं॥ मुखादीशानतः पात्रान्नैवेद्यांशं समुद्धरेत्॥ सर्वदेवस्वरूपाय पराय प
रमेष्ठिने॥ श्रीरामसेना मुक्ताय विष्वक्सेनायतेनमः॥ गणेशेवक्रतुंडाय सर्वेचंडांश वेर्पयेत्॥ शक्तावुच्छिष्टचांडाल्यैशिवे
चंडेश्वराय चेति॥ देवतायाः पारिषदे भस्म सत्रापि पारिषदशब्देनैते धामपरिग्रहणं॥ सर्वसंपत्यैदेवतायै इति व्यधिकरणे
चतुर्थ्यौ॥ समर्पयेदिति॥ अत्र निसप्तज्ञायां तां बूलछत्र आदर्शचामराणि समर्प्य॥ बुद्धिः सवासनाकृत्यादर्पणं मंग
लानि च॥ मनोवृत्ति विक्रिया तेन स्वरूपेण कल्पिता॥ ध्वनयोगी तस्रूपेण शब्दावाद्य प्रभेदतः॥ छत्राणि तव पद्मानिक
सितानि मया विभो॥ सुषुम्णा ध्वजरूपेण प्राणा ध्याश्च मरात्मना॥ अहंकारो गजत्वेन वेगकृत्तोरयात्मना॥ इंद्रियाण्य
श्वरूपाणि शब्दादिरथवर्त्मना॥ मनश्च ग्रहरूपेण बुद्धिः सारथिस्त्पतः॥ सर्वमन्यत्तथा कृतं तवोपकरणात्मनेति॥ २९
श्लोकान्पठित्वा यथाशक्ति मूलमंत्रं जप्त्वा॥ गुह्यातिगुह्यगोप्ता त्वं गृहाणास्मत्कृतं जपं॥ सिद्धिर्भवतु देवेश त्वत्प्रसा

दात्वयि स्थिते तस्मै न जपं देवतायै निवेदयेत्॥ तदुक्तं शैवागमे॥ मंत्री श्लोकं पठित्वा तु दक्षहस्तेन संभवे॥ मूलाणुना घृतो
येन रूदहस्तेन निवेदयेदिति॥ ततः परांमुखार्घं दत्वा शंखं पूजयेत्॥ तदुक्तं मंत्रतंत्रप्रकाशे॥ पूजयेत् धूपपुष्पाद्यैः शं
खे देवव तृप्यहतिं॥ अन्यत्रापि॥ शैलो लेख्या निता र्धानिवासुदेवस्य चाग्रतः॥ शंखे तिष्ठंति विप्रेंद्र तस्मात्शंखं सदार्चये
दुक्तं भवति॥ वृषकुंजरयानेन तुल्यो यः पुष्टिदः सदा॥ विमानानां वितानानां प्रासादानां च यो भवेत्॥ आकारेणा
थ हंसानां मयूराणां प्रशस्यते॥ सिंहाकृतिः सदा वह्निः सद्यः सिद्धिकरः स्मृतः॥ चोषाणां दंष्ट्रिणां रूपं नाशस्तं होम
कर्मणि॥ खरोष्ट्रमहिषादीनां रूपमत्र न सिद्धये॥ स्निग्धप्रदक्षिणावर्तः सुराष्ट्र श्चापि यो भवेत्॥ वेद्यः सोऽपि प्र
सिध्यर्थमन्यथा विप्रकारकः॥ स्वस्त्य टचटाशब्दं अपसव्यगतिः सदा॥ उन्नतशिखेह्यस्तु धायम्रयश्चाधशिख
एव च॥ नेष्यते सौमुनिश्रेष्ठ धास्त्रे स्मिन्सारमेश्वरे इति॥ पंचविंशतिमिति॥ दोषद्वय दर्शने दोषत्रय दर्शने वा
प्रतिनिमित्तं नैमित्तमावर्तत इति न्यायात्तावत्कृत्वः पंचविंशतिराहुतयो होतव्या॥ ॥ इति श्रीश्रीश्रीश्री
शारदातिलकटीकायां संप्रदायकृत व्याख्यायां पदार्थादर्शाभिख्यायां दीक्षादिविधिकथनं नाम पंचमः पटलः
समाप्तः॥ ॥५॥ ॥ व्यासजगन्नाथाभिधेन लिखितमिदं पुस्तकं॥ ॥ श्रीकाश्यै नमः॥ ॥ श्री
संवत् १७८३ मार्गशीर्षशुद्धि १२ दिने व्या॰ सदाशिवसुत जगन्नाथाभिधेन लिखितमिदं पुस्तकं॥ समा

॥ श्रीगणेशाय नमः ॥ अथेदानीं द्वादशपटलमारभ्यते ॥ ॥ एवं पूर्वमंत्रानुक्त्वा महत्कापटलेनात्रियोस्योद्दिष्टत्वात्त्रैर
वीमंत्रं वक्तुमुपक्रमते ॥ ॥ अज्ञानेनेति ॥ त्रिपुराशब्दव्युत्पत्तिरुक्तान्यत्र ॥ त्रिमूर्तिसर्गाच्च पुराभवत्वात्त्रयीमयत्वाच्च पुरै
व देव्याः । लये त्रिलोक्या अपि पूरणत्वात्प्रायोम्बिकाया त्रिपुरेति नामेति ॥ सिद्धेश्वरिमते तु ॥ ब्रह्मविष्णुमहेशानैस्त्रिदिवे
रर्चिता पुरा ॥ त्रिपुरेति ततो नाम कथितं देवते पुरेति ॥ अनिगोपितामित्यनेनैतदुक्तं भवति ॥ मयापि गुप्तमेतत्स्वरूप
मुद्धृतमिति ॥ अन्यथा विद्यां वक्ष्ये ॥ इति प्रतिज्ञाय विद्यावेद्योपसंहारः ॥ अथ च मंत्रमुद्धरत इदमसंगतं स्यात् यतः ॥ श
ताद्याद्भवेद्विद्या शिवाद्या मंत्र उच्यते इत्युक्तेः ॥ तदुक्तं ॥ एषासा शांभवी विद्या गुप्ता कुलवधूरिव ॥ कर्णात्कर्णोप
देशेन संचरंती भवनीतलं इति ॥ सिद्धान्नादिविनियोगोक्तिः ॥ मंत्रमुद्धरति ॥ वियदिति ॥ वियत् हः भृगुः सः कृशानो रेफः
॥ नेति ष्टं स त्रसः मुपस्थ वाऊ जकाद धिकरणोकः ॥ नौतिकरे ॥ बिंदुरनुस्वारः ॥ इत्याद्यं कूटं ॥ वियत् हः नदान्तिः क
स्वरूपं ॥ इंद्रो लः ॥ अग्ने रः ॥ एते स्थिता यत्र तादृशी नाम आदिः वामाक्षी ई बिंदुरनुस्वारः इति द्वितीयं कूटं ॥ आकाशोद हः भृ
गुः सः वह्नी रेफः मनुरौ सर्गो विसर्गः इंदुः खंडः अनुस्वारः इति तृतीयं कूटं ॥ आद्यंतयोरिफः कीलकं ॥ तदुक्तमाचार्यैर्भैर
वीतंत्रे ॥ आद्यं तृतीयमनलेन निमेयं वीजं कूटं द्वितीयमनलेन विराजमानमिति ॥ एवं प्रसंकेनाभ्याह ॥ वाग्भवमि
ति ॥ पंचकूटात्मिकेति ॥ हसकलरेति पंच व्यंजनसंयोगात्पंचकूटात्मकत्वं रेफरहितत्वेन चतुष्कूटत्वं रेफोपस्थि
तयोगे षट्कूटत्वं ज्ञेयं ॥ अस्याश्चिंत्यप्रस्तारभेदा ग्रंथगौरवभयान्नोक्ताः ॥ तेनं त्रांतरादवगंतव्याः ॥ आद्यं बीजं मध्यं
शक्तिः ॥ अन्त्यं वा शक्तिः ॥ व्यस्तबीजध्यानफलमुच्यते सारस्वतमतात् ॥ नवकुंदनिभां देवीं मुक्ताजालविभूषणां ॥
मुद्राकपालविद्याक्षमालाराजन्महाभुजां ॥ १ ॥ वाग्भवं योमुदे ध्यानिलकुंज पतिसंयनः ॥ कविनाजायतेतस्पनानाह्न
ता र्थशोभना ॥ २ ॥ रक्ताम्बुरतरो मूर्लोविजलनमणिपात ॥ ॥ स्रणिपाशकपालेषुमाद्वलिंगधनुःकरां ॥ शारके
रलंकृतां पुष्पैर्मदाघूर्णितलोचनां ॥ हेलाविलाससंपन्नां नवयौवनसुंदरीं ॥ ४ ॥ देवीं ध्यात्वा जपेत्संतं यो बीजं मध्य

मंत्रराजं त्रिजेजो वै सोनवेदा सु सुराव शि लिलोगसो ॥५॥ अत्रकामाजु ध्याकनक कुंकुमकुसुमकवारिणं नवकुंकुमं
भोगोराजन्मौक्तिकभूषणां ॥६॥ शक्तिसंबिम्बयोध्यात्वा बीजं सारस्वतं वशी ॥ योजयेत्कायतंतस्य कविता तु विसमन
ति ॥७॥ तं चांतरे च ॥ ॥विद्याकामो वाग्भवाख्यं शुक्लवस्त्रानुलेपनः ॥ मौक्तिकाभरणो भूमिगृहे जप्त्वा त्रिलक्षकं ॥१॥
गद्यपद्यामृतैर्दिव्यं वाणीमिति भावनया ॥ पालाशैरेवकुक्रूयात्पुष्पैश्रिमधुरप्लुतैः ॥२॥ सजायते कविश्रेष्ठः सुंद
राणां वल्लभः ॥ त्रिलोकीवशकामश्चेत्कामराजं द्वितीयकं ॥३॥ कस्तूरीकुंकुमामोदमधुरोरुणभूषणः ॥ रक्तच्छो
मांबरधरो जपेल्लक्षत्रयं सुधीः ॥४॥ तेनांगसेर्मदासौ लोलैर्वशाये विदधीजगत् ॥ अंबिकेनिस्वकं रूपं ध्यायन्रूपेण चे
तसा ॥५॥ जुहुयान्मालतीपुष्पैः शीतकर्पूरसंयुतैः ॥ जगंति तस्य वश्यानि नवं ति बहुना त्र किं ॥६॥ वाग्गिजाशमधि
ष्ठमनायो बीजमंत्रमपि पुष्करलक्षं ॥ संजपेद्विमलभूषणवस्त्रो सोनवेत्क विवरोमितकीर्तिः ॥७॥ मालती मुकुलजै
र्लहदैश्चंदनांगसि घने निमज्जितैः ॥ श्रीकरिक्तसुमकैर्हुतक्रियासे वचाम्रुकविताकरामनेति ॥८॥ ॥अत्रत्र्यंबकहृ
ता अतिगुप्ततरत्वाद्वीजत्रयस्य दीपिन्युधारोनकृतः तेन च विनाद्वयं विद्यान सिद्धिदा अतस्त दुधारः सिद्धेश्वरीतंत्राल्लिख्य
ते ॥ ॥वाग्भवं प्रवक्ष्यामि कृतवह्नि दयितास्थानगं वाग्भवाख्यं हि त्रिकूटदिनापि स्याद्भिस्तदनुमहाकोणमित्येचयासं
॥तस्मात्कुर्वित्य सोचेन्मनुरयमुदितो रुद्रवल्लस्तदंतस्तारान्मोकंतदंनेककरूपदसहितं स्याद्वसंमोहनाख्यः ॥१॥
बीजानां दीपना नित्यरिह मनवो ये सुदास्ते स्मदेव त्रैबीजोमंत्रराजो भवति जपविधौ सर्वसंपत्तिकारि ॥ विद्यानां पा
रगामी युवतिजनमनः क्षोभकारि विहारि मंत्रास्यास्सर्व संपत्नरपति सहशो मुक्तवा धाम्निमायुरिति ॥२॥ चेतस्या
द्योदनुद्धारः प्रथमश्लोकव्याख्यानो कोतु संधेयः ॥ उत्तरषट्कं ॥ आदिमेन तु साहस्राम ध्यमेन तु कीलिता ॥ अं
तिमं न तु साच्छिन्नातेन विद्यान सिध्यति ॥ आदिमादिमनादिंच मध्यमध्य मम मध्यमं ॥ अंत्यमंत्यमनंत्यं च त्रिपुराशि
घ्रसिद्धिदा ॥ आदिमेन तु मध्याद्यावंत्यमध्येतु संस्थितौ ॥ पुरक्षोभाय जपं विदिशीनानेन साधकैरिति ॥ अन्यत्र तु ॥ १

आद्यं बीजं मध्यमेन मध्यमाद्यावंत्यं चांत्येयोजयित्वा जपेद्बुधः ॥ त्रैजोवांतः पातितो त्रतसंघाव स्याप्ततस्येच्छयं तु जातो भवे
युः ॥१॥ आद्यं कृत्वा चात्रसानंतं बीजं मध्येमध्यं चादिमे स्याच्च केंद्रः ॥ कुर्याच्चित्तं योजपेन्मंत्रमेनं जातवान्मुक्तसौभुने
दिव्यसिद्धिमिति ॥२॥ करयोरिति वामदक्षिणयोः ॥ तदुक्तं ॥ हस्ततलेन्यसवेदकाक्यं द्वितीयइति ॥ तवयोन्यात्मक
इति यदुक्तं तन्मे वाह ॥ करणेति ॥ त्रित्रिस्थाने रेकैकृयायो निः ॥ अत्र वामांगादिन्यासइति केचित् ॥ अतएव हृज्जायां वा
मकोणइत्याद्युक्तिः ॥ शंखयोरिति ललाटपार्श्वेच्छि प्रदेशयोः ॥ त्रिकांडमपि ॥ शंखो निधौ ललाटा स्थ्नीति ॥ नसी
तिनासिकायां ॥ पिंडरेत्थ दरे ॥ उच्चाकारत्वात्तस्य कुक्षावित्यनेनेकद्वात्रयो माकारासिद्धयेनाभिनालोद सः ॥ तदु
क्तं ॥ कौर्प्परयोनाभिमंडले न्यसेदिति ॥ कचि नाना बितिपाठ ॥ ध्वजो लिंगरंत्यादीति यदुक्तं न देवाद्ह ॥ मूले इति ॥ वि
लोमतस्त्रिनिर्वालावी जैर्विन्यसेदिति संबंधः ॥ स्थाने षोढितितत्र त्रसबध्यने ॥ तत्र विलोमत्वं नामेदंरते वायुवृ
त्त्यंसमनो त्र छायाम ध्यमिति ॥ यदाकूः ॥ कामस्य कामबीजं रतिबीजं वाग्भवं समुद्दिष्टं ॥ संमोहनाख्यमेतं प्रीतेबीज
मपाप्रोक्तमिति ॥ एषितिषु वेक्ति स्थाने षु विलोम बाला बीजैः सत्र श्रुते शाद्यान्यसेदित्यन्वयः ॥ अत्रापि विलोमत्वं
पूर्ववदेव ॥ स्वस्वबीजादिकमिति मूर्तीनां वस्त्रमाणानि बीजानि मनोभवादीनां क्रमेण वनितान्तु दर्बाणवाच्यत्व
काममायाबीजानिज्ञेयानि ॥ उभयाश्रादिशब्दस्तत्पूर्वमात्रं बोधयति ॥ तेकपद्यंतेनायं प्रयोगः ॥ क्लीं ईशानाख्य
मनोभवाय नमइत्यादि ॥ यथापूर्वमिति निस्वबीजादि यथाक्रममिति स्वस्वबीजादिकमिति यदुक्तं तानि बीजान्यु
द्धरति ॥ स्तुरिति ॥ स्तुसः व्योम हः अग्नी रेफः ॥ व्यासमच्च युतइति ॥ ऊर्ध्वाधो भागक्रमेण सद्यादिपंचरूपा
विलोमेन ऊ ए ऊ इ अ ॥ षडिति पद दीर्घयुक्तेन बीजेन मध्यबीजेन आद्येनबीजेन मंत्राद्येन संप्रदायात्पंचाक्षराद्यु
क्तेत्याहितेयं ॥ तेनायं प्रयोगः ॥ ह्रीं हसकलह्रीं हसौः कृत्वा ॥५॥ ह्रीं हसौः शिरसे स्वाहा ॥ क्ष्रूं हसौः शिखायै वषट् ह्रैं हसौः कवचाय हुं ह्रौं
हसौः नेत्रत्रयाय वौषट् क्रः हसौः अस्त्राय फट् ॥ इत्यादीमिति ॥ अत्र सर्वत्राचार्येण मकारानेक पठितः ॥ अन्यत्र तु ह्रांह्रीं ह्रूं इत्यादि

कोकः स्यादिति॥ अन्यत्रापि॥ अथ योगरूढ बहुत्वे दिग् इति॥ स्वाद्यांश इत्यादिकं पूर्वं कांतानन्तं महत्तमेकवस्तुतादजं द्वितीयं
मे वेद॥ मुखांतस्थितं देवतामाक्षिरूढं सर्वामे रूपं च प्रदर्शयेत्॥ मद्ध्येस्मिन्नादि पञ्च स्वराद्यं कपिशं खचतुष्कं कपू
र्वेण युक्तमिति॥ क्वचित्तु तर च संबध्यते॥ सर्गांतो नपुंसकः॥ कंठि केति मुखमध्ये स्थानविशेषः॥ कर्णिकेति
पाठस्तदा कर्णिकाकर्णभूषणं इति त्रिकांडी॥ विधिनेति चतुर्थ्यंतं नमोंतं तत्वं मंत्रिणा मनेन समुच्चितं पूर्वं इत्युक्तं भ
वति॥ तारानेवाह॥ वागिति॥ वाग्भवं कामः कामबीजं अन्यत्स्वरूपं॥ भूषणाख्यमिति॥ भूषणरूपे वर्णन्यासो
भूषणन्यासः॥ तमेवाह॥ ततः साधकस्तत्त्वमोन्यसेदिति॥ मातृकावर्णानि विशेषः॥ साधकसत्तम इत्यनेन वर्णा
रूप नां सबिंदुत्वं तत्स्थाने भूषणेत्वेन ध्यानं चोक्तं॥ न्यासस्थानान्येवाह॥ शिरसीति॥ कंठस्तनयोर्गलस्तदधो
भागः अत्र कर्णादिषु द्वि द्विवर्णन्यासः॥ अस्थाने एकं पाणिपोरे कंतस्पष्टदेशे एकमिति संप्रदायविदः॥ स्फिक
शब्देनोच्यते स्मात् स्पृष्ठ्यौ उच्यते कंठके मूर्धन्योत्त॥ कदितात्मकश्शाः कर्णकुंडलयोर्मूर्धन्यदंतानीति विवेकः इ
ति देशिकसत्तम इत्यनेनोक्तं॥ उद्यविति॥ शिरसां मुंडानां माला यस्याः सा तामिति विग्रहः॥ रक्तेति रक्तचंदनं॥ वायु
ध ध्यानं दत्वा हूर्ध्वयोरादक्षेतद धस्तयोरंत्ये॥ दक्षो धृतोद साधा पर्यंत मितिकेचित्॥ अत्र ध्यानानन्तरं बाणबी
जपूर्वकं पंचमुद्रा गुरुवक्त्रगम्या दर्शयेत्॥ दीक्षां प्राप्येति शक्तिदीक्षां प्राप्येत्यर्थः॥ सा च शक्तितंत्रात् सिद्धेश्वरी
मतादितो ज्ञेया॥ तत्व भानुभास्वयोः स्वरूपाणामित्येकदेशः॥ तत्वलक्षं षड्त्रिंशल्लक्षं होमस्तु षड्त्रिंशत्सहस्रपजारा
कुसुमैः इयं चतुःकूटस्य संख्या॥ त्रिमधुरैः पयोमधुघृतयुक्तैः केचित्पयःस्थाने शर्करामाहुः॥ इदमुनयत्र संबध्य
ते॥ तत्वलक्षं चतुर्विंशतिलक्षं॥ होमस्तु चतुर्विंशतिसहस्रं करवीरैः इयं संख्या पंचकूटस्य॥ तत्वलक्षं द्वादशलक्षं
तंत्रांतरे द्वादशतत्वानामुपदिष्टत्वात्॥ तदुक्तं प्रयोगसारे॥ अतो द्वादशतत्वानि वदंत्येके विपश्चित इति॥ तन्मते
प्रस्तवे वेतिवाराष्टः समुच्चयोमितितोभयैः द्वादशसहस्रं होमः॥ इयं च संख्या षड्कूटस्येति ज्ञेयं॥ तदुक्तमाचार्यैः २

॥ दीक्षां प्राप्य विशिष्टलक्षणयुतः सत्संप्रदायाद्गुरोर्लब्ध्वा मंत्रममुं जपेत्सु नियतस्तत्वा धजेत्ता वधि॥ सा हवेत्तैस्त्रन
वैः पलाशकुसुमैः सम्यक्समिद्भिर्जुहेन्नेमं चीनां तु सहस्रकं प्रतिकुर्नेदद्यादिस्त्रैरपिति॥ तत्रतत्वानि षड्त्रिंशत्
चतुर्विंशतिः अर्द्धद्वादशांनीति मानवः षड्त्रिंशत्तत्वानि चतुर्विंशतितत्वानि द्वादशादितान्येतिपद्मपादाचार्यै
र्व्याख्यातं॥ अत्रापि नानुष्टाद्धा येथिमेवज्ञेयं॥ पूजायंत्रमाह॥ नवयोनीति॥ नवयोन्याथकर्णिकं पद्मं अस्याः पू
जायंत्रमिति शेषः॥ तदुद्धारप्रकार उच्यते॥ द्वितीयादि द्विद्वि भागे योनीसंध्वना स्त्रिना॥ मितान्यंशगुणान्नव
कान् बहिः पद्मं समन्वयं॥ अस्यार्थः॥ यथेष्टप्रमाणं वृत्तं कृत्वा तन्त्रात्कृत्तं च तु रुचिमन्यतश्चैकं भागमूर्ध्वत
स्त्यक्त्वा द्वितीयं भागमारभ्य तृतीयभागांतं अधरोऽस्त्रं कृत्वा ततो मध्यादारभ्य चतुर्थांतं द्वितीयमधराय
अस्त्रं कृत्वा तदुभयसंधिते दिव्यमभागमारभ्यऊर्ध्वं तृतीयांतपर्यंतं अस्त्रं कुर्यादिति॥ तदुक्तं॥ बद्धे पुरं द्वित
यवासव योनिमध्यसंबद्धं वह्निचरुणोत्रासमाश्रितात्राति॥ वरदानयथारिष्ट इति स्मरणमात्रं॥ चतुर्थपटल एवा
स्याध्यानस्योक्तत्वात्॥ वीरमंत्रमुद्धरति॥ वागिति॥ वाग्भवबालाद्यबीजं॥ जोद्दितः पराये स्वरूपं श्रीकंठ अका
रः॥ लोद्दितः पः अनलो रः दीर्घवामाकारयुक्तः तेन रायै परा इति स्वरूपं॥ अपरायै स्वरूपं॥ पुरा अपरा इत्यनु
संधिः॥ हसौ इति पिंडं सदाशिवमहाप्रेतो तस्य स्वरूपं प्रेतमिति द्वितीया शष्ठकर्मणि॥ ङेः तं चतुर्थैकवचनांतं पद्मा
सनं तेन पद्मासनाय॥ प्राक्कमध्ययोन्यंतराले श्रीगुरुक्रमं पूजयेदिति संबंधः॥ श्रीगुरुक्रमस्तु त्रिविधः॥ ॥
दिव्यौघसिद्धौघमानवौघश्चेति॥ तत्र परप्रकाशानंद परमेशानंदपूरशिवानंद कामेश्वर्यानंद कामानंदा
मृतानंदादिव्यौघाः॥ ईशानतत्पुरुषाघोरवामसद्यानंदाः सिद्धौघः॥ मानवौघस्तु स्वस्वगुरुसंप्रदायाद्वि ज्ञेयाः॥
पीठस्योत्तरभागे वा गुरुपंक्तिं प्रपूजयेत्॥ इति सामान्यविधिरप्रवादो प्राङ्ग्नथ मध्ययोर्न्यंतराल इति॥ आग
मोक्तेनेत्युत्तरषट्कप्रोक्तेन॥ आगमः पूस्तुतस्थितिकथनं तत्र आगत शिववक्त्रानुगतं तंत्रं गिरिजामुखं॥ म

तंचबाणुपेक्षस्यतन्मादागमत्र्चानइति॥ अतएवसमाहितमावधानेनेत्युक्तिः॥ पंचभिः प्रणवैरित्युक्तं यत्नानेबाह॥ नाराइति
॥वामप्रापावाम्रवं॥ कांतिमायाविजं। कमलाश्रीबीजं। अन्यत्पिंडद्वयं॥ रतिप्रीत्योर्मनेएकहस्तेस्वद्वितीयेननमस्कारः॥ यथा
पूर्वमितिआग्नेयादिकेसरेषु॥ मध्ययोरंतरालेचभद्रदिक्षुच॥ विधानवित्तमेनमध्ययोनिबाह्यदेशइत्युक्तं॥ हस्ताभ्यांरि
ति॥ सव्यहस्तेबाणः। अन्यहस्तेननमस्कारः॥ तदुक्तं॥ स्त्रीविपणाद्यात्क्रमशःसर्वानिरंशोऽन्निनाः॥ समवाःसव्यकरकलि
तबाणाःशेषकरैःकृतनमस्काराइति॥ भूतसंघ्नाइति॥ पृथिव्यादिवर्णत्रितयवर्णइत्यर्थः॥ सुजगादिकाइत्ययथा
मस्ताःभूतारइति॥ चंडिकांता॥ तदुक्तमाचार्यैः॥ मातृगणंसचंडिकांतंदलेष्वपियजेदसितांगाद्येरिति॥ यथावदित्यने
नदीर्घाद्याभात्मोरुस्वाद्यानैरवाइत्युक्तं॥ संपदांपदमित्यनेनास्याःसंपत्प्रदत्वमपि नामेतिस्वचितंभवति॥ जगंतिव
शपानियस्येतिबहुव्रीहिः॥ रमायाभुवनंभवेदिति॥ तत्रध्यानविशेषः॥ मातुलिंगजिपिपात्रपंकजैःशोणमानकरपंक
जांशिवां॥ संविचिंत्यखलुपौष्टिकक्रियांकुर्वतोभवतिभूतिरंजसेति॥ ११॥ हयारिनैरिति करवीरजैःसचनैःपयोनैर्वेतिहृत्
यःपद्मैः॥ वशंनयेदितिध्यानविशेषोयथा॥ पाशांकुशौधृतकरामरुणांप्रसन्नांमाणिवज्रदरितैरपिभूषितांगीं॥ मूर्ति
विचिंत्यविदधत्पुरतोमागविश्पक्रियां चनयनांजनकालिमंत्रीति॥ १२॥ नवेत्युकविरितिध्यानविशेषःशैवितनासात्रे॥ सार
स्वतमयीमूर्तिमादिमूर्तिसमन्वितां॥ पश्यरेदृद्धादशांतेस्याःसोचिराद्वाक्पतिर्भवेत्॥ इति॥ अमृतागडूची॥ अपमृत्युजिदि
तिध्यानविशेषोगौतमेनोक्तः॥ ओंकारस्थितांतिककर्माणिशुक्लवस्त्रांविचिंतयतां॥ वराभयस्तुधाकुंभपुस्तकाढ्यभपाणिनी
मिति॥ गिरिकर्णीअपराजिता॥ पटुलवणं॥ नंदावर्तैर्गंधतगरैः॥ कृतमालैःराजवृक्षकजैः॥ पाटलैरित्यादिना॥ विक्रमि
तैरितिविशेषणात्पुष्पैरितिलभ्यते॥ हिमांभसानीहारोदकेन॥ कपिरक्तचंदनं॥ चोरंकर्पूरंसटातियावत्॥ दिग्भागंद
शभागं॥ कन्ययापिष्टमितिकुलत्थचक्र ईशरात्रौश्मशाने संप्रदायेनपिष्टंस्रुत्साधितमितिएतन्मंत्रजप्तं॥ यंत्रमाह॥ मध्ये
ति॥ प्रविलिखेन्मादहेतिएपेनरएवंत्रिरादृत्तिर्भवति॥ १३॥ यत्रामित्रेपुराणायालिप्यामातृकयाःत्रु बिंबद्वितयेनपरस्य

रव्यतिनिन्नेन॥ मन्मथबीजंभैरव्याएच॥ यंत्रांतरमाह॥ वन्हेरिति॥ कामभिति कामंभैरवामच्वबीजं॥ इमंकामघ्नस्तसं
स्वेषुषोडशसंख्येषु॥ अमुंकामंव्योमव्योमबीजंहं॥ भुजदलंभूर्जपत्रं॥ यंत्रांतरमाह॥ वन्हेरिति॥ मदनेनसिद्धं॥ वा
णवेणप्रसिद्धं॥ संधिनिकोणानभितोव्हत्तमध्यस्त्रबीजेनेत्येकत्वंविवक्षितं॥ सर्वमंत्राबीजमध्येस्विवेदित्यर्थः॥ तदुक्तं॥
मनोभवस्यसकलंककोणदेनद्विपेदिति॥ पंचमनोभवात्मकमिति॥ पंचभिःकामबीजैर्यंत्रस्योत्पन्नत्वात्॥ पंचकाम
मंत्रायथा॥ कपंचमंशुचिनयनांतसंयुतंसवामदृक्श्रवणगुणान्वितःकरः॥ रविसरोरुहरिदयविकर्णकवबलंततस्तर
उपरान्वितोभृगुः॥ तेषांशिरःसुविदधीतचतुर्थचंद्रानेचमयान्निगदितारवलुपंचकामाइति॥ बालाबीजैस्त्रिभिरितु
पृहिएं॥ ॥बालामचमुदुरति॥ अधरइति॥ अधरोबिंदुमानैं॥ कुलाककारः॥ इंदोलः॥ शशीबिंदुः॥ ईस्वरू
पः॥ तेनक्लीं॥ भृगुःसः॥ सर्गोविसर्गस्तेनाढ्योमनुरीतेनसौःइति॥ अन्यत्रसबिंदुरुक्तः॥ तदुक्तंसनत्कुमारे॥ अ
ष्टमस्यतृतीयंचचतुर्दशसमन्वितं॥ दंडकुंडलमेतद्विसारस्वतमुदाहृतमिति॥ अस्याविद्यायास्वापरनि॥ तदु
द्वारोयथा॥ देव्याशश्वायेनविद्येयमाद्याप्रवैतेनप्राणाहीनानवन्हा॥ शिवशक्तिबीजस्तएवशंभुनानिर्दितंतस्यै
रूपरिपूर्वबीजयोः॥ अकुलंकुलोपरिचमध्यमाधरेदहनंततःप्रभृतिसोऽक्षितानवदिति॥ पूर्ववदित्युक्तत्वात्
॥ प्रथमबीजस्यवाग्भवमितिनाम॥ मध्यमस्यकामबीजमिति॥ तृतीयस्यशक्तिमिति॥ एतत्रासिध्यैवपूर्वमत्रेपिवा
यवकामशक्त्योर्नयोर्व्यवहारइतिज्ञेयं॥ अतएवांशातःअंतोद्धारः॥ व्यस्ताव्यस्तजपध्यानादिप्रवृत्तिमत्राप्य
नुसंधेयं॥ ऐंसंसबिंदुबीजंमध्यशक्तिः॥ तदुक्तं॥ अमुष्यमंत्रस्यरदांतयुक्तंबीजंसदंडंलकुलाशपूर्वं॥ सक्ति
स्तसमवंडलकर्णहृवंमहाद्वेजैचन्द्रिकमानतानांमिति॥ अमैरत्वेतन्मध्यबीजस्यनित्यामंत्रत्वमप्युक्तं॥ यदाह॥
नित्याक्लिन्नाजपेत्कामबीजमेणार्थसिद्धये॥ पंचरत्नस्वाद्यबीजेनविन्यसेन्मुखपंकजे॥ षट्संधीर्नेनषडंगानिकु
लानित्यानिजेप्सदा॥ मदिरांनोविधिमध्यस्थरक्तपंकजमध्यगां॥ मुरूपांकुंकुमाभाव्यामांकेचिनशिरोरुहा॥

चतुर्भुजां महादेवीं पाशांकुशधरां शिवां ॥ वामेतरकराम्बुजकपालपुस्तकां सवां ॥ वामहस्तसमासक्तकपा
लाभयदायिनीं ॥ आत्मानं देवतां ध्यात्वा मंत्रलक्षं समेजपेत् ॥ मधूककुसुमैर्जुहुयात् दशांशं मंत्रसिद्धये ॥
नित्यं हि त्रिनेत्रमार्गेण पूजां कुर्याद्दिनं द्विज ॥ राजानं राजपत्नीं च वशीकर्तुं यदीच्छति ॥ नत्वोरः समारुह्य मनसा
नन्दयोजपेत् ॥ पन्नामसहितं कलानिलाविश्रांतपेत्तरः ॥ तामाकर्षयेनेवशीकुर्याच्च नृपतिं ॥ अनयामात
कोदेवीमग्र्यितां निसुतं जपेत् ॥ त्रैलोक्यमखिलं तस्य वरो तिष्ठति दासवत् ॥ न्यस्तमंत्रांगुजीव धात्रो निश्चीना
मयुक्तेत ॥ सोमनिशी सुष्टिः ॥ शय्यागतस्मरन्नित्यमिष्टामाकर्षकं जपेदिति ॥ ॥ गायत्री मुद्धरति ॥ मान्म
थमिति ॥ प्रसिद्धमान्मथं अन्यच्च स्वरूपं ॥ त्रिपुरास्तु तिमारते ॥ स्तुतसेति ॥ यथास्तुत्या ॥ नारव ज्वलो योदार स्ते
नरूपिरां ॥ मुक्तामणिचूतारस्यादितिमूर्तः ॥ अन्योन्यं परस्परं योजेद कलहस्तेनाकलानियानिमानानिप्र
माणानि तत्र देस्त द्विशोपे ॥ वास्तव बीजेनाकारसाम्यात् त्रिकोणमाधारमंडलमुच्यते ॥ तन्न नवान्तनडुत्त
कानं ॥ तत्र पश्यापि पराया एवोत्तमत्वस्त्रयापि अन्मासामपि तस्थूलरूपत्वात्र बोत्तिः ॥ यद्वा वाग्भवं कुंडलिनात
द्यात्तनडुत्पन्नत्वात् ॥ शक्तिः कुंडलिनीतियानिगदिता आद्यमसंकेतुके ॥ एवं नतानवचतुरः परादीन्परा
पश्यन्तीमध्यमावैखरीरूपान् वास्तवेषु स्थानेषु आधारनाभिकंठमुखेषु क्रमादाश्रितकं गादिनिकर
योः विहितार्थ मिस्तिार्थं उदीरयंतीं वायुं प्राणापानरूपं ॥ वैरिषट्कं कामक्रोधलोभमोहमदमत्सररूपं ॥
मन्मथरिपोः पुरुषस्य ब्राह्मणो वा अर्धनागं सन्निधिं ॥ तन्मतवेदवादित्वात् ॥ विपदो प्रतिकूलतं दुर्मादः ॥
नीचेदिति ॥ त्वदधिष्ठानाप्राथादिति भावः ॥ स्वचुबासनवनान्मूलाधारात् ॥ शिवराजधानि सहस्रदलकम
लं सुषुम्णायां नवं सोषुम्नानदेव पश्यं येषां तानि ॥ क्वचित् सौषुम्नमपकमलानीतिपाठः ॥ कमलानि आधारा
दीनि सहस्रांतानि ॥ आनंदजन्मनवनं श्रुतिनां नवनमित्यस्तस्थपकरूपं ॥ शब्दार्थयोर्भवि: सन्नायचनत् ॥ ४

॥शारं कर्मफलं द्युतिखंडयता तिशारदाच्छिशक्तिः ॥ द्वादशभिरिति ॥ सद्य रसादिभिः स्मरामीत्यंतैः ॥ आपद्य
हृदयस्य मुखस्वरूपवं धत्ताङ्क्षयोरपि स्वरूपफलनिर्दिश्यात् ॥ अयच द्वादशभिः पद्मेन कोशनेदो द्युमणिमा
लानामकः प्रबंध उक्तः ॥ नु लक्षणमुक्तं नाम वेन ॥ अद्युमणिमालास्यात्पद्वैद्वादशभिः समैः ॥ प्रत्येकं नाय
कोत्कर्षप्रकाशनपरायणैः ॥ मुखबंधे श्लोकयुग्मं तथान्त्ये च द्वयं मतं ॥ कृता द्युमणिमालेयं कीर्तिर्द्युद्धिम:
तीन्द्रणामिति ॥ ॥ राजमातंगिन्नामंत्र मुद्धरति ॥ वागिति ॥ वास्तवं भयाशक्तिबीजं ॥ कमलाश्रीबीजं ॥ तारः
प्रणवः नमः ॥ तेन मोहनमसांते ॥ ब्रूलिकनेत्रमिकारः ॥ अम्मासनमिति ॥ भृगुः सः सत्वस्वरूपं ॥ रविर्मकारः शिवयुगे
कारयुक्तः तेन मे दक्षिणामूर्तिऋषिर्गायत्रीछंदः मायाबीजं स्वाहाशक्तिः ॥ कंठसन्मणिगलितस्तदधोभागः ॥ अनाह
तेहृदये ॥ गुह्यदेशे लिंगे ॥ दक्षिणान्ययोरितिमार्गत्रिकोपिकमात्क चिह्नकच्यः इत्यचोक्तः ॥ पदविभागमाह ॥ गुणेति
॥ गुणास्त्रयः पत्तनासप्त पंक्तिर्दश वेदाश्चत्वारः अग्न्यस्त्रयः चंद्र एकः आक्रियं ॥ इत्याह्याह्नमादिशष्टेन प्रातिभिन्नोन
वेचिच्चक्षण इति ॥ समुच्चितबीजाद्याह्युक्तं ॥ मातंग्यंता इति प्रत्येकं ऐं ह्रीं श्रीं इत्यैमातंग्यैनम इत्यादिप्रयोगः एवमग्रे
पि ॥ विधिवदिति पंचमुखेष्वपि ॥ न्यसेदित्युक्तं स्वनाम्नाये आदिवर्णस्तान्येव बीजानि नतुरः सरास्त द्वाद्याशतिः ॥ पू
र्वोक्तबीजापवादः ॥ मातंग्यंता इत्यस्य पश्चात्तेन संबंधः ॥ ततः साधककिंचित्कैर्मूलमंत्राणैः षडंगानि कदंतेति संबं
धः ॥ साधक इत्यनेन ज्ञानेन्यादियोगः सूचितः ॥ विभागमाह ॥ वर्णैरिति ॥ स्वनामेति स्वनामादौ बीजाद्यपूर्वोक्त
ह्रामादिबीजादिकाः मातंग्यंतान्न्यसेदिति संबंधः ॥ मुजलक्षणादयस्यचथाभिधानाइत्यर्थः ॥ ततो मातंग्यंतान्मन्म
थाप्न्यसेदिति संबंधः ॥ वदनांसयोरिति ॥ वामांसादारन्य न्यासः ॥ बीजत्रयादिकानीतिमंत्राद्यबीजत्रयाद्यास
मेरिता एता मातंग्यंताः तनो एतेषु पूर्वोक्तस्थानेषु न्यसेदिति संबंधः ॥ मूले मूलाधारे अधिष्ठाने लिंगमूले मणिपू
रके नाभौ ॥ मातंगी पदशेखरा मातंग्यंता एतानि विशालनेत्रे विन्यस्तव्या इति संबंधः ॥ पूर्वमिति स्पष्टं ॥ मातंगी पदं

पश्चिमसंतिमंयासांताः एभ्यूर्वोक्तिस्थानेषु मातंग्यंतान्मितांगादिभैरवान्नवमोक्तान्विन्यसेदितिसंबंधः ॥ ब्रुवोर्मध्यइत्ता
द्ब्रह्मशिखांतान्मूर्ध्नि चादिस्थानानितानिस्थानानि ॥ मातंग्यंताश्मा ॥ प्रविन्यसेदितिसंबंधः ॥ क्रियाशक्तिमित्येकाशक्तिमित्यद्या
नंदा२ मित्येकाधन्यमामित्येकासुंदरीमित्येका ॥ एतावक्ष्यमाणाः ॥ यथाव्देशिकोत्तमइत्यनेनबीजत्रयादिकान्मंत्रीत्यादौएता
बीजत्रयादिकाइत्यंते मध्येचमंत्रवित्मंत्रिणामंत्रविन्मंत्रीतिचोक्तत्वात् ॥ मध्येयादेवतास्तासामपिबीजत्रयादित्वं
यमित्युक्तं ॥ आदिशब्दार्थमाह ॥ मातंगीमिति ॥ मदद्यांतामह्ममातंगीनेनैवेतिमूलेन ॥ ध्यायेयमिति ॥ चूलिकाके
शबंधः ॥ शंखपत्रंशंखताटंकं ॥ चित्रकतिलकं ॥ नथान्वित्रिकोष्ठा ॥ तमालपत्रतिलकचित्रकाणिविशेषकमिति ॥ अ
त्रध्यानानंतरविणायोनिमुद्रांदर्शयेत् ॥ त्रिकोणकर्णिकमितियोनिकर्णिकं ॥ पूर्ववदितियथान्यस्ताः वामकोणादि
॥ एवमग्रेपियथान्यासमेवपूजासायुधापूर्वमितित्रयेक्तिस्थानेषु ॥ विधानविदितिकर्णिकायांदिक्त्विितिदिक्केसरेषु ॥
पुनरंतरं ॥ वसुकोवीणावहिरष्टदलेषुदलमूलेषु ॥ अपरांगेष्टभागे ॥ निषंगस्तूणारत्तेनाद्याः ॥ पुष्पास्त्रपुष्पबा
णाः ॥ नीतिलक्षणाः षष्टपटलोक्तध्यानाः ॥ आग्नेयकोणमिति ॥ इयंपूजासर्वशक्तिमंत्रसाधारणीतिद्येयं ॥ अतएव
सर्वशक्तिमंत्राणामंतेमुक्ता ॥ सर्वमिति ॥ अन्यगुणानवरुद्धं पूर्वोक्तिमग्निमंत्राचंद्रनेतिशक्तिगंधाष्टकंतेनआहि
शाष्टेनजटामांसीकर्पूररक्तचंदनानिवशायेदिति ॥ अष्टद्रव्यहोमःसमुदायफलं ॥ एतानीतिकर्पूरकपिचोराणि
समूलागानीतिपूर्वमंत्रप्रयोगोक्तभागस्थलनात्पूर्थः ॥ तिलकमिति ॥ कन्ययाहिमोदकेनलक्षचलुई्षपानिषिपि
ष्टेनैतन्मंत्रजप्तेनकृतं ॥ निंबतैलाविनैरिति ॥ तत्तैलाकृष्टिप्रकारोयथा ॥ बीजानिजलपिष्टानिकांस्यपात्रेखरा
तत तपे ॥ स्थापयेत्तस्पृतैलंनिसरैत्तेवनान्यथेति ॥ परान्वशत्रून् ॥ मातंगीस्तुतीमारभ्नते ॥ देवतामिति ॥ रत्नमालेतिप्रबंध
नामतद्योगांस्तुतिनामपि ॥ तस्यलक्षणमुक्तंनामदैन ॥ नैत्रप्रसिद्धनामांकंश्लोकयुग्मंस्तुभावहं ॥ ऊर्ध्वादाद्यंतयोस्त्र
स्पशिखाबंधसमाधिना ॥ भुजंगिःशोभनासास्याद्रत्नमालान्वाधिका ॥ मालायांनवरत्नादौरचितायामितिक्रमा ५

त् ॥ नचंतेकाव्यश्लोकाः पंडितप्रमदाकराइति ॥ नवचंद्रमौलेर्देवीप ... मितिसंबंधः ॥ अत्रिमाणांवस्त्राविगुंफा
वेद्याः पदात्पदंपदेपदेइत्यर्थः ॥ कृतार्थयेतिस्त्वगमनेनेतिविशेषः ॥ धीनोत्तश्रीणयत्त्व ॥ कांत्यादेद्दकांतानीलोत्पलानां
श्रियमाहरंतीकटाक्षेकमलाकरानांश्रियमाहरंतीतिसंबंधः ॥ मातंगकन्यामितिमातंगपुत्रीरूपामित्यर्थः ॥ वि
बाधरएवमन्यस्तल्लामन्त्रपाविशेषस्तेनरम्या ॥ ॥ इतिश्रीश्रीश्रीशारदातिलकटीकायांसत्संप्रदायकृत
व्याख्यायांपदार्थादर्शाभिख्यायांभैरव्यादिबालामातंगीमंत्रकथनंनामद्वादशः पटलः ॥ १२ ॥ ॥ श्रीगणेश ॥
संवत् १९०५ नामाघेमासेसितपक्षेनंदायांभूमिवासरे ॥ सूर्यपुरेत्रा० जगन्नाथेनलिखितमिदंपुस्तकं ॥ ॥
श्री श्री श्री श्री श्री श्री श्री श्री श्री श्री श्री श्री श्री श्री श्री श्री श्री श्री श्री
श्री श्री श्री श्री श्री श्री श्री श्री श्री श्री

॥श्रीगणेशायनमः॥ अथचतुर्दशपटलमारभ्यते॥ ॥अथक्रमप्राप्तान्सोरमंत्रान्वक्तुकामः तस्यतेजस्त्रयात्मकत्वा
दाद्यंतयोःसोमाग्नीमंत्रान्वक्तुमुपक्रमतेग अथेति॥ सर्वसमृद्धिदइतिविप्रयोगोक्तिः॥ मंत्रमुद्धरति॥ स्वद्वारोति॥ स्व
द्विशोवःनस्तोन्तुः सःमनुस्वरःसुदुर्दशस्वरःश्रौ विंदुम्यतयक्तःतेनस्त्रौ॥ प्रयोगसारेतु॥ सवौविंद्वादिसोमायनमो
मंत्रप्रकीर्तितइति॥ स्वविद्धिमानोस्वरइतिपाठ॥ नारायणीयेच॥ आचार्येस्तुसोमित्फकृतमन्येतुइदंमृत्युंजयबीजं
एतदाद्यग्रंथस्तउक्तइतिवदंति॥ स्त्रौंबीजंआथेतिशालिः पद्मपादाचार्येनतिशक्तिकृत॥ अन्यत्तऋषिरत्रिर्वि
राट् छंदोबीजमाद्यमुदाहृतं॥ नमशक्तिरिति॥ प्रणवप्रासादसंपुटं॥ इतिकेचन॥ श्रीकामैः॥ श्रीपुटःकार्यइत्यरेस्वबी
जेनतिमंत्राद्यबीजेनस्वइतिबीजेनवा॥ ध्यानमाह॥ कर्पूरेति॥ दक्षिणवामाभ्यांक्रमुदृचरेकचिह्नमितिपाठः॥
धर्मनिधीपात्र॥ अंकस्थमृगात्॥ उदितःअत्रः आश्रयोगुणोनिलीयमायत्र॥ तेनांकोपिध्येयइत्यर्थः॥ तदुक्तं॥ नवंत
नवदनाष्टपद्योनितांकशशांकइति॥ अथचस्वस्थोकस्यमृगेणोदितःआश्रयगुणःसेवनीयगुणोयेनकलंकितापत्र
देसत्प्यत्वासुधाद्धिंअमृतस्वरूपं॥ रमलस्यपट्टलस्तंसाधकसत्तमइत्यनेनविद्यामंत्रस्यदशांशाजपउक्तःप्रयो
गोपितजपः॥ तत्रधनलाभेश्रीयोगइति॥ पद्मपादाचार्याःसोमांतिकमिति॥ चतुर्थपटलेनस्मिन्सूर्येंदुपावकानि
ति॥ अग्निमंडलतोपूजाउक्ता॥ अत्रतुस्यग्निमंडलेसंपूज्यअंतेसोममंडलंपूजनीयं॥ कश्चित्तुसोमांतमिति॥ वह्नि
मंडलपूजानकर्त्तव्येत्याह॥ तत्रअसांप्रदायिकत्वात्॥ मंत्रदेवप्रकाशिकादिबकृग्रंथविरोधाच्च॥ पाठक्रमोत्तुसो
मांतमिति प्रपंचसारव्याख्यानेपद्मपादाचार्यैःपाठाच्चनिस्तर्यवह्निमंडलार्चनंकृत्वाततःसोममंडलमभ्यर्च्यतत्रम
गचंतमावाहयेदित्युक्तं॥ पूजितेपीठेशनिपावनवशक्तिपूजापूर्वकंपीठमंत्रेणेतिशेषः॥ नाम्नपीठमंत्रोपितंत्रांत
रोक्तोज्ञेयः॥ तद्यथा॥ अमृतानारकाज्योत्स्नाविमलाव्यापिनीनपा॥ चित्राचरूत्तिकाकांतिश्रवणानवशक्तयः॥
अमृतानेकलात्मनेसंवात्पीगायनेनमइति॥ पद्मपादाचार्यैरन्यापीवत्रायत्तकाः॥ राकाकुमद्वतिनंदासुधासंजीव

नारुमा॥ आप्यायनी चंद्रिका च क्रादिनिम्वशक्तय॥ पूर्वादिक्रमतो मंत्री नान्यं ता॥ पूजयेद्दिमा इति॥ कलेनिशाक्तिना
म॥ कलामाशाद्युक्ते॥ क्रमित्करालानिशाक्तिनाम करालीचक्रमादिमाइत्युक्तेः॥ हारसमग्रमाग्नेनाइत्यर्थः॥ आदि
त्येति॥ मंगलः अंगारकः मंदः शनैश्चरः॥ वाक्पतिर्बृहस्पतिः॥ नवचक्रदिक्षु आदित्यादयः॥ अग्निकोणादिषु नैमाद
यः पूज्या इति शेषः॥ यदाहुः॥ पूर्वदक्षिणपाश्चात्यसौम्यपत्राग्रके क्रमात्॥ रविश्चंद्रगुरुः शुक्रसूनू सासापाक्षकेर
म॥ आग्नेयादिषु भौममंदाहिकेतवइति॥ स्वनाम्नः आद्यवर्णाः आद्यक्षराणि सबिंदु नियेषां ते एतेन यत्ताणां मंत्राः
स्त्रचिताः॥ ग्रहमखांगत्वेन॥ नन्वसूर्यमंत्रं वक्ष्यामीति॥ अन्येषांसप्तानां अंगारकायनमइत्यादि ज्ञेयाः॥ अत्रायेन्व
पूजायामपि अयमेव प्रयोगोनुसंधेयः॥ वामोर्द्धेति॥ सूर्यकेतु दित्वा अन्येषां ध्यानं॥ सूर्यस्तु पद्मकरः केतुस्तु
विदिनांजलिरित्युक्ते॥ तदुक्तं मत्तकपिलपंचरात्रे॥ आदित्योद्विभुजः प्रोक्तो वायुलक्षणलक्षितः॥ हस्तयोः पं
कजेनस्यकार्यस्कंधमितेन मे॥ केतोश्च रक्तगदाधरःकृष्णमथवा विदिनांजलिमिति॥ प्रयोगसारेपि॥ पूर्वार्द्धका
यः पिंगकूरः रक्तनेत्रकृतांजलिरिति॥ नारः उज्वलहारो मुक्ताहारः नाराः पानि मितिना थिकासहितं॥ पूर्वोक्तसंख्यमि
ति त्रिसहस्रं॥ भूरुहस्पर्नेन त्रिषवणस्त्रामि पयोहार स्येसुक्तं॥ यत्प्रयोगसारे॥ कृत्वा त्रिषवणस्त्रानं क्षिराहारो
निरंतरः॥ जपेच्चत्वारि लक्षाणि निधानं लभते ध्रुवमिति॥ मंडलत्रयमिति गोमयादिना॥ अन्यस्मिन्सुरस्तीसोमम
र्चयित्वेति पित्रादिन्यासं विधायात्मयागं कृत्वा बहिः पीठे पंकजान्विते अर्चयित्वेत्यर्थः॥ उक्तंच॥ आसीनः पश्चिमे
मध्यसंस्थेद्र्व्याणि विन्यसेत्॥ आत्मानं सकलीकृत्वाभ्यर्चाचांतः सुरेश्वर॥ पूर्वस्मिन्पंकजोपेते मंडले सोमम
र्चयेदिति॥ सुधीरित्यनेनैतदुक्तं भवति॥ विलोममंत्रं जपन्पूरणं कर्पूरादीनां कुमुदादीनां च पुष्पाणां तत्र नि
क्षेपइति॥ यदाहुः॥ संस्थाप्य राजतं तत्र चषकं परिपूरयेत्॥ विलोमं प्रजपन्मंत्रं गव्येन पयसा सुधीः॥ क्षिपेच्च
तत्र कर्पूरशीतकाश्मीरकाकृतान्॥ कुशग्रंथियवांश्चैव पुष्पाण्येतानि चादरात्॥ कुमुदेंदीवरस्वर्णकेतकीव १

नमालिका॥ चंपकानियथालाभं शतपत्राणि च क्षिपेत्॥ आवाहयेच्चंद्रबिंबान्निजाह्वा हृदयादिषु तुं एवं समावा
हितं गंधपुष्पाद्यैरर्चयेद्विधुरिति॥ निराहारोर्द्धरात्रादिस्फक्तवाद्धराना नंतरं रात्रौ भोजनमनिषिद्धं॥ कन्यापात्र
नेनैवमादिषु क्रियाऽप्यधिकार इत्युक्तं भवति॥ विद्यामंत्रोदारूत इत्यनेनैतदुक्तं भवति॥ नवाक्षराद्याः एव
एव कन्याप्रदानसमर्था इति॥ नवाक्षराणि॥ रक्तयुग्मं गजो प्रोक्ता कार्णिनीस्यान्नवाक्षरमिति॥ नारायणीये
तु वाक्षरादिविद्यामंत्रमुक्त्वाभिधानांतरितं मंत्रं पत्रे लिख्यतदासनः जपेद्द्वादशसाहस्रमेतद्देकदिनेन यः॥
उच्चारस्य पाचर्देकन्यानुस्वाश्रु दीयत इति॥ अथ तन्त्रान्तरोक्तं यंत्रमुच्यते॥ चंद्रं चंद्रकलाभिरन्वितशशांके
नाम तारोदरे षट्पत्रे परितो विलिख्य च भृगुर्द्वं तेनत्रिविदंवितः॥ सोमायेति पदं नमः पदयुतं चालिख्यतद्वाद्य
तःकादिकांतगतं समर्च्य विधिनाकंधांगले मस्तके॥ जमनदमिदं द्रुणेन गरलप्रध्वंसितं तुष्टिदमिति॥ ॥
सूर्यमंत्रमाह॥ तारमिति घृणिरिति स्वरूपं॥ भृगुः सः वामकर्णः ऊ तेन भूषितस्तेन सूमरु ध्वकारो वह्निः रेफ
स्यासनः॥ तेनयाशेषः अनंतः आ॥ अत्रिर्दः सुनेत्र इः कार युक्तस्तेन दि॥ त्यपश्चिमइति मंत्रविशेषणं॥
त्यइत्यंतमक्षरमित्यर्थः॥ पश्चिम इत्यनेन उमंतोपि भवतीति सूचितुं॥ अभिमतप्रद इत्यनेन विनियोगोक्तिः॥ अ
यं मंत्रः साक्षात् फलतिप्रवितइति स्त्रीशूद्रादेरत्रनाधिकारः॥ तदुक्तं नैत्तरायणशाखायां नारायणोपनिषदि॥ घृणि
रिति द्वे अक्षरे सूर्य इति त्रीणि॥ एतद्वैमाविव्यस्याष्टाक्षरं पदं श्रियाभिषिक्तं एवं वेद श्रियाहैवाभिषिच्यते य
ति॥ केचन श्रिमेनमाहुः॥ अन्ये श्रीकामहृल्लेखासंपुटितं मंत्रं लक्ष्मीप्रयच्छेत्यनेन पल्लवितमाहुः॥ रंबीजंयं शक्ति
ः॥ केचनत्राक्षिबीनाद्यं मंत्रमाहुः॥ तन्मते प्रणवो बीजं माया शक्तिः॥ श्रीबीजांतः संप्रदाये मूलमंत्रस्तमानुषः
॥ अयं श्रीकामहृल्लेखासंपुटीतः प्रयच्छमे॥ लक्ष्मीमित्थं पल्लवितः शंकराचार्यसम्मतः॥ हृल्लेखापूर्वकोतः
श्रीविश्वरूप मतेप्युक्तिन इति॥ द्विरः स्वाहा॥ इरिनामकाः सत्यमेतादयोगमंत्राः पृथक्प्रत्येकमेतद्देगाहेयाः

॥ तत्र प्रयोगः॥ सत्यायनेमोब्राह्मणऋषिकद्रुस्वाहाभदयायनमः इत्यादिप्रयोगः॥ एष एव सांप्रदायिकपक्षः॥ अ
पेक्षितार्थद्योतनिकाकारादिभिर्लिखितत्वात्॥ अत एव प्रपंचसारटीकाकारैः प्रलेसूत्राकारक्रतिश्रवणैर्निवा
रणायेति व्याख्यातं॥ पुनरितनेनाष्टांगोपिस्तवितः॥ तत्रमंत्र षडक्षराणिषडंगस्थानेषुषडंगवद्विन्यस्यत्रस्तु
श्योनमोतयोर्वर्णद्वयंन्यसेदित्यष्टांगं॥ सद्यादिति॥ ॐकारादिविपरितनपुंसकवर्जितपरिनाभिकपंचस्व
:सदयथाक्रमंपंचमूर्तिन्यसेदितिसंबंधः॥ ॐ आदित्यायनमः॥ एं रवयेनमः॥ ॐ भानवेनमः॥ इं भास्करायनमः॥
ॐ सूर्यायनमः इति प्रयोगः॥ यथाक्रममित्यनेनैतादृशद्वाहिमुखेषपिन्यसेदित्युक्तं॥ प्रत्येकमितिनेन॥ ॐ नमो
ॐ इतिप्रयोगः॥ एवंन्यस्तेनव्यस्तन्यासोपिस्तवितस्तत्र क्रोमुद्याप्राक्॥ दानंवरं॥ आयुधध्यानंवामाधर्ध्वयो
रक्तामितरदधस्तनयोरन्ये॥ अत्र ध्यानानंतरंकमलबिंबमुद्रेप्रदर्शनीये॥ कमलाकृतीमुद्रात्रसौरमुद्रयमा
रिनेत्क्रनेः॥ प्रयोगसारेपि॥ दर्शयेदग्रतः बिंबमुद्रेयथोदितमिति॥ तत्राब्जमुद्रालक्षणंयथा॥ करौउत्तानमु
खोकृत्वा मंदतावुत्तानांगुली॥ तलानमिलितांगुष्ठोकुर्यादेषाब्जमुद्रिकेति॥ नारायणीये बिंबमुद्रालक्षणं॥
पद्माकारौकरौकृत्वा अविश्लिष्टेउभध्यमे॥ अंगुष्ठौधारयेत्तस्मिन्बिंबमुद्रेतिसोच्यतइति॥ एते सर्वसौरमं
त्रसाधारणेनिश्चेये॥ वर्तुलकमंडलकं॥ अत्र विशेषः प्रयोगसारे॥ रक्तांबरधरोरक्तगंधमाल्यार्चितःसदा॥
घृतक्षीरसमायुक्तःगुडभक्ताशनोनिशि॥ मैत्राहारोयवावीतः संतःसंतोषवान्सदा॥ मंत्रमावर्त्तयेत्रिसमा
राधनपरायणइति॥ अन्यःपुरश्चरणंसामान्यविधिर्देसमाणएववानुसंधेयः॥ तत्रप्रह्लमण्सस्वं॥ पाठस्प
र्केसमषमूमिति॥ मंडूकादिपद्मेदिकांतसंपूज्यधर्मादिः प्राक्यरक्तखांतान्यंचसंपूज्यपश्चाद्धर्मादिपूजयेदितिकें
चन॥ अन्येतुधर्मादिस्थानेप्रभृतादिकान्संपूज्यमध्येफलकरूपेणपरमसुखंपूजयेत्॥ एतेसर्वत्रस्तयमं
त्रसाधारणा॥ दिप्तीतिसामान्यतत्रकेरत्राग्नेयादिकोणएवगृहंते॥ विदिक्मध्येचसंपूजयेदितिपाठः॥ २

यदाक्षराचार्याः॥ प्रयजेदशप्रभूतांविमलांसाराकृयांसमाराध्यां॥ परमसुखमश्चादिप्रभृतिंप्रभध्येचपावशक्तेः॥ प्रा
गिति॥ प्रयोगसारेपि॥ ईशानांतंचमध्येपिविदिक्षेतान्प्रपूजयेदिति॥ स्वबिंबांतमिति॥ सोमाग्निमंडलेसंपूज्यस्तयमं
इत्यपूजनीयमित्यर्थः॥ दीप्तेत्यासांध्यानं॥ तदुक्तंप्रयोगसारे॥ दीप्ताद्याःशिखाकाराःध्येयाःसुर्नवशक्तयइति॥ अक्षी
बेति॥ स्वविंतयत्र अ इ उ अनक्लीबरूस्वचपदाभान्जासहसंबंधः॥ अ आरे फः॥ रां री रूं रैं रः सादिनचबीजानित्र
न्येतु॥ ह्रस्वत्रयं इ ए अ स्वाक्षः॥ तदुक्तंमहाकपिलपंचरात्रे॥ आद्योपांत्यंतुरायंचत्यक्ताचैवनपुंसकं॥ जेइयेत्रवधा
यंत्रिस्वरैरेभिर्यथाक्रमं॥ बिंदुयुक्तानिबीजानिशक्तिनामयुक्तानिवैद्धनि॥ अन्यत्राकारेकारविसर्गान्विहितान्नबीजा
नीति॥ तदुक्तंप्रयोगसारनारायणीययोः॥ आद्यमंत्यंतृतीयंचत्यक्त्वापिचनपुंसकानिति॥ पाठमंत्रइति॥ सर्वस्तयं
मंत्रसाधारणइतिज्ञेयं॥ ताराद्रीति॥ खखोल्कायेतिस्वरूपा॥ तदुक्तंमहाकपिलपंचरात्रे॥ याद्यमंबिंदुनायुक्तंक
द्वितीयंतथैवच॥ तदेवकेवलंन्यस्यउभित्रंसविलोमकं॥ प्रविलोमाच्चउर्ध्वंस्वयत्ततायोपरिस्थितं॥ अस्तेरेतद्वि
तीयेनस्वरेणैवप्रभेदितं॥ चानुलोमाच्चउर्ध्वेत्रिकवलंतदनंतरं॥ समासाद्धुवतोवक्ष्ममूर्तिमित्रःषडक्षरः॥ इति॥
अन्येषामपिस्तयमंत्राणांमूर्तिमंत्रइतिज्ञेयं॥ तत्राकाशबीजादिरूहतइतिविशेषः॥ अथवात्रेवंव्याख्येयं॥ ता
रस्यआदिशब्देनपृथमेत्यत्नत्वात्॥ आकाशोनस्यपाबिंदुःसंप्रदायादिति॥ अथवाखमितिमंत्रेणाद्यमुपात्तं
एकेनाशबीजंत्रअन्येनस्वरूपं॥ प्रयोगसारेपि॥ सूर्यकांताक्षरेप्रोक्तंबिंदुभूषितमस्तकेइति॥ नारायणीये
च॥ खकांतोदंडिनोचंडोमक्षादशानसंयुता॥ मांसदीप्तजिबद्धायुरेनंतस्पोपरुहिदुः॥ एतत्स्वसाधयेत्का
मानभिषेकनृपादिनेति॥ बलाहोतोयंडीनिमज्ञानांतातकायत्रयमिति॥ त्रिवीजोपितत्रेवोक्तं॥ अत्र
लकारनकारौवैदिकपाठेनदृनेति॥ उभावपिसांप्रदायिको॥ नीबीजोमूर्तिकल्पनायासबीजजपाद्दा
विनिश्चेय॥ अयंस्वतंत्रोपिमंत्रः॥ ॥ अत्रार्ष्यादियथा॥ कृषिरस्तमकआख्यातोजगतिछंदइरितं॥ देवः

६२

शा०टी० सूर्यो बीजशक्तिकीलनमक्षरस्वदक्षने ॥ सूक्ष्मरूपाय शिव धूम्राक्षांते सूक्ष्मतेजसे ॥ सूक्ष्माकाराय शिव धू पृ० २८
ः सूक्ष्म वायवे ॥ सूक्ष्मकायाय सर्कं फट् ज्ञातियुक्तासप्त ॥ रिताः ॥ पंचांगमंशमंत्राणैः षडंगं वा प्रकल्पये
१ त् ॥ रक्ताण पद्मद्वये हस्ते बिभ्राणं वरदानये ॥ बंधूककांतं त्रिनेत्रं चरविंध्याये सुपूजितं ॥ लक्ष्मेकं जपेन्मंत्री
होरहारो जितेंद्रियः ॥ जुहुयात्तद्दशांशेन बिल्वाम्लक्षमिद्भिरैः ॥ सूर्याष्टाक्षरवत्पूजा पीठे सूर्यस्य पूजये
त् ॥ वक्ष्यमाणं ध्यानं च खेचराः सिद्धिमालभेत् ॥ खेचरा सिद्धिफलं ज्ञेयं ॥ उक्तं च नारायणीये ॥ अनेन ब
हुभिः प्राप्ताः खेचरत्वादिसिद्धय इति ॥ मूर्तिकल्पनेति ॥ मूलमंत्रमुच्चार्य पद्मादिमंत्रमुच्चार्य मूर्तिकल्पने
ति पद्मपादाचार्याः ॥ अंगानि पूजयेदिति कर्णिकायां ॥ तदुक्तं नारायणीये ॥ वह्नीरक्षोमारुतेशादिक्षु पूज्याः हृ
दयः ॥ स्वमंत्रेकर्णिकांतमध्यादिक्षु अस्त्रं पुरतश्च दृगिति ॥ आदावित्यनेन केसरेषु गपूजा सूचिता ॥ आदित्याद्या
इति व्यासोक्तबीजसहिता ॥ अत्र केन आदित्यादिभिः त्रयं अस्त्रं इति सामानाधिकरण्यं कृत्वा सूर्येन पूजयंति
तदसत् ॥ उद्दिष्टपंचकमध्ये एकत्यागे कारणाभावात् ॥ सर्वत्र पर त्र च मंत्रयत्र पंचकमुक्तं तत्र तत्र त्याग
स्याद्दृष्टचरत्वाच्च ॥ तेन पद्मपादाचार्योक्तरीत्या आदित्यं मध्ये संपूज्य रव्याद्यो दिक्षु चतुष्केषु पूज्याः ॥ चतसृष्वितिशक्ति वि
शेषणत्वेन मूर्तानंदमीरस्थाने अरुणः पूज्यः ॥ मातृभिररुणांतां तिरिभ्याचार्योक्तेः ॥ पद्मपादाचार्यास्तु मातृसंपूज्य पुर
तो रुणमर्चयेदित्यूचुः ॥ अत एव नारायणीये पूर्वपत्रे रुणस्तथेत्युक्तं ॥ चंद्रादिनिति स्वबीजाद्यान् ॥ चंद्रः सोमः तत्र पू
र्वादिषु चंद्रबुधगुरुशुक्रान् ॥ आग्नेयादिषु भौममंदराहुकेतून् इति ज्ञेयं ॥ प्रयोगसारे पूर्वोक्तानुसंधेयः ॥ अत ए
व नारायणीये ॥ पूर्वादिदिक्षु संपूज्याश्चंद्रज्ञगुरुभार्गवाः ॥ आग्नेयादिषु कोणेषु कुजमंदाहिकेतवः ॥ इति ॥ विधि
वदित्यनेन सर्वपारिषद्ज्ञानम इति ॥ बहिः पारिषदान् पूजयेदित्युक्तं ॥ पूर्वैः सुरैश्चापि सूर्यपरिषद्भिरित्युक्तेः ॥
प्रभाते अर्चयेदिति संबंधः ॥ मंडलमिति वर्त्तिरित्यनेति ॥ रक्तचंदनेन तदुक्तं प्रयोगसारे ॥ रक्तचंदनगंधेन कृत्वा ३

वृत्तं सुशोभनं ॥ मंडलमिति ॥ प्रस्थतोयमाहितेति ॥ प्रस्थप्रमाणमुक्तं श्रीधराचार्यैः ॥ कुडवश्चतुःपलः स्यात्
प्रस्थः कुडवैश्चतुर्भिस्त्यादिति ॥ मनुना विलोमपठितेनेति शेषः ॥ यदाह ॥ पूजयेन्मंत्रं प्रतिगतं क्रमतः ततः पू
रयेत्सु विमलैः सलिलैरिति ॥ गंधोदकेरिति ॥ आदित्यमंडलान्निःसरदमृतधारारूपत्वेन ध्यानेरित्यर्थः
॥ शालिरासुरः ॥ रक्तं रक्तचंदनं ॥ चंदनं श्वेतचंदनं ॥ वेणवं वेणुबीजानि ॥ करवीरं रक्तकरवीरपुष्पमि
ति एरमपुरवः ॥ जपा रक्तजपाकुशं कुशाग्रं तंदुलाश्चाक्षताः ॥ निक्षिपेदिति यवलाभे कुविचितेरपि ॥ त
दुक्तं आचार्यैः ॥ गोक्षीरेण मिश्रितरक्तवेणवराजिरक्तकुशतान्तदशालिकरवीरजपाकुशाग्रान् ॥ श्यामाकतंडुल
युतान्यथाप्रलाभं योज्यं भक्तिभरतोऽर्घविधिर्विधेय इति ॥ २ ॥ एवं संकल्पेति स्वात्मन इति शेषः ॥
स्वे कृपतं नावयन् समाहितः ॥ इत्यादिना चारस्तुत्तैः तस्मिन्याचे सांग इति ॥ षडंगास्त्रांगसहितं अष्टांगेनाभिसंपूज्येति प्रयोगसा
रउक्तेः ॥ पूर्वोक्तलक्षणं पूर्वोक्तध्यानं ॥ आदित्याद्या धूपदीपो ॥ यथाविधीत्यनेनैतदुक्तं भवति ॥ सावरणमिति ॥ व्योम्नि सूर
र्यमंडले पिस्थितमावरणसहितं देवं विलोक्य मनसा समर्प्येति च ॥ उक्तं च ॥ इत्यादिने त्रामयपात्रगतं तत्रैव व्योम स्थि
तं परिवृतावरणं विलोक्येति ॥ विधानवित्तसिधायेतिसंबंधः ॥ विधानवित्त्यनेनैतदुक्तं भवति ॥ सोमात्मना [illegible]
बीजयुतेन वामोपद्माध्येन दक्षिणहस्तेनेति ॥ सम्यगिति प्राणायामत्रयं षडंगन्यासं विधायेत्युक्तं ॥ पुनः संपूज्य जलमि
ति शेषः ॥ अर्घं दद्यादिति तत्र प्रकारः ॥ मूलांते भगवते रवये अर्घं कल्पयामि नमः इत्युच्चार्येति ॥ प्रसन्नेनांतरात्मने
ति तत्रादित्युक्तं ॥ ॥ प्रयोगान् तिलकमंत्रमाह ॥ आकाशेति ॥ आकाशो हः अग्नी रेफः दीर्घ आ इंदुबिंदुः ॥ एत
युक्तः तेजस्वामिति ॥ सर्गान्वितो विसर्गयुक्तः भृगुः सः ॥ क्रम्पादियथा ॥ मनोरस्य मंत्रं कुष्मामुनिरुक्तोथ नाम ॥
छंदोपिरवत्तु गायत्री देवतानि दर्शाधितिरिति ॥ आद्यं बीजं द्वितीयं शक्तिः ॥ प्रणवादिरिति केचित् ॥ प्रयोगविरो
धेपरमात्मादिरजपादि वेति पद्मपादाचार्याः ॥ अंगानि तिनेत्रांतानि ज्ञेयं ॥ अथ वक्ष्यमाणत्वादत्र नोक्तं ॥ तदुक्तं

प्रयोगसारे॥ अंगुष्ठादिकनिष्ठांतमंगुलिषु यथाक्रमात्॥ न्यस्त्वा विनेत्रमंगानि नेत्रं हस्ततले न्यसेदिति॥ नारायणी
येपि॥ न्यस्याङ्गुलीषु पंचांगं लोचनं तलयोन्यसेदिति॥ यथा॥ न्यस्त्वा नेत्रांतमंगानि तयेवात्मनि संयत इति॥ प्रयोग
सारे नारायणीये चान्यान्यंगान्युक्तानि॥ हृदुत्तं यद्विलोमेन बीजं रुद्रमुच्यते॥ अर्कः शिरश्चतुर्थांतः कथ्यते तुर्यतः
स्वरो॥ ह्यासिनी शिखा गतां ऊं वर्मसमुद्दिशेत्॥ द्वितीयस्वरसंभिन्नं मस्त्वतुर्थस्वविंदुकं॥ नेत्रं स्वरांतमारूढं यांतम
स्त्रमितिक्रमादिति॥ नारायणीये तु॥ प्रयोजनादितिलकः सार्द्धं गानः स्मृतो मनुरिति॥ न्यासे क्रमसंग्रहे विशेषः॥
हस्तयोस्तलपृष्ठे च न्यसेन्मंत्राक्षरत्रयं॥ पदांतराधिवक्त्रे तु नयासमग्रहानपि॥ मुखे बाहोश्च पदयोरुदरे वक्षसि
क्रमात्॥ मूर्द्धादिपंचस्थानेषु ऊर्ध्वरेखा द्वयान्विन्यसेदिति॥ मूर्त्तिपंचकं नवयन्त्रन्यासेऽपि प्रपादाचार्याः॥ आयु
धध्यानं स्वर्वतैव॥ भानुलक्षं द्वादशलक्षं॥ अंगैरिति नेत्रांगध्यानं यथा॥ भास्वत्सरोजहस्तानि शांतानि वरदान्यपि॥
अंगानि दिव्यरूपाणि ध्येयानि बलवंति च॥ दंष्ट्राकरालवक्त्रं तु विद्युत्पुंजसमप्रभमिति॥ प्रयोगसारे नारायणीयेपि
॥ रक्ताब्जहृदादयः सौम्या वरदा पद्मधारिणः॥ विद्युत्पुंजनिभं त्वस्त्रमुग्रदंष्ट्रा न यावहमिति॥ पराचंद्रादिभिर्ग्रहैरिति
॥ अत्र स्वस्वनामादिवर्णा दिव्यमंत्रसंधेयं॥ स्वनामाद्यक्षरे विंदु नृषितेरविर्त यजेदिति प्रयोगसार उक्तेः तत्राय
विशेषः॥ प्रागादिस्थितैः चंद्रबुधगुरुशुक्रैः॥ आग्नेयादिस्थितैः भौममंदराहुकेतुभिः॥ तदुक्तमाचार्यैः॥ प्रागा
दिदिशासंस्थाः शशिबुधगुरुभार्गवाः क्रमेण स्युः॥ आग्नेयादिषु रविधरणिजमंदादिकेतवः प्रज्याः इति॥ प्रयोग
सारेपि॥ सोममैंद्रे बुधं याम्ये पश्चिमे तु बृहस्पतिं॥ सौम्ये शुक्रं तथाग्नेय्यामंगारकं तथासुरे॥ शनैश्चरं तनैराक्
वायव्यां केतुमीश्वर इति॥ तेजश्चंडो केगणाः॥ प्रयोगसारे प्रयोग विशेष उक्तः॥ स्वजन्मदिननक्षत्रे ग्रहणे वा स्व
जन्मभे॥ ग्रहाणामपि वैषम्येन यथा प्रत्युपस्थिते॥ इष्ट्वा दिवाकरं देवं यद्दे माङ्घ्रियपोदितं॥ मूलेन सवितृबीजेर
न्येषां च पुरोदितैः॥ प्रत्येकं त्वष्टुया तेषां ग्रहाणां तद्दिशि क्रमात्॥ एकत्र बाथवा वह्निकार्यं कृत्वा विधानतः॥ स ४

मित्पिप्पलरुधितैः क्रमादष्टोत्तरं शतं॥ प्रतिव्याहृतिसंयुक्तं प्रत्येकं स्मरणान्वितं॥ अर्कः पलाशपामार्गाश्वत्थोदुंबरो त
था॥ खदिरश्च शमी दूर्वा दर्भाश्च समिधः क्रमात्॥ पूर्णाहुतिं ततो दद्यात्तेषां प्रत्येकमंततः॥ कृतेनानेन यज्ञेन ग्रहा तुष्यं
ति भाविताः॥ सर्वरोगाप्रणश्यंति संग्रामेषु जयं लभेत्॥ अभिचारादयो दोषाः शांतिं यांति न संशयमिति॥ मार्तंडभैर
वबीजमाह॥ आकाशमिति॥ आकाशं हः॥ अग्नि रेफः पवनो यः सद्यांत औ॥ अर्धीशार्क विंदुः॥ एतद्युक्तं त्र्यक्षरं हृदय
मपि गुरुपदेशतो यथासंप्रदायमुच्चारणीयं॥ ब्रह्मा ऋषिः निचृच्छंदः हंबीजं विंदुः शक्तिः॥ हांतमिति॥ हांतः क्षः दहनो रेफः
नेत्रं इः इंदुर्विंदुः एतद्युक्तेन क्ष्रीमिति॥ सर्वकामफलप्रदमिति॥ अनेनैतत्संगृहीतं॥ यदुक्तं नारायणीये॥ आरोग्यमायुः
श्रीविद्याकांतिःपुष्टिर्धनं यशः॥ सौभाग्यं शक्तिरैश्वर्यं स्त्रीकामे धावतो हृतिः॥ सिध्यंत्येवं विधाः कामा मंत्रस्यास्य प्रभा
वत इति॥ पंचेति॥ सद्यांतं पंचह्रस्वाद्यमित्यर्थः॥ मूर्त्तिः सद्यावसानिका इति नारायणीयस्तूक्तेः॥ मध्यमादिति॥ मध्य
मा तर्जन्यंगुष्ठानामा कनिष्ठास्विस्यर्थः॥ मध्यमाद्यंगुष्ठांत इति नारायणीयपाठोक्तेः॥ बीजेनैतिमार्तंडभैरवेण॥ पूर्वत्रा
पि दीर्घयुक्तेन षट् दीर्घयुक्तेन॥ नेत्रांतांगानीति॥ हृदयशिरःशिखाकवचानि विन्यस्य॥ क्रमितिविन्यस्य पश्चान्नेत्रं वि
न्यसनीयमिति संप्रदायविदः॥ केचित्तु नेत्रांतानीति॥ पंचांगान्येव नेत्रांतानि विन्यसनीयानि॥ पंचांगानि मनोर्यस्य नेत्रं
तस्य न विद्यत इति॥ अस्यापवादस्मृतेः॥ न तत्सांप्रदायिकं॥ अंगानि कुर्याद्विधिरमाबीजेन मंत्रविदिति॥ आप
टलेम ध्येन दीर्घयुक्तेन वा क्लृप्तेनक्रकल्पयेत्॥ अंगानिजातियुक्तानि क्रमेण मनुविन्मत इति॥ भुवनेशीपटले॥
एवमन्यत्रापि यत्र यत्र दीर्घवर्चनं तत्र तत्र षडां दीर्घाणां ग्रहणात्॥ अत्र संकोचेकारणाभावात्॥ नेत्रांतांगानीति व
चनेन संकोच इति चेन्न दृष्यत्र॥ सांप्रदायिकव्याख्यानुसारेण घ्युपपत्तेः॥ किंच॥ नेत्रांतस्य विसर्जयेदिति साद्धाभिवि
दस्य नेत्रांगस्य सामान्यन्तेन यथा पुष्पपद्ममाने नेत्रांगानीति वचनेन बाधोपिकर्तुं शक्यते॥ अन्यत्राप्येकांगपूजा
यथापूर्वमिति वदता दिक्षक्षप्र जो केचनेत्रमात्रे विशेष उक्तः॥ अग्रे पुरुषोत्तम मंत्रेपि॥ नेत्रांतांगान्युक्तानि तत्र च षडं

गमंत्रांताएवोध्यताः॥षडंगमंत्रासंदिष्टानेत्रांतास्तत्रवेदिनिरिसंनेन॥पूर्वोक्तमंत्रेलिखितप्रयोगसारवचनात्॥
अस्मिन्मंत्रेचनारायणीयेप्रोक्तावीगानिषडिति तेनसांप्रदायिक आख्येवगरीयसीसर्णं॥अत्रनेत्रांगोत्कर्षापिज्ञे
यः॥न्यायसिद्धत्वात्॥ध्यानमाह॥हेमेति॥प्रवालंचनेनरक्तमित्यर्थः॥तदुक्तं नारायणीये॥पाशांकुशधरं देवसाक्ष
मालंकपालिनं॥खट्वांगशास्त्रीक्रियद ध्यानं चत्वारानमिति॥दक्षाधूर्ध्वयोराद्यएवंवामांतमायुधानिध्येयानि
॥त्रिनयनेत्यनेनहृदादन्त्रानेत्रत्वमुक्तं॥अष्टबाहुं द्विपत्कालरुमिति नारायणीयउक्तेः॥वह्निनार्धमिति वामे॥दीप्तादि
भिरुक्तेपीठेसोरइत्यर्थः॥उषादिकाः संप्रज्ञेति पाठमंत्रात्पूर्वगतकार्णिकायामिति ज्ञेयं॥आसांबीजेपिविशेषो
नारायणीयेउक्तः॥यदाहुः॥न्यसेद्दुपांसमांसं भां प्रज्ञादिस्त्रक्र्णिकि॥दंष्ट्रिणादीर्घनामादिवरैराद्यादबेन्नतस्यति॥न्यसे
द्विसनेनपीठन्यासेप्ययंक्रमइत्युक्तं॥प्रजयेदेवमिति॥बिंबबीजपुटितेनतेनमंत्रेणबीजेन॥यजेत्प्रयोपचारांतैर्बिल्वेनरुद
द्रेनचेश्वमुक्तेः॥विद्धिद्विलित्यमितिपंचमंदिवाकरं॥यथा॥पूर्वोक्तमिति चतुर्थेकिरीता॥नेत्रमिति तेन ईशानदिशिअंग
द्वयपूजनं॥अह्नानिति पूर्वोक्तमंत्रमितिक्रमेण ततः परमिति वज्रादिकं॥अर्घप्रधानमिति॥पूर्वोक्तमर्घविधानमत्रापि
कुर्यादित्यर्थः॥साधयेदिष्टमित्युक्तं तदेवाह॥शालीति॥बिल्वेति बिल्वफलानि॥तदुक्तं॥सर्पिर्द्राहिति लेखिल्वफले सं
दंकानेनिधिरिति॥लक्षहोमादिपंचविंशतिसहस्रमिलाप्रत्येकं॥नवनिधिरिति मंत्रेण इतिविशेषः॥लनेत्रिधिमिनिवा
पाठः॥ ॥अजपामंत्रमाह॥चियदिति॥अग्निषोमात्मकत्वादस्यात्रपटलउक्तिः॥गनयोरायंतयोरुके वियत्तस्य ऊर्ध्वेंदु
बिंदुःन रादिसः विसर्गोविसर्गः॥घकरः सुरपादपइत्यनेनैतदुक्तं भवति॥जपकालेएवंध्यायेदिति॥तदुच्यते॥मंत्रो
चारणकालेमंत्रंसुषुम्नारंध्रपूरणविश्वरूपंसदानंदात्मकंसंभवित्वकंब्रह्मध्यात्वातत्प्रभया विश्वकृत्सर्वंगमात्मानंअ
हनाराश्चरकूपं षट्त्रिंशकमिश्वरंचिंतयेत्॥पिंगलारंध्रस्फुमादिबीजं पंचविंशकं पुरुषबीजस्वरूपकं प्राणात्मना ध्या ५
त्वा॥द्वितीयबीजमिडारंध्रमध्यस्थंचंद्रबिंबाकरप्रतिरूपमपानात्मनाचिंतयेत्॥तिस्वरूपात्मंत्रादीपाद्दीपांतरप्रे

वनिर्गच्छतौ वामदक्षिणभागेइडापिंगलेपरिहरत्सुषुम्णायामापुरुषवद्धिक्रीतौक्रतौ ध्यायेत्॥ हंबीजंसः शक्तिः॥ हसेतिसं
पुक्तेन॥सांप्रदायिकाः अन्यथाषडंगमाह॥सूर्यात्मने हृत्॥सोमात्मनेशिरः॥निरंजनात्मनेशिखा॥निराभासात्मनेकव
चं॥अव्यक्तात्मनेनेत्रं॥अतनुसूक्ष्मप्रचोदयादस्त्रं॥हन्नामित्याद्येरेनिरिति केचित्॥वामोर्ध्वादिदक्षिणोर्ध्वांतमायुध
ध्यानं॥नानुलक्षं द्वादशलक्षं॥प्रागुक्तेपीठेमूलमंत्रमूलेनसकव्यविधि तुं अंग॥दिभिःसद्भूयजेदित्यन्वय॥आदित्याष्ट
धर्मादि॥रुद्रमित्यादि॥मंत्रेति॥अजपायाःकर्णिकेमातृकोक्तावपिष्ठ॥सयनइत्यनेनैतदुक्तं भवति॥वामहस्ततले
चंद्रमंडलंध्यात्वानमध्येमंत्रंसंचिंत्यतेनहस्तेनतन्मुखंपिधायेति॥स्मृत्वेति॥पूर्वोपासंबध्यतेयमितिलिंगमविवक्षि
तं॥नारीनरोवामिपिक्लैव्यस्तुक्तेः॥इंदुम्यामित्यंतबीजगा॥स्यांविसर्गावियच्चाबिंदुयांततद्दयंतबीजात्॥तत्प्रकारः॥
राम　मनोरमांघ्रिदेशोपग्राम्येतउपविश्यसुषुम्णाग्रस्थिताधोमुखसहस्रदलपद्मकर्णिकामध्येविसर्गचंद्रमंडलहृत्यस्व
पेणध्यात्वा तस्माच्चंद्रमंडलहृत्यद्विगलितबदलसुधाधारयासंसिच्यमानमनाहतकमलकर्णिकागतंसकारसं चिं
त्यसुषुम्णारंध्रेणसकारनिर्गतसुधारसेनाभिसिच्यमानंपरिपूर्णसुधामयं बिंदुध्यात्वाततः स्रवदमृतधारापरि
पूर्णमूलाधारस्थितं हकारं चिंतयित्वाततोमृतरसपरिपूर्णमंत्राक्षरामृतसंसिक्तमात्मानंपरमानंदसंदोहनिमग्नमि
वध्यायेदिति॥ ॥अस्य बीजमंत्रस्यतंत्रांतरोक्तोविशेषउच्यते॥ ॥ईश्वरोवाच॥अजपाराधनं देविकथयामि
तवानघे॥यस्यविज्ञानमात्रेणपरब्रह्माधिगच्छति॥हंसःपदंपरेशानिप्रत्यहंजपतेनरः॥मोहांधोयोनजानातिमोक्ष
स्तस्यनविद्यते॥श्रीगुरोः कृपयादेविज्ञायतेजप्यतेनरः॥तस्योच्छ्वासेस्तुनिःश्वासेस्तदाबंधक्षयोभवेत्॥उच्छ्वासे
चैवनिःश्वासेहंसइत्यक्षरद्वयं॥तस्मात्प्राणस्तुहंसाख्यआत्माकारेणसंस्थितः॥नाभेरुच्छ्वासनिःश्वासेहृदया
येव्यवस्थिताः॥षष्टिश्वासैर्भवेत्प्राणः षट्प्राणाघटिकास्मृता॥षष्टिनाड्याअहोरात्रंजपसंख्याजपामनोः॥एक
विंशतिसाहस्रं षट्शताधिकमीश्वरि॥ज सहजपनेप्राणीस्पंदमानमयीपरा॥उत्पत्तिर्जपिआरंभोमृतिरस्यनिवे

 दयेत्॥ गणेशब्रह्मविष्णुश्च हराय परमेश्वरि॥ जीवात्मनं क्रमेणैवं तथा च परमात्मने॥ षट्शतानि सहस्राणि षट्देव च यांते
पुनः॥ षट्सहस्राणि च पुनः सहस्रं च सहस्रकं॥ पुनः सहस्रं गुरवे क्रमेणाज्ञ निवेदयेत्॥ आधारे स्वर्णवर्णाश्च वादिसांता
नि संस्मरेत्॥ द्युतसौवर्णवर्णानि दलानि परमेश्वरि॥ स्वाधिष्ठाने विद्रुमाभे बादिलांतानि च स्मरेत्॥ विद्युत्पुंजप्रभाणा
नि मुनीनां मणिपूरके॥ डफांतानि महानीलप्रभाणि च विचिंतयेत्॥ पिंगवर्णे महावह्निफणिभानानि चिंतयेत्॥ कादि
ठांतानि पत्राणि चंद्रबिंबानाहते प्रिये॥ विशुद्धौ धूम्रवर्णे तु रक्तवर्णान्स्वरान्स्मरेत्॥ आज्ञायां विद्युताभायां क्षौ दक्षौ वि
चिंतयेत्॥ कर्पूरद्युतिसंराजत्सहस्रदलनीरजे॥ नादात्मकं ब्रह्मरंध्रं जानीहि परमेश्वरि॥ एते षु समस्त च केषु स्थिते
भ्यः परमेश्वरि॥ जपं निवेदयेद्देवि महाराज नवं प्रिये॥ अजपानाम गायत्री त्रिषु लोकेषु दुर्लभा॥ अजपां जपतो नि
त्यं पुनर्जन्म न विद्यते॥ अजपानाम गायत्री योगिनां मोक्षदायिनी॥ अस्याः संकल्पमात्रेण नरः पापैः प्रमुच्यते॥ अनया
सदृशी विद्या अनयासदृशो जपः॥ अनयासदृशं पुण्यं न भूतं न भविष्यतीति॥ ॥ अग्निमंत्रमाह॥ व्याहृतीति॥ अ
ग्निरिति स्वरूपं विसर्गस्य संधौ रेफः॥ अग्निप्रियास्वाहा॥ प्रणवशक्तिपुटित इति केचित्॥ श्रीकामैः श्रीबीजादिर्जप्यः
॥ प्रणवो बीजं स्वाहा शक्तिः॥ व्याहृतित्रयं ततो अग्निप्रिया तारा द्योयं मनुरिति अनेन सप्ताक्षरः समुद्यग्निमंत्रोपि स्वचितः॥
तदुक्तमाचार्यैः॥ वियनोदशमो विसर्गयुक्तो भुवसर्गो भृगुलांतषोडशावः॥ हुतभुक्दयिता ध्रुवादिकोयं मनुरुक्तः सप्त
भृद्वितः कृशानोरिति॥ अस्य प्रणवो बीजं स्वाहा शक्तिः॥ एतन्मंत्रोक्तमेव ध्यानादि॥ द्विरुक्ता नि व्याहृतिभिः षडंगं॥ ध्यानं
च॥ शक्तिस्वस्तिकपाशान्सांकुशवरदाभयानि दधत्रिमुखः॥ मुकुटादिविविधभूषोवतात्चिरं पावकः प्रसन्नमुखः॥
जपेदिमं मनुमनलकृमाद्दशांशतः प्रतिजुहुयात्पयोधसा॥ सुसर्पिषा सुसितिततरेशपाष्टिकैरिति॥ पूजा तु वक्ष्य
माणक्रमेणैवेति॥ अग्निरिसादिस्वाहांतो पि पृथक्मंत्रस्त्व पिस्त्यचितं गतदुक्तं प्रयोगसारे॥ मंत्रोप्यग्निजतिवेदइहा
वहस्समन्वितः॥ सर्वकर्माण्यतः साधयस्वाहेति क्रमोदित इति॥ अपेक्षितार्थद्योतनिकायामप्येतादृशस्त्रत्ता॥ द्विवेदवे

देषु वह्निद्विवरैरंगकल्पनेति॥ ऋष्यादिध्यानपूजादिकं समानमेव॥ आयुधध्यानं वामा पूर्वयोश्चेतद् घस्थयोस्त्येवमांतं
॥ ध्यानानंतरं सप्तसप्तजिह्वाख्यमुद्रां प्रदर्शयेत्॥ तल्लक्षणं यथा॥ मणिबंधस्थितो हस्तौ प्रसृतांगुलिके करौ॥ कनिष्ठांगु
ष्ठयुगले मिलितांतः प्रसारयेत्॥ सप्तजिह्वाख्यमुद्रेयं वैश्वानरवशंकरीति॥ इयं सवग्निमंत्रसाधारणी तिज्ञेयं॥ गुरो
लब्ध्मनुमंत्री चतुर्दशपाप्युपोषितो॥ प्रजपेदिल्लचययः॥ चतुर्दशपामिति चैत्रकृष्णचतुर्दशी॥ तदुक्तं॥ वक्ष्यादेः चतुर्द
श्यां दिनादावेव दीक्षितः॥ मंत्रं द्वादशसाहस्रं जपेन्मन्त्युपोषित इति॥ मधुरोत्तरैः शर्करादिमधुद्रव्याधिकैः॥ अरंदि
नमिति भुक्तिप्रतिपदं॥ तदुक्तं॥ परेद्यि प्रतिपद्येतैर्जुहुयाद् विनिनलइति॥ नारायणीयेच॥ अथादिषुदिगंनेषु तिथि
षष्टोत्तरं शतं इति॥ क्रमाहूतेति षड्द्रव्याणि॥ नारायणीये तु सप्तद्रव्याण्युक्तानि॥ न्यग्रोधसमाधीविहितिलराजिघृ
तपायसघृत नित्यमिति॥ तपोतैर्द्रव्यैः समभिः एषगितिदशाहमिति॥ एवं विधानेन दशाहं निर्वर्त्य विधान विदेकाद
श्यां पूर्णाहुतिं दत्वा द्विजोत्तमान्संम्पक्सं पूज्य तर्पयेदिति उपचारैरित्युक्तं॥ स्वमंडलांतं वह्निमंडलांतं स्वबीजेनेति रमित्यनेन
॥ नं वह्नियोगपीठायनमः इति॥ आसनमंत्रः॥ विधिनेति षोडशोपचारैः॥ पूर्वोक्तिलक्षणमुक्तं ध्यानं॥ मूर्तीनां कथनमन्य
मूर्त्तिनिहृतसर्वा॥ प्रयोगसारनारायणीयोरन्यामूर्तय उक्ताः॥ अग्निर्वैश्वानरः पश्चात्परप्रोक्तो हुताशनः॥ हुतवल्भीजातवेदा
ततः स्यापि कृतावहः॥ त्र्योदेवमुखः सप्तजिह्वश्चैतद्यग्निमूर्त्तयश्च इति॥ एता व्याहृतित्रयं रहितैर्मंत्रैः सेव्या॥ जुहुयाद्विनिषु समास
महिरूढ एकस्य यस्य कस्य चिद्ग्रहणात्॥ अरुणोत्पलैरक्तकमलैः॥ रक्तकुवलयैरित्यपि॥ यत्कोशश्च॥ रक्तोत्पलंको
कनदं रक्ताम्बोरक्तसंध्यक इति॥ अतः समिधः सप्त पुष्पाण्येकाहुतेति॥ पंचदश द्रव्याणि तत्र प्रतिपदादि पूर्णपर्यन्तं
यथा प्रतिपद्येति पक्षे एकेन एकैकेन तस्मिन्दिवसे पंचदश द्रव्यैः प्रत्येकमष्टोत्तरशतं जुहुयात्॥ एवं प्रतिपदं यावत्पूर्णमासं पूर्त्तिः॥ अ
यवा प्रतिपद्विति पक्षे एकेन एकैकेन तस्मिन्दिवसे पंचदशभिर्द्रव्यैः प्रत्येकमष्टोत्तरशतसंख्यया जुहुयात्॥ ॥ उरगा

त्रिमूर्त्तमाह॥ उत्तिष्ठेति॥ हृदयंस्वाहासमुद्दिश्यनुरित्यनेनविनियोगोक्तिः॥ मंत्रस्तुहल्लोबीजानिस्वराःशक्तयः॥ प्रणवोबीजंस्वाहा
शक्तिरितिषमपादाचार्याः॥ प्रणवोबीजमितिकेचित्। नृसिंहबीजाद्यइत्यन्ये। लक्ष्मीबीजाद्यइत्यपरे॥ मृत्युंजयाद्यइत्यपिकेचन॥ प्रयो
गेदेहिमेएतत्सर्वंसाध्ययोगोपिकार्यः॥ प्रयोगसारनारायणीययोः॥ लोहिताङ्कमेपदद्यानिरिक्तःप्रणवादिर्विंशत्यक्षरएवो
द्धृतःतदुक्तं॥ उत्तिष्ठपुरुषेत्युक्त्वाहरिपिंगलदेहयम्॥ दहपचयेतितारादिःस्वाहांतोमंत्रईरितइति॥ वक्त्रोत्रपुच्छेश्विपुंगेवर्णे
श्चांगंपुरोहितमिति॥ भूतैरिति॥ पंचभिःकरणैरितिचतुर्भिः॥ लक्षंमनुंजपेदिति॥ अत्रप्रकारोपिहितार्थद्योतनिकायां॥ कृत्ति
काविशाखयोर्मध्येअष्टमानचंद्रकी॥ वायद्विभवतिनदात्रामिजिकालेपुरश्चरणमारभ्यमारक्तचंदनखदिरकाष्ठमप्य
मेनाग्निप्रतिमामापाद्यमूलेनावाहनादिविसर्गांतंकर्मकिर्चन्त्रिषवणस्नायी॥ त्रिसहस्रंत्रिंशतंचत्रिंशदधिकंनित्यंजप्त्वा
निघातितत्रामित्तमिद्दृस्त्वाहकपायसेनवातदर्धंजुहुयात्॥ मासं॥ पुरोश्वगामपिदद्यात्सिद्धोभवति॥ उभयोःसंध्ययो
र्मध्याह्नेवाकरवीरपुष्पैरर्चयेदिति॥ आगारितइत्यवदहिते॥ तत्रकल्पतरुस्थानेस्वर्णाश्वत्थःपूजनीयःध्यानेनयोक्तेः॥
मृगमुद्रयेति। मृगमुद्रालक्षणांतु॥ मिलितानामिकांगुष्ठमध्यमाग्राणियोजयेत्॥ शिष्टामुत्थाप्यतेकुर्यान्मृगमुद्रेयमीरितेति
॥ अमृतागुडूची॥ नृपवृक्षदूर्वाजवृक्षकृत्वेतिप्रत्येकंशतंएकैकशःशतमितिआम्नाये॥ गोदुग्धेनेतिस्तवर्णगोदुग्धेन
॥ तदुक्तंप्रयोगसारे॥ शालेयैस्तंदुलैःप्रस्थैःक्षीरेणगोक्षीरसाधितं॥ हविःपिंडघृताक्तंतुजुहुयादयुतमितिमिति॥ सम्यक्
जपित्वेतिलक्ष्मीबीजाद्यमित्युक्तं॥ कवलहोमानंतरमष्टोत्तरसहस्रंशतंवाघृतेनजुहुयादितिअपेक्षितार्थद्योतनि
काकारआह॥ नवपदार्थान्नवनाभे॥ आगारितेत्वतायप्रोक्तंवन्मनाषष्ठपटलोक्तरीत्या॥ ॥इतिश्रीश्री
शारदातिलकटीकायांसमस्तप्रदायकतथाख्यांपदार्थदर्शनाख्यायांचतुर्दशःत्रिमंत्रकथननामचतुर्द्दश
ःपटलः॥१४॥ ॥छ॥ संवत् १८४४ माघमासेसितेपक्षेएकादश्यांकविवासेजगन्नाथेनलिखितं॥ ॥मंगलं॥
विषादप्यमृतंग्राह्यंअमेध्यादपिकांचनं॥ नीचादप्युत्तमांविद्यांस्त्रीरत्नंदुष्कुलादपि॥१॥ ॥श्रीमस्तु॥ ॥ ७